* ओ३म् *

श्रीदयानन्दर्षिचरितम्

विद्यानिधिः

❀ ओ३म् ❀

श्रीदयानन्दर्षिचरितम्

(भारतप्रशासनस्य शिक्षासमाजकल्याणमन्त्रालयाधिगतार्थसाहाय्येन प्रकाशितम् ।)

प्रणेता—

श्रीविद्यानिधिः शास्त्री व्याकरणाचार्यः

प्रथमं संस्करणम् १०००

मूल्यम्

प्रकाशकः—
हरयाणा साहित्य संस्थान
गुरुकुल झज्जर (रोहतक)

१८९५ शकाब्दे
२०३० विक्रमवत्सरे
१९७३ ख्रीस्तवत्सरे

मुद्रकः—
वेदव्रतः शास्त्री
आचार्य प्रिंटिंग प्रेस
दयानन्दमठ, रोहतक

ग्रन्थकर्तुरावेदनम्

गद्यानवद्यविद्याया निधिमानन्ददं विभुम् ।
वन्देऽहं परमात्मानं दिव्यशक्ति दयोदयम् ।।

अनुज्झितार्थसम्बन्धस्य गद्यप्रबन्धस्यास्य निर्माणकर्मणि ममेदं मुख्यं कृतसांमुख्यं प्रयोजनतल्लजमुल्लसति यत् स्फुरद्विकासायाः संस्कृतभाषायाः प्रशस्तं समस्तं साहित्यं नित्यं नवं नवं नीयमानं नवनीतमिवोन्नीतं स्फीतं स्यादिति । तच्चोदात्तचरितानां सर्वभूतात्मभूतानां तपःपूतानां शुद्धाकृतीनामद्भुतविभूतीनां महामानवानां नवानां पुराणानां वा पावनं जीवनभवनं भुवनभावनमालम्बनमवलम्ब्य तत्र गीर्वाणवाणीवीणानिक्वाणैरेव साधीयः सम्पत्तुमर्हति । अद्यत्वे प्रायोऽवाचां वाचामाचार्याणां साधारणविलासिजनानुद्दिश्य विशिष्य सुरगिरं प्रयोक्तॄणां लब्धवैदुष्याणामपि शेमुषीजुषां विदुषां वैदुष्यं दुष्यति । एवंविधौ निर्व्यवधौ रसराहित्येन संस्कृतसाहित्यं न स्वीयामनन्यसामान्यां मान्यां सुषमां सुतमां पुष्यति । न च तुष्यति कृतधियां सुधियां चेतः ? शिवेतरक्षतेरभावात् । काव्यं नाम साहित्यं, तच्च यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये च संभवति । तन्नाम किं काव्यं, येन सुन्दरेणापि सता सत्यं शिवं चार्थसतत्त्वं नानुभाव्यते । नास्वाद्यते । न चाभिव्यज्यते । न च जीवनमुन्नीयते । असत्कल्पनाकल्पनेऽमङ्गलव्यासङ्गे न रिङ्गत्तरङ्गान्दोलने त्वनल्पा कपोलपालिः शक्या प्रकल्पयितुम् । किं तेन कुत्सितेन कविकर्मणा । कामक्रोधादिविकारोत्तेजकविचारोत्पादकत्वात् तद् हेयं विगेयं च भवतीत्यवधेयम् । वयं तु मन्महे— अविचलेश्वरभक्ती-

नाम् अलौकिकशक्तीनाम्, आत्मदर्शिनां, विषयवासनाधर्षिणां, मनःप्रहर्षिणां, जगदाकर्षिणां, महर्षीणां, सुकृतिनां, कृतिनां, विहितमहिताद्भुतपौरूषाणां महापूरूषाणामेव जीवनचरितोपवर्णनेन साहित्यस्य वस्तुतः साफल्यमवैकल्यमुखानुवर्ति वरिवर्ति। महापुरुष-साहित्यस्य जीवनं हि रसायनं नाम। तद्धि जगद्धितदेवगवीनवीनहैयंगवीन-निष्यन्देनानुस्यूतं स्वादीयः सम्पद्यते। संस्कृतभाषाभाषितभूषाभूषि-तोदात्तनायकाचरिता जीवनसरणिर्मसृणीभवति।

महात्मानः कृतात्मानः संयमिनः शमिनः श्रुतपारदृश्वानः स्ववशीकृतमातरिश्वानः कृतहर्षवर्षा महर्षयो ब्रह्मनिष्ठास्तपसः परां काष्ठां गताः प्रयतेन्द्रिया यतयः शुभमतयः कर्मवीरा धीरा गम्भीराः शूरा महीयांसो गरीयांसो विदितप्रभावा महानुभावा लोकस्य मार्गदर्शका भवन्ति। कल्याणपथपथिकानां तेषां जीवन-चरितमेवाध्येतव्यमध्यापयितव्यं च। श्रोतव्यं श्रावयितव्यं च। महामानवानामभिनवजीवनवनावनीपावनपवनासेवनेन सर्वे संशया विशीर्यन्ते। संसाराकूपारपारोत्तारणसेतुरेव भवति महात्मनां जीवनम्। संनिकृष्टा विप्रकृष्टा वा महात्मानः श्रियं विकर्षन्ति। अघान्यपघ्नन्ति। श्रेयः परिस्नुवन्ति। कीर्तिं चातन्वन्ति। न कुतूहलि कस्य मनश्चरितं हि महात्मनां श्रोतुम्। कस्या अपि भूषितभूषाया भाषायाः साहित्यमपि तदैव सौहित्यशोभामवगाहते यदा सत्यं शिवं सुन्दरम् इति विशेषणत्रयेण तत् समन्वयमयते। सत्यस्य यथार्थभूतस्य वस्तुवृत्तस्यैव साहित्येनाभिधानं कृतसंविधानं कमनीयतामावहति। न खल्वसत्यस्य स्वकपोलकल्पनाकल्पितस्य निजमनीषिकोत्प्रेक्षितस्य वोपन्यासस्य न्यासः स्वदते। सत्येनेतिवृत्तेन सह शिवस्य भद्रस्य कल्याणकरस्योपदेशविशेषस्यांशतः संनिवेशोऽपि साहित्ये नैयत्येनावश्यकोऽस्ति। एवं सत्यशिवाभ्यां साकं सुन्दरमपि

साहित्यं सद्यः परनिर्वृतिसम्पादकं विगलितवेद्यान्तरमानन्दं स्वच्छं स्वच्छन्दं मनोविनोदं च जनयतीति तत्र समुचितललित-संनिवेशचारुकोमलकान्तपदावलिसंवलितत्वमप्यावश्यकं भवति । एतत् त्रितयमप्यत्र दयानन्दचरिते समाविष्टमभीष्टं समस्ति । दयानन्दस्य चरितं हि सत्यं यथार्थमितिवृत्तं वर्तते, न तु कविकल्पना-प्रसूतम् । शिवं भद्रं कल्याणं मङ्गलं शुभं चैतदध्ययनाद्भवति । अनिवार्यमकदर्यं सौन्दर्यं चात्र स्पष्टमकष्टं संनिविष्टं चकास्तीति न मनागपि सन्देहदोलाधिरूढैर्मूढैर्दुर्दुरूढैर्वा भाव्यं भव्यैः । तस्माद-ध्येयमिदं श्रीदयानन्दर्षिचरितम् । दयानन्दचरितस्यैवापरमभिनन्द-नीयं नामधेयं दयानन्दचन्द्रोदयः इति प्रत्येतव्यम् । जगदान्ध्यं विनाशयितुं दयानन्दरूपस्य चन्द्रस्योदयो भगवदनुकम्पासम्पादना-ज्जात इत्यहं विभावये । अनिवार्यतयैतत् सम्प्रधार्यैव मया पूर्वनिवद्धे-ष्वपि तत्प्रवन्धेषु सत्सु प्रकामश्रद्धया स्वयंकृतोद्योगेन महर्षिजीवन-मुपनिबध्नता सफलीकृता स्वीया वाक् । साम्प्रतमम्लानं मे मनः प्रमनः । आप्तानीषत्समुन्मेषा च मनीषा । इत्यहमात्मानं पौनः-पुन्येन धन्यं मन्ये ।

सुयशोभारतेऽस्माकं भारते देशे भूयांसो ज्यायांसो विद्वांसो महान्तः पुरुषाः संजज्ञिरे येषां जीवनवृत्तमित्थंवृत्तं संवृत्तं येन ते समेपि सद्वृत्ताः सत्पथप्रवृत्ताः समन्ताज्जनसमवायसभाजनं स्थिर-यशोभाजनं च भेजिरे, किन्तु धिषणोपमस्य यस्यासाधारणधिषणस्य विलक्षणविचक्षणस्य मनीषिणो हितैषिणोऽहिंसकस्यापि ध्वंसित-व्यंसकस्य महापुंसः पवित्रं चरित्रमिदं मयान्यद् व्युदस्योपन्यस्यते स किल सकलपुरुषधौरेयः स्वदेशे विदेशे च प्रख्यातकीर्तिरुदीयमान-मूर्तिरूर्जितस्फूर्तिः श्रीमान् मतिमान् स्वामी दयानन्द एव युगपरिवर्ती चरीवर्ति । तस्य महापुरुषस्य महत्तायामिदमेव जाज्वल्यमानं मानं

विज्ञेयं विज्ञैर्यत् स धर्मकर्मणस्तात्त्विकं स्वरूपं निरूपयन्नास्तिक आस्त न तु नास्तिकः। भगवतश्चर्चायामर्चायां सम्यक् प्रजाहित-साधने च सर्वस्वसमर्पणमेव तन्मते यथार्थत्यागस्वरूपनिरूपण-मासीत्। स एवैकलो महान् अतिमहान् परमातिमहान् पुरुषोऽद्भुत-विभूतिराविरभूद् यः पश्चिमदेशीयमनुष्याणामपि गुरुरुदगीयत। यमनेके पाश्चात्या जात्या भिन्ना अपि संभिन्ना इव गुरुमाचार्यं धर्मपितरं च मेनिरे। यस्मिन् युगे स्वामी दयानन्दः समुत्पेदे ततः कतिपयवर्षेभ्यः प्रागारभ्येदानीं यावत् स एवैकः पुरुषो विलक्षणो योग्यसौभाग्यभोगभाग्यवान् सञ्जातो यो विदेशीयभाषामजानन्नपि स्वदेशाद् बहिरेकं पदमदधदपि, स्वदेशीयेनैवाशनवसनपानादिना पुष्टस्तुष्टः, आचारविचारयोः स्वदेशीयः, भाषाभूषयोरपि स्वदेशीयः सन्नेव प्रसन्नो वीतरागत्वात् परमवैदुष्याद् ब्रह्मचर्यवलप्रतिष्ठानाच्च समेषामेषां स्वेषां परेषां च भक्तिभाजनमजनि। सर्वेपि दैशिका वैदेशिकाश्च यमत्याद्रियन्त। अत्युच्चैःपदाधिरूढा व्यूढानेका-धिकारा राष्ट्रकर्णधाराः स्वदेशीयाः सम्राजो विभ्राजो महाराजाश्च यं भृशं सममानयन्। स महापुरुष एष दयानन्द एवासीत्। तं विहाय भारतीयेऽस्मिन् युगे एतादृश एकोपि मनुष्यो भूष्यो जुष्यो वा नाभूद् यो विदेशीयभाषामशिक्षित्वापि, विदेशयात्रामकृत्वापि च स्वदेशे द्युतिमात्रं सम्मानं लब्धुमलङ्कर्मीणोऽजायत। अधुना यावद् यावन्तोपि शिक्षका नेतारोऽत्रदेशे समजनिषत ते सर्वेपि विदेश-भाषां भाषितवन्तः। विदेशयात्रां च कृतवन्तः। तत्प्रभावेणैव तेषां देशे विदेशे च नाम प्रतिष्ठां लेभे। परन्तु भगवान् दयानन्द ऋषिस्तु बहिरन्तश्चामूलचूलं स्वच्छः शुद्धः स्वदेशीय एवावर्तत। असौ स्वकीयेनैव ज्ञानगुणगरिम्णा महत्त्वमापेदे। अनन्यलभ्यस्तस्य महात्मनो महिमा गरिमा च। दैशिकैर्वैदेशिकैश्च यावान् संमानो

दयानन्दस्य व्यधायि, तावानन्यस्य कस्यचिद् भारतीयस्य न व्यधायीति निश्चप्रचं वचो वच्मि।

अयं महाभागो निरपेक्षः सन्नेव मतान्तराणां समालोचनां चक्रे। स्वार्थापेक्षारहितोऽकुतोभयोऽयं विभिन्नमतानामुपरि टीकां टिप्पणं च विदधे। एवं कुर्वत्यपि तस्मिन् ईदृशी काचिदलौकिकी शक्तिराविरासीत्, एवंविधाश्च केचन विशिष्टा गुणाः समवायन्, येषां प्रभावादसौ स्वसमयवर्तिनां समस्तानां बुद्धिमतां सतां जनानां संमानपात्रं जातः। यवनपक्षरक्षणक्षमो नीतिनिपुणो नेता सर सैयद अहमदखां महाशयः खल्वन्तरात्मना दयानन्दमनुगच्छति स्म। कृतदयानन्दोपदेशनिमज्जनः सज्जनः पादरी स्काटः प्रकाशितहृत्कपाटः स्पष्टं दयानन्दमत्याद्रियत। स्थाने-स्थाने आशु यीशुप्रभुमन्दिरेषु सदुपदेशदानाय स्वामिदयानन्दमसावामन्त्रयामास। पाकिस्ताननिर्माणात् पूर्वं लवपुरे तु प्रतिष्ठितैर्यवनमहोदयैरेव कृतोदयैः स्वभवनं दत्त्वा महर्षेः स्तुत्यं तथ्यमातिथ्यं विहितम्। वङ्गदेशीयः श्रीकेशवचन्द्रसेनः स्वामिनेऽत्यन्तायास्निह्यत्। देवेन्द्रनाथष्ठक्कुरः स्वामिनं सातिशयं सम्मानयांबभूव। महामती रानाडे गोविन्दस्तु स्वामिनो भक्तेषु प्रमुखः प्रतिभावान् मणिराभात्। सकलप्रान्तानां गण्या मान्याः सज्जनाः स्वामिनश्चारुचरणसरोजयोरुपस्थाय गौरवमनुभवन्ति स्म। अतितीव्रे समालोचके सत्यपि स्वामिनि दयानन्दे लोकानामीदृग् इयांश्च प्रेमस्थेम्नो महिमा नान्यत्र क्वापि पुरुषान्तरे दृष्टिपथमितोऽभूत्। स्वामिनो जीवनचरितमिदमधीयतां शुभलाभवद्भिर्भवद्भिर्विद्वद्भिः। तत्र घटनानामध्ययनावसरे वयमेवं प्रतीमो यदिदानीं पर्यन्तं यावन्तोऽपि महात्मानो जगत्यां समभूवन् तेषां समेषां जीवनस्य सर्वे समुज्ज्वला अंशाः भगवति दयानन्देऽनवयवेन समन्वयमीयुरिति। स एकोऽपि गुणो गुणपक्षनिक्षिप्तो न भवति यः सर्वगुणसम्पन्ने तस्मिन्नृषौ

समन्वितो न स्यात्। महाराजस्य हिमवति गिरौ भ्रमणम्, विन्ध्याटवीविहरणम्, नर्मदातटे पर्यटाट्या, प्रतिपदं साधूनां दर्शनं सत्सङ्गोपलब्धिश्चेत्येतत् सर्वं मङ्गलधाम श्रीरामनाम स्मारयति। कर्णावासे रावकर्णसिंहस्य विद्युदुद्द्योतवद्द्योतमानं खड्गं विलोक्यापि महाराजो न चकम्पे। तीक्ष्णतरां खड्गधारामभिमुखीमपि सतीं दृष्ट्वा निर्भीकोऽवतस्थे। गम्भीरेण स्वरेण चोच्चैर्वाचमूचे— अमरोऽयमात्मा अनुच्छित्तिधर्मा इति। नैनं कश्चिद् हन्तुं शक्नोति। इत्येवंप्राया अन्याश्चान्याश्च नाना घटना ज्ञानविज्ञानराशिं श्रीकृष्णमेव मनोनेत्रयोः पुरस्तादुपस्थापयन्ति। एवं प्रतीयते यत् साक्षाद् भगवान् श्रीकृष्ण एवोपदिशतीति। प्रियस्वभगिन्याः पूज्यपितृव्यपादानां मृत्योश्च दर्शनाद् वैराग्यवता भूत्वा कौपीनमात्रं परिधाय वने-वने दिगम्बरवेशेन परिभ्रमणम्, अतिकठोरघोरतरतपोऽनुष्ठानम्, पर्यवसाने च ब्रह्मसमाधौ सिद्धे सति मृत्युञ्जयस्य महौषधस्योपलब्धिः इत्येष महर्षिजीवनस्यांशो महात्मानं जितात्मानं बुद्धदेवं बुद्धिमध्यमध्यारोपयति। दीनान् हीनान् दुःखितान् क्षितान् बुभुक्षितान् विकलाङ्गान् नग्नान् भग्नान् अनाथांश्च विलोक्य दयानन्दो यीशुमहात्मा प्रतिभाति। वादिप्रतिवादिधुरन्धराणां मध्ये श्रीशङ्कराचार्यवत् प्रतिभासते। ईश्वरस्यैकत्वं प्रचुरं प्रचारयन् विस्तृतं भ्रातृभावं च शिक्षयन् स्वामी श्रीमुहम्मदः प्रतीतो भवति। परमेश्वरस्य गुणगानं कुर्वन् तदीयस्तुतिप्रार्थनासु दयानन्दो यदेयन्निमज्जति यदमुष्य नयनाभ्यां परमात्मप्रेमजनिताविरलाश्रुधारा प्रवहति, कण्ठो गद्गदीभवति, गात्रं च पुलकितं जायते तदा सत्प्रवराः कबीर–रामदास–नानक–दादू–चेतन–तुकाराम–प्रभृतयः पुरोऽवस्थिताः प्रतिभान्ति। तदानीं दयानन्दः सतां शिरोमणिः स्पष्टं प्रकटीभवति। आर्यधर्मस्य वैदिकसंस्कृतेश्च रक्षणवेलायां स प्रातःस्मरणीयश्रीमहाराणाप्रताप–शिवराज–गुरुगोविन्दसिंहानां

रूपं धारयति । यस्मिन्नपि पक्षे वयं दयानन्दस्य जीवनमवगाहामहे तस्मिन्नेवादोजीवनं सर्वाङ्गसुन्दरं प्रतीयते । स्वार्थत्यागस्य वैराग्यभावनायाश्च तत्र न्यूनता नास्ति । श्रद्धा भक्तिश्च तत्रातुला विपुला च चकास्ति । अगाधं ज्ञानम् । अतलस्पर्शी तर्कः । प्रत्युत्पन्न-मतित्वम् । समुचितहास्यरसिकत्वम् । प्रेम्णः परोपकारस्य चाकृति-मत्त्वम् । कृपासहानुभूत्योराश्रयत्वम् इत्येतदखिलमनाविलमनाकुलं च भगवति दयानन्देऽमन्दं विन्दामः । किमधिकं प्रपञ्चितेन— महर्षे-र्दयानन्दस्येदं चरितमोजस्वि, तेजस्वि, परमप्रतापवत्, लोकहितायो-द्गूर्णं सकलकलासम्पूर्णं चाविरस्ति। तस्य जीवनं मरणं चोभयमपि प्रजायोगक्षेमकरमेवाभूदिति । सत्सङ्गजानि निधनान्यपि तारयन्ति इति सूक्त्या महात्मनां मृत्युरपि संसारसागरादुत्तारयितुं प्रभवतीति। देहेन्द्रियसंघातेन रहितोपि स ऋषिरमर एवावतिष्ठते । तत्प्रणीत-ग्रन्थानामध्ययनाध्यापनाभ्यां तदीया कीर्तिरनपायिनी यावच्चन्द्र-दिवाकरं स्थास्यति ।

एवंप्रायं साभिप्रायं प्रायो महर्षेर्जीवनचरितं भूयोभिर्विद्वद्भिः प्रागपि सुरगव्या रसेन तद्व्यतिरिक्तेन प्राकृतस्वरसेन चाभिषिक्तं विविक्तं गद्यपद्यात्मकं प्रसिद्धं निबद्धमस्ति । मयापि स्वामिनं प्रति प्रेमातिरेकाद् द्विर्बद्धं सुबद्धं भवतीति न्यायेन स्वप्रतिभयाऽप्रतिभयेन सता गद्यबन्धत्वेन प्रतिबद्धं निबद्धम् । वस्तुतस्तु— इदानीं यावदुप-लब्धे संस्कृतगद्ये महर्षिजीवनस्य कापि ललिता सरसा मधुरा च रचना नाक्षिलक्षीभवति । अन्यैर्धन्यैरधन्यैर्वा मान्यैर्लेखकैः केवलं सामान्यसंस्कृतवाक्यैरेव जीवनघटनाः समग्राहिषत । अनुप्रासो-पमाश्लेषपरिसंख्याद्यलङ्कारसंनिवेशे तैर्नात्यादरः कृतः । मया त्वत्र निबन्धे पदे-पदे स्खालित्यराहित्येन सहकृतं पदलालित्यं, चूर्णगद्यानु-गुणं गुणनिबन्धनं शब्दार्थबन्धनं मनोहारि पूर्वमहाकवीनामनुसारि हितं विहितम् । एतेन नूतनं रत्नमिवेदं निर्माणं प्रत्नमधरीकुर्वन्न-

वनवोन्मेषशालिनां कृतिनां मनोविनोदाय प्रभविष्यतीत्युत्प्रक्षे । एतत्प्रणयने स्वर्ग्यश्रीस्वामिसत्यानन्दमहाभागप्रणीतात् श्रीमद्दयानन्द-प्रकाशनाम्नो बृहद्ग्रन्थान्मुहुः साहाय्यमवलम्बितम् । द्युगत श्रीचमूपतिनिर्मितात् 'हमारे स्वामी' इत्याख्यात् मुख्याल्लघु-ग्रन्थादपि काश्चन महत्त्वपूर्णा घटनाः संगृहीताः, दयानन्दचित्रावली प्रभृतीनां ग्रन्थान्तराणामपि विशेषेणाश्रयः शिश्रिये । ते सर्वेपि धन्या मान्याः श्रद्धेयाश्च भवन्ति ।

एतत्प्रकाशने प्रचण्डब्रह्मचर्यदण्डमण्डितस्तपस्तेजःपुञ्जमञ्जु-समृद्धया भाग्यवान् श्रीभगवान्देव ओमानन्दस्वरूपो निर्जरो निर्झरवज्झज्जरगुरुकुलस्याचार्यः प्रधानं निमित्तमिति तं विद्वन्मूर्धन्यं मुहुर्धन्यं वदामि । आचार्यमुद्रणयन्त्राध्यक्षेण प्रत्यक्षं प्रत्यक्षरमवधा-नवता प्रतिभानवता श्रीवेदव्रतशास्त्रिणा प्रियसुहृदा स्वहृदा प्रयतमानेनापि गतमानेन ग्रन्थोऽयमुन्मुद्रितभद्रया मुद्रया क्षुद्रोपद्रवान् द्राग् विद्राव्य मुद्रापित इति सोपि धन्यवादमेवार्हत्यगर्हणीय-मर्हणीयः ।

इत्योम् शम् ।

आवेदयिता—

विद्यानिधिः शास्त्री
व्याकरणाचार्यः

प्राध्यापकः गुरुकुल भैंसवाल,
जि० सोनीपत

शुद्ध्यशुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२	१५	मधिगत	समधिगत
१५	१	महर्क्षो१	महर्क्षो१ हर्यक्ष२
१९	८	मुंद्रीक्ष्येन्दु	मुद्रीक्ष्येन्दु
,,	२२	प्राणिनि	पाणिनि
२१	७	संनिधत्त	संनिधत्ते
२२	१६	पाठयतुमिह	पाठयितुमिह
२९	१३	बृहादायो	बृहदायो
३१	५	ब्रुक	ब्रुक्स
,,	१३	वर्नल	कर्नल
३४	९	भूय	भूयस्
३८	१८	मुदपादि	समुदपादि
४२	२३	विथि	वीथी
४३	१०	सकास	सकाश
,,	१६	वन्धनीत:	बन्धं नीत:
,,	२०	नि:स्पन्दना	नि:स्पन्दनाद्
,,	२५	रो	रोषो
४४	१०	सप्रसत्ति	१ सप्रसत्ति
,,	१८	भागवतो	भागवतो२
४६	११	स्वसामर्थ्यं	स्वासामर्थ्यं
,,	१४	निर्णोक्तं	निर्णिक्तं
,,	१८	क्षेपा	क्षेपाच्
४७	६	जिनेश्वर	जीवेश्वर
,,	१०	भित्ताघा	भित्ताद्या
,,	१२	तुरन्तं	दुरन्तं
,,	१३	खन्दोहं	खन्दोई
,,	१८	मसत्य	असत्
,,	२२	तस्यां	तस्या
४८	२२	सन्नगृहीत	सन्नग्रहीत
५७	१	मनवाहित्थ	मनवहित्थ

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
५९	४	नुवृत्तां	नुवृत्तां प्रवृत्ति
६०	३	कल्पनान्त	कल्पान्त
६३	५	रक्षाध्यक्षे	रक्षाध्यक्षे काश्यधीशो
७२	१७	प्रलयाबाशष्ट	प्रलयावशिष्ट
७३	२१	सङ्का	शङ्का
७६	११	मन्वमुङ्क्त	मन्वयुङ्क्त
७६	१४	निर्विषयं	निर्विशयं
७९	९	तत्प्रीता:	तत्प्रतीता
८०	८	निव्रीडै:	निर्व्रीडै
८१	२०	नामान्यत	नामन्यत
८२	२२	श्लुघा	श्लाघा
८४	४	विकृतकारं	विकृताकारं
९२	२	पण्डितीको	पाण्डितीको
९४	१५	सभाजयन्	सभा जयन्
,,	२१	रोगाविनाशक:	रोगविनाशक:
९५	१	निर्बहितांहा	निर्बहितांहा:
९६	८	प्रान्तीय	प्रान्तीये
९७	६	लाभोऽलभि	लाभोऽलाभि
,,	१८	उपदेशासाने	उपदेशावसाने
९८	१७	सुमनस्तम:	सुमनस्तम:२
१००	१९	प्रहह्लन्न	प्रह्लन्न
१०१	२४	पञ्चमसंख्याकं टिप्पणं नैव देयम् ।	
१०२	१६	नभ्यास	नभ्याश
,,	२४	मनुपसृत्य:	मनुपसृत्यम्
१०३	७	सम्मुलेसु:	समुल्लेसु:
,,	१०	शाहपुरधीशो	शाहपुराधीशो
१०४	१७	भर्सित	भर्त्सित
,,	८	विषय	विषम
११२	१३	नष्टव्य	नंष्टव्य
११२	२२	कुटिजम्	कुटिलम्

ओ३म्

श्रीदयानन्दर्षिचरितम्

अथवा

दयानन्दचन्द्रोदयः

प्रथम उल्लासः

(शिखरिणी वृत्तम्)

शिवं शान्तं कान्तं प्रभुमतिमहान्तं सुमतये
प्रणम्याद्यं विद्यानिधिरहमविद्यापहृतये ।
अपाकुर्वत् प्राचां प्रविततमवाचां[1] च दुरितं
ब्रुवे दैव्या वाचाञ्चितयति[2] दयानन्दचरितम् ॥१॥

जनिष्टङ्कारायां, शिवरजनिजन्याखुघटना[3]
गृहे मृत्योर्दृश्यं, विपिनगमनं, योगिमिलनम् ।
[4]गुरोरिच्छापूर्तिः, प्रसृतबहुपाखण्डदलन
विषं पीत्वा मुक्तिर्यतिवरदयानन्दचरितम् ॥२॥

महर्षिस्तुतिः

लसन्मैत्र्या[5] स्वैरं जननिवहवैरं विरहयन्
मुनित्वं सद्वृत्त्या विषयविनिवृत्त्या च कलयन् ।

---

१. नवीनानाम् । २. अञ्चितः पूजितः तस्य यतेः दयानन्दस्य । ३. आखुर्मूषकः । ४ विरजानन्दस्य । ५. मैत्र्या लसन् शोभमानः । लसन्त्या शोभमानया मैत्र्या इत्येकं पदं वा ।

महान् दान्तः शान्तः प्रबलबलकान्तः प्रणयवान्
दयानन्दः स्वामी निगमपथगामी विजयते ॥३॥

मतध्वान्ते भ्रान्तं जगदिदमशान्तं प्रशमयन्
असंभ्रान्तः स्वान्तं निजमथ नितान्तं नियमयन् ।
शिवं भूयोऽमूर्तं भुवनतलपूर्तं प्रकटयन्
दयानन्दः स्वामी निगमपथगामी विजयते ॥४॥

प्रचण्डं पाखण्डं दलयितुमखण्डं श्रुतिबलं
दधज्ज्यायो[1] योगी बलवदुपयोगीत्यविकलम् ।
वपुष्पुष्टस्तुष्टः सुकृतिमतिजुष्टः प्रियवचा
दयानन्दः स्वामी निगमपथगामी विजयते ॥५॥

यशः संपत्काषी [2]धिषणसमकाशीस्थविदुषः
समस्तानप्यस्तानतनुत [3]विहस्तानवगणः[4] ।
अनार्यैः सन्नार्यैः सततमनिवार्यैः परबलै-
र्दयानन्दः स्वामी निगमपथगामी विजयते ॥६॥

ब्रुवन् नित्यं सत्यं समधिगतमृत्युञ्जयपदः
पपौ यो निःस्वार्थं शिव इव परार्थं विषमहो ।
हितैषी स ह्येषामृषिरिह समेषामपि नृणां
दयानन्दः स्वामी निगमपथगामी विजयते ॥७॥

पुराणज्ञानज्ञानुचितभगवज्ज्ञानविमुखान्
उपादिक्षद् वेदं विशकलितभेदं प्रतिपदम् ।
पवित्रात्मा युक्तः सकलभयमुक्तः स भगवान्
दयानन्दः स्वामी निगमपथगामी विजयते ॥८॥

---

१. ज्यायः प्रकृष्टतरम् । २. धिषणो बृहस्पतिः । ३. विस्मयान्वितान् ।
४. अवगणः एकाकी ।

गुणैरुच्चैःस्थानं स्वगुरुविरजानन्दमपि यः
प्रसिद्धः सच्छिष्येष्वधिकमतिशिश्ये[1] विनयवान् ।
असौ त्यक्त्वानार्षं पठनविधिमार्षं प्रतिदिशन्
दयानन्दः स्वामी निगमपथगामी विजयते ॥९॥

न रेमे चापल्ये समविषमशल्येषु जगतो
न वा कामक्रोधेष्वपि हृदवरोधेष्वरमत ।
परित्यक्तस्वार्थः फलितपुरुषार्थः शुचिरुचि-
र्दयानन्दः स्वामी निगमपथगामी विजयते ॥१०॥

जनन्याः सा धन्या जनिरजनि[2] संन्यासरुचिरः
समुद्दीप्तो यस्यां त्रिभुवननमस्याङ्घ्रियुगलः ।
दधद् बोधं शुद्धं सुगममविरुद्धं कृतधियां
दयानन्दः स्वामी निगमपथगामी विजयते ॥११॥

सुधीरात्मारामः स्थगितरतिकामः स्थिरमनाः
प्रपेदे योऽरण्यं मुनिजनशरण्यं नियमवान् ।
असारं संसारं सपदि सविकारं परिहरन्
दयानन्दः स्वामी निगमपथगामी विजयते ॥१२॥

दधानः सन्मूर्तिं विमलरसपूर्तिं शिखरिणीं[3]
सुखं शान्तिं शोभां जगति सुयशोभां[4] च सकलाम् ।
विपन्नानां त्राता परमसुखदाता स मतिमान्
दयानन्दः स्वामी निगमपथगामी विजयते ॥१३॥

---

१. अतिक्रान्तवान् । २. जनिः जन्म । ३. शिखरमुच्चपदं तद्-युक्ताम् । ४. सुयशसः सुकीर्तेः भां प्रभाम् । शुभकीर्तिप्रकाशमित्यर्थः ।

कथोपक्रमः

अथेदमधिक्रियते सकलमनुजवृन्दवृन्दारक[1]-वन्दनीयपादारविन्दस्य भगवतो दयानन्दस्यानन्दस्यन्दि सुन्दरं चरितामृतम्। प्रवर्त्यते पुण्यराशेस्तस्य स्वरूपाख्यानामृतप्रपामण्डपः। यत्र श्रूयमाणे न मधुरो वेणुवीणाक्वणः, दृष्टे नाभिरामः कामः, परिचिते न श्लाघ्यं मधु, अभ्यस्ते नानन्दीन्दुः। विचार्यमाणे यस्मिन् सुनामाख्याते[2] तद्धितकारकवृत्तिसहिते पुण्यसन्धौ, अर्थवद्वर्णग्रहणपरिभाषासमासकृति व्याकरणे च नापशब्दसम्बन्धः। बृहत्या[3] रुचिरयाऽपराजितया धियान्विते जगत्याख्याते सत्कृतगुरुगणे शार्दूलविक्रीडिताडम्बरिणि पुण्यश्लोके पर्यालोच्यमाने यस्मिश्छन्दसि च न वृत्तभङ्गः। यस्यार्यमर्यमर्यादायामनपेक्षः पक्षपातः। स्वभावजं सौजन्यम्, अकृत्रिमः स्नेहभावः, अनुपचरितमुपकारित्वम्। केन याच्यन्ते चन्द्रचन्दनसज्जनाः परोपकाराय। तस्यैवंविधस्य निर्निमित्तबन्धोरभ्युदयः कस्य न सचेतसः प्रियंकरो भवेत्। अत एवायं प्रस्तूयते दयानन्दचन्द्रोदयः। इयमधिगतकतिपयाक्षरलवपेलवा[4] वाक् क्वान्यत्रोपयोगं यास्यति-आजन्मब्रह्मचारिणो वेदैकशरणात् पूर्णात् पुरुषादृते दयानन्दात्।

---

१. वृन्दारका देवाः। २. व्याकरणपक्षे नाम-आख्यात-तद्धित-कारक-वृत्ति-सन्धि-अर्थवद्ग्रहणे नानर्थकस्य, वर्णग्रहणे जातिग्रहणम् इति परिभाषा समास-कृत्-शब्दा उन्नेयाः। दयानन्दपक्षे शोभननाम्ना आख्याते कथिते। तस्य हितं तद्धितं तत्कारिका या वृत्तिर्व्यवहारः तया सहिते। सन्धिः सन्निकर्षः। अर्थवतां ब्राह्मणादिवर्णानां ग्रहणस्य या परिभाषा लक्षण तस्य समासं संक्षेपं संग्रहं वा करोतीति कृत् तस्मिन्। ३. छन्दःपक्षे बृहती-रुचिरा अपराजिता-धी-जगती-गुरु-गण-शार्दूलविक्रीडित-श्लोक—(विश्लोक)-वृत्त—शब्दा उन्नेयाः। दयानन्दपक्षे तु सुगममेव। वृत्तं सदाचारः। ४. मृदुला।

आर्यावर्तवर्णनम्

अस्ति विस्तीर्णमेदिनीमण्डलमण्डनायमानः, नग[1]नगरविहारारामरमणीयः, मेरुरिव सुवर्ण[2]—प्रकृतिकमनीयः, ग्राम्यकविकथाबन्ध इव नीरसस्य[3] मनोहरः, अनधीतव्याकरण इवादृष्टप्रकृति[4]—निपातोपसर्गलोपवर्णविकारः, पुण्यकारिणां शरण्यः, श्रेयसामाश्रयः, सम्पदामास्पदम्, साधुव्यवहाररत्नानामाकरः, पुण्यतरतरङ्गगङ्गा—यमुना—सरस्वती—शुतुद्री—परुष्णी—गोदावरी-वारिवारितमलदावानलप्रसरः, आचार्यं भवनमार्याणामार्यावर्तो नाम देशः ।

यत्र शास्त्रे शस्त्रे वेदे वैद्ये भरते भारते कल्पे शिल्पे च प्रधानः, धनी धन्यो धान्यवान्, विदग्धो वाचि, मुग्धो मुखे, स्निग्धो मनसि वसति निरन्तरमशोको लोकः । यत्र च मनोहारि[5] सारसद्वन्द्वास्तत्पुरुषेण[5] द्विगुना[5] चाधिष्ठिताः सुन्दरगद्यबन्धा इव दृश्यमानबहुव्रीहयः[5] केदाराः । [6]पीवरोधसः सरित इव गावः । सदान[7]—

१. नगाः वृक्षाः पर्वता वा । २. मेरुपक्षे स्वर्णस्वभावेन कमनीयः । देशपक्षे शोभनैर्वर्णैः ब्राह्मणादिभिः प्रकृत्या प्रजया । ३. ग्राम्यकविपक्षे नीरसस्य रसरहितस्य । देशपक्षे नीरेण जलेन सस्येन क्षेत्रसम्पत्त्या च मनोहरः । ४. व्याकरणपक्षे-प्रकृति-निपात-उपसर्ग-लोप-वर्णविकारशब्दा उन्नेयाः देशपक्षे प्रकृतिः प्रजा । निपातः पतनम् । उपसर्ग उपद्रवः । लोपो विनाशः । वर्णा ब्राह्मणादयः । ५. गद्यबन्धपक्षे मनोहारी सारो येषु तथा द्वन्द्वसमाससहिताः । तत्पुरुषद्विगुबहुव्रीहिशब्दाः समासनामधेयानि । केदारपक्षे मनोहारीणि सारसानां पक्षिविशेषाणां द्वन्द्वानि युगलानि येषु । तस्य केदारस्य पुरुषेण तत्पुरुषेण । द्वौ गावौ वृषभौ यस्य तेन द्विगुना । दृश्यमाना बहवो व्रीहयो धान्यानि येषु । ६. सरित्पक्षे पीवानि स्थूलानि रोधांसि कूलानि यासां ताः । गोपक्षे पीवराणि ऊधांसि यासां ताः । ७. प्रभञ्जनो वायुः । तत्पक्षे सदा नभसि गच्छन्तीति सदा नभोगाः । जनपक्षे दानभोगसहिताः ।

भोगाः प्रभञ्जना इव जनाः। कुपितकपिकुलाकुलिता लङ्केश्वरकिकरा इव भग्नकुम्भ[१]-कर्णघनस्वापाः कूपाः। अनवरतधर्मकर्मोपदेशशान्तसमस्तव्याधिव्यतिकराः पूर्णपुरुषायुषजीविन्यो यत्र प्रजाः सकलसंसारसुखभाजः। यत्र चलता[२]-सम्बन्धः कलिकोपक्रमश्च पादपेषु दृश्यते न प्रजासु। भूत[३]-विकारवादः सांख्येषु, मित्रोदयद्वेषः[४] कौशिकेषु, बन्धुजीव[५]-विघातो ग्रीष्मदिवसेषु, क्षयस्तिथिषु न प्रजासु। तस्यैवापरमभिधानं भारतमित्याचक्षते।

मौर्वीपुरीवर्णनम्

सर्वातिशायिप्रभारतस्य तस्य भारतस्य पश्चिमे दिग्विभागे गुर्जरप्रान्तान्तर्गता चकास्ति मौर्वी नाम नगरी। या नीतिमत्पुरुषाधिष्ठिताऽप्यनीतिः,[६] सवटाप्यवटसंकुला,[७] कारूपयुता[८]-प्यगतरूप-

---

१. लङ्केश्वरो रावणः। तत्किकरपक्षे भग्नः कुम्भकर्णस्य घनः सान्द्रः स्वापः स्वप्नो यैः। कूपपक्षे भग्नाः कुम्भानां कलशानां कर्णाः प्रान्तभागा येषु तथा घनाः सुखेन आप्याः प्राप्याश्च। २. पादपपक्षे च, लता इति पदच्छेदः। कलिकानामुपक्रमश्च। प्रजापक्षे चलता चञ्चलता तस्याः सम्बन्धः कलेः कलहस्य कोपस्य च क्रमः प्रवृत्तिः। ३. सांख्यपक्षे पञ्चभूतानां षोडशविकाराणां च वादः। प्रजापक्षे भूतानां प्राणिनां विकारस्य दोषस्य वादः। ४. कौशिक उलूकः। तत्पक्षे मित्रः सूर्यः। प्रजापक्षे मित्रं सुहृत्। ५. बन्धुजीवो बन्धूकाख्यो वृक्षविशेषः। पक्षे बन्धूनां जीवः प्राणाः। ६. अविद्यमाना ईतिः भयं संकटं वा यस्यामिति विरोधपरिहारः। ७. अवटाः गर्ताः तैः संकुला व्याप्तेति विरोधपरिहारः। ८. ईषद् रूपं कारूपं कुत्सितं रूपमित्यर्थः। तेन युतापि अगता अप्रच्युता रूपशोभा यस्या इति विरोधः। कारुभिः शिल्पिभिः उपयुता। अगानां पर्वतानां तरूणां चोपशोभा यस्याम् इति परिहारः।

शोभा। यत्र चतुरगोपशोभिताः[1] संग्रामा इव ग्रामाः, अधिकन्ध-[2] रोद्देशमुद्भासयन्तो हारा इव विहाराः। यस्यां स्नेहक्षयः[3] प्रदीपेषु, न प्रतिपन्नजनहृदयेषु[3]। वृत्तिकलहो[4] वैयाकरणच्छात्रेषु, न स्वामिभृत्येषु। दानविच्छित्तिः[5] करिकपोलमण्डलेषु, न त्यागिगृहेषु।

जन्माद्युदन्तः

तद्राज्यभाजि टंकारानाम्नि ग्रामे किलैकाशीत्युत्तराष्टादशशततमे वैक्रमाब्दे श्रीमान् स्वामी दयानन्दो जन्म लेभे। वन्दनीया सा कापि पुरुषरत्नाकरकुक्षिर्जननी यस्यां सकलसंसारनरहारावलीमध्यमहानायकोऽय[6]--मुत्पन्नः। लब्धजन्मन्येत्रास्मिन् द्विजन्मनि बालके सौभाग्यामृतनिर्झरे चिरं नेत्राणि निरवान्[7] पौराणाम्। शनैः शनैः कल्पपादपाङ्कुर इवासौ शिशुर्वर्धितुमारब्ध। वर्धमानस्य चास्य सर्वदेवमय इवाकारोऽदृश्यत। तथाहि–सुतारा[8] दृष्टिः। सुकुमाराश्चरण[9]–पाणिपल्लवाः। सुधाकान्ति[10] स्मितम्। अरुणो[11] दन्तच्छदः। भास्वन्तो[12] दन्ताः। [13]सुरभिर्निश्वासः। लावण्यातिशयमधुरिम्णा सर्वेषामयं प्रियोऽभूत्। अशेषतेजस्वितेजःपुञ्जा-

---

१. संग्रामपक्षे च, तुरगोपशोभिता इतिच्छेदः। ग्रामपक्षे चतुरैः गोपैः शोभिताः। २. हारपक्षे कन्धराया ग्रीवाया उद्देशे प्रदेशे इत्यधिकन्धरोद्देशम्। विहारपक्षे अधिकं धरायाः पृथिव्या उद्देशम् प्रदेशम्। ३. स्नेहः प्रेमा, तैलं च। प्रतिपन्नो विश्वस्तः। ४. वृत्तिः सूत्रार्थ विवरणं, जीविका च। ५. दानं मदजलम्, स्वार्थत्यागश्च। ६. नायको मुक्तावल्याः मध्यमणिः, समुन्नेता च। ७. निर्पूर्वाद् वा धातोर्लङि प्रथमपुरुषबहुवचनम्। निर्वाणमापुः। परमं सुखमलभन्तेत्यर्थः। ८. तारा तारका, कनीनिका च। ९. कुमारः कार्तिकेयः मृदुलश्च। १०. सुधाकान्तिश्चन्द्रः, अमृतकमनीयता च। ११. अरुणः रक्तभास्वरशुक्लः, सूर्यसारथिश्च। १२. भास्वान् सूर्यः, प्रकाशयुक्तश्च। १३. सुरभिः कामधेनुः सुगन्धश्च।

पहारिणं रविमिव तं जनयन्ती जननी द्यौरिवाभात्। तस्य महाभाग्यस्योदये प्रकामतृप्ताः सवृद्धबालाः पुरे पौरा वनेषु च तपस्विनः संचेरुः। तरुणारुणरोचिषा प्रभातेनेव प्रदीपानामपि प्रभा तेन निर्जिता। तज्जन्मोत्सवे सकलष्टंकाराग्रामोऽवृष्टि[1] नष्टधूलिरशर[1] न्निर्मलाम्बरोऽपीतमत्त लोकश्चासीत्। प्रमुदितं बान्धवैः। प्रीतं प्रणयिभिः। चिरात् समुच्छ्वसितमार्यश्रिया। पल्लवितमाम्नायवंशेन[2]। लावण्यपुण्यह्रदेन तेन नितरां प्रीयमाणस्तदीयस्तातः कृष्णनामा त्रिवेदी भूमिहारः[3] स्वं पौनःपुन्येन धन्यममन्यत। राजकीयानुशासनं शिरसा बिभ्राणः खल्वसौ जनताभ्यो बलिं जग्राह। एतावता राज्योपकरणमात्रेण कर्मणा तस्य भूयसी राज्यप्रतिष्ठा ववृधे। सूनोर्दयानन्दस्य जनुषाभिधानं मूलशंकर इत्येवासौ तेने। केचन दयाल संज्ञामपि तस्य शैशवीमुदाहरन्ति। वयं तु मूलशंकरनाम्नैव व्यवहारं साधु मन्महे। इदंप्रथमतया किंचित् संस्कृतमधिजगे मूलशंकरः कृतचूडाकरणादिसंस्कारक्रमः। ततो यजुर्वेदं सस्मार। क्रमेण शैशवमतिक्रामतोऽस्य सेवकैरिवाङ्गावयवैरप्यनुवृत्तिः कृता। तथाहि श्रवणासक्तस्य[4] लोचनद्वयमपि श्रवणसम्मति मकरोत्। उन्नतस्वभावस्य नासावंशोऽप्युन्नतिं जगाम। शङ्खनिर्मलगुणस्य कण्ठोपि शङ्खाकार मधारयत्। पृथुलमते रंसकूटद्वयमपि पृथुलमभूत्। मध्यस्थस्य[5] तस्य रोमराजिरपि मध्ये स्थिता शुशुभे। सुवृत्तस्य[6] बाहूरुयुगलमपि सुवृत्तमभवत्। गम्भीरप्रकृतेर्नाभिरपि गम्भीरा व्यराजत। पल्लवसुकुमारहृदयस्य हस्तचरणैरपि पल्लव-

---

१. वृष्टिं विनैव नष्टा धूलिर्यस्मिन् इति विभावना। एवमशरन्निर्मलाम्बरः, अपीतमत्तलोकः इत्यत्राप्युन्नेयम्। शरदं विनैव निर्मलमम्बरं यस्मिन्। पीतं पानं तद्विनैव मत्तो लोको यस्मिन्। २. आम्नायो वेदः। ३. जागीरदार इति भाषा। ४. श्रवण माकर्णनम्, श्रोत्रं च। ५. मध्यस्थः तटस्थः। ६. वृत्तं वर्तुलं सदाचारश्च।

सौकुमार्यमङ्गीकृतम्। प्रमाणवेदिनो[1] वक्षःस्थलमपि सुप्रमाणमजायत।

शिवरात्रि–घटना

कृष्णाख्यस्तज्जनकः शिवमुपासांचक्रे। शिवपुराणकथां च शुश्राव। प्रायेण बालं मूलशंकरमप्यसौ शिवभागवतः[2] सह निनाय शिवमाहात्म्यं च बोधयांबभूव। एतेन विधिना मूलशंकरोऽपि मूर्तिमति शिवे सुतरां श्रद्दधौ। शिवमुपासीनाः शैवाः शिवरात्रिमत्याद्रियन्ते। दिवसे व्रतयन्तो रात्रौ जाग्रति शिवं च समभ्यर्चयन्ति। गुर्जरदेशे तपोमास[3]–स्यान्धतमसभूयिष्ठा चतुर्दशी तिथिः शिवरात्रिर्जायते। यदा मूलशङ्करश्चतुर्दशवर्षो जज्ञे तदा तत्पिता तं व्रतयितुमियेष। तच्चैवंप्रायातिकुटिलकष्टबहुलं व्रतानुष्ठानं प्रणयप्रवणा प्रसूर्निषेधन्ती[4] प्राह- क्व लघुवया बालः, क्वचेदं कृच्छ्रं व्रतम्। विषमोऽयमुपन्यास इति। तथापि मूलशंकरः स्वयमेव व्रतायानुमेने पित्रा सहैव चेयाय शिवमन्दिरम्। प्राथमकल्पिकं तद् व्रतम्। अतः काचिदुत्कलिका[5] किंचिदाश्चर्यं च मूलशंकरहृदये समुल्ललास। सकलां रजनिं जागरितः सञ्छम्भुं प्रसादयेयमित्येव चकार चेतसि। मध्यरात्रे सत्येव सुषुपुरशेषाः पूजाकरा भक्ताः। मूलशंकरजनकोऽपि निद्रालीढदृष्टिरशयिष्ट। एकाकी मूलशङ्कर एव शङ्करस्य मूलं जिज्ञासमानो जजागार। मिष्टान्नसंपृक्ततया विप्रकीर्णकुसुमतया च शिवलिङ्गमभितः सुरभिरस्फुरत्। सौहित्य[6]–करीभिः पुष्पपरागभाविताभिर्मीनाण्डिकाभि[7]–राकृष्टः कुतोऽपि मूषक एकोऽत्रान्तरे निश्चक्राम। शिवलिङ्गं परितो दन्द्रम्यमाणश्चङ्क्रमणं चक्रे। इतो मूलशंकरोऽप्यनिमिषनयनः सर्वं तद् दृश्यमवलोकयामास।

---

१ प्रमाणं शास्त्रप्रामाण्यम् आयामश्च। २. शिवो भगवान् भक्तिरस्य। ३. तपोमासः माघमासः। ४. प्रसूर्जननी। ५. उत्कलिका उत्कण्ठा। ६. सौहित्यं तृप्तिः। ७. मीनाण्डिका 'बताशा' इति भाषा।

भृशं परिक्राम्यन् आखुश्चतुष्कपीठमारुरोह। तत्र च सुचिरं रुचिरं चिक्रीड। दृष्टोन्दुरुचर्यो मूलशंकरस्तदिदमद्भुतमभूतपूर्वमिवेत्याश्चर्यं प्रपेदे। क्षणमपि न सेहे। भेजे चाधिम्[१]। विस्मयस्तिमितविलोचनोऽवतस्थे। एवं च चिन्तयांचकार-किमेष एव वशी शिवः ? दस्यूनां मानवानां दानवानां वा हन्ता श्रूयते ? येन स्वदूषको मूषकोऽप्येको निराकर्तुं न पार्यते। कैलासमधिवसन्ननु किमेष एव महादेवो यं तातपादा व्याचख्युः ? ग्रावपीठमेव किं वा कैलासव्यपदेशं भजते। किमित्यहमविमृश्यकारी स्याम्। कुतश्चैतदर्थं जागृयाम्। किं च प्रजागरक्लिष्टेन मयोपवासाल्लभ्यम् इत्येवं शङ्कापङ्ककलङ्काङ्कुरः समुदपादि शंकरस्य चेतसि। शङ्कास्रोत[२]—स्विनीस्रोतसा बहुलं प्रसरताऽऽक्रान्तः शान्तोऽप्यशान्तः सम्भ्रान्तश्च स पितरमजजागरत्, चकार च प्रश्नप्रतिवचने। किन्तु न समतुषद् विविदिषन्मनः। चित्तवृत्तिसमाधिसाधनमुत्तरमलभमानः पितरमापृच्छ्य गृहं प्रत्याजगाम। सान्द्रविद्रुम[३]—प्रभाभासि सन्ध्यावसरे विधाय सान्ध्यं विधिं किंचिज्जग्ध्वा पीत्वा च सुष्वाप। शिवमूषकप्रहेलिकाव्युत्थितचित्तस्यैव तस्य सा त्रियामा व्यरंसीत्।

अथ पूर्वाचलस्थलीमधिरोहति निरुद्धान्धतमसे सौगन्धिक[४]—बन्धुनि बन्धूककुसुमारुणे[५] जगत्प्रबोधप्रारम्भमङ्गलकलशेंऽशुमालिमण्डले, क्रमेण प्राच्यां सिच्यमानायामिव बहुलकुसुम्भाम्भःकुम्भैः ककुभि,[६] प्रभवति तारकोच्छेदाय[७] सुकुमारे रश्मिजाले समुत्थाय शुचिर्भूत्वा पितुरन्तिकमयासीत्। पित्रा दत्तमासनं भजमानः पुना रात्रिवृत्तं शिववृत्तमन्वयुङ्क्त। पिता तु व्युत्पत्तिमन्तमपत्यं बुद्ध्वानल-

---

१. आधिर्मानसी व्यथा। २. स्रोतस्विनी नदी। ३. विद्रुमः प्रवालः। ४. सौगन्धिकं कमलम्। ५. बन्धूको बन्धुजीवाख्यो वृक्षविशेषः। ६. दिशि। ७. तारका नक्षत्रम्, तारकासुरश्च। एवं कुमारः कार्तिकेयः, बालश्च।

भूष्णुमात्मानं चार्थसतत्त्वप्रतिपत्तावन्यथाकारमवादीत्—मा पुत्रक! मैवं शिवे भगवति कैलासवासिन्यप्रत्ययं कार्षीः। अतीन्द्रियशक्तिरसौ भगवान्नैवं जडपाषाणविकर्षणेन शक्योऽपकर्ष्टुम्। इत्येवमुपपत्तिविरुद्धं पितृवचनमप्रमेयधीर्मूलशङ्करः प्रत्यहं शृण्वन्नुदासांचक्रे। इत्येका नवजीवनवनोद्याने पुष्प्यन्ती भावकुसुमलतिका। अथापरा—

गृहे मृत्युद्वयदृश्यदर्शनम्

कियतश्चित् कालावधेरूर्ध्वं मूलशंकरो नियतिकृतनियमविलसितममृष्यं मृत्युद्वयदृश्यमपश्यत्। षोडशे वर्षे चम्पकदलावदाततदेहया स्वभगिन्या व्ययुज्यत। अमृत साम्तृत[1]—पदवीमदवीयसी[2]—मुत्प्रेक्षमाणा। सर्वा ज्ञातयो व्यरुदन्। परं मूलशंकरः शिवस्य मूलमन्विच्छन् रोदनं प्रास्मार्षीदिव। स इत्थमचिचिन्तत्—किं नु खलु मरणं नामेति। वाष्पमप्यक्ष्णोरमुञ्चन्निर्विण्णो भवनस्यैकान्ते तिष्ठन् मृत्युतत्त्वं विभावयामास। हायनत्रयादनन्तरं दीर्घदौर्जन्य[3]—दोहदिना दैवेनामृष्टः पितृव्यपादः प्राणानत्याक्षीत्। उन्मीलन्नवनलिनानुकारिणा चक्षुषा प्रेक्ष्य तत् क्षीणं वपुः कनिष्ठतातस्य दन्दह्यमानहृदयः समवर्तत मूलशंकरः। तेन समं दृढः प्रेमस्थेमाभूदिति तन्मरणादशरणमात्मानं मन्यमानो भृशं रुरोद। विचचार चैवम्—गृहं परित्यज्य मृत्योरन्वेषणा कार्येति। अपार्थकमासनम्, वन्ध्यमध्यवसितम्, याचको ब्राह्मण इव निर्वेदः[4] कस्य सन्तोषाय। विषवैद्य इव विषादः[5] सन्देहकारी शरीरस्य। भीमाभि[6]—मन्युनिरुद्धं कुरुबलमिव मनो महान्तं संतापमनुभवति। मूलशंकरजनक-

---

१. अमृतपदवीं मोक्षमार्गम्। २. नातिदूराम्। ३. दीर्घदुर्जनताभिलाषिणा। ४. निर्वेदो दैन्यम्, वेदरहितश्च। ५. विषादो दुःखम्, विषभक्षी च। ६. कुरुबलपक्षे भीम-अभिमन्यु शब्दावुन्नेयौ। मनःपक्षे भीमः भयंकरो यो अभितः मन्युः शोकः तेन निरुद्धम्।

स्तु प्रागेवावेदीद् यन्मदीयः सूनुर्नूनं दूनः कतिपयैरहोभिर्गृहादुदासीन-स्तिष्ठतीति । अतश्चिन्तयांचकार परिणेतव्योऽयम् । स्वयं निगृहीतो भविष्यतीति । इतस्तु मूलशंकरस्यायमभिनिवेशः–काशीं प्रत्येष्यामि तत्र चाध्येष्यामि ग्रन्थानाम् इति ।

गृहाद्बहिः प्रयाणम्

यदा परिणयकालो नेदीयानभूत् तदा प्रकारान्तरमनभ्युपयन् मूलशंकरो गृहाद् बहिः प्रयाणमेव साधीयो निश्चिकाय । अन्य-तरेद्युश्च सति प्रस्तावे[1] बहिरुदक्रमीत् । तदासावेकविंशतिवर्षोऽ-भूत् । अत्रान्तरे शंकरेण द्वे तत्त्वे अवालोकिषाताम् । मूषकाक्रान्ता शिवमूर्तिः, ज्ञातिनिधनं च । आभ्यामेवोभाभ्यां तत्त्वाभ्यां तदीयं ज्ञानचक्षुरुद्बभासे । भव्या बालाः प्रतिवस्तुतत्त्वमाकलयन्ते तथ्यं च मृगयन्ते इति सत्यं जिज्ञासुरसावितस्ततः पर्यटाट्यां चक्रे ।

सिद्धपुरे निग्रहः, निगृहीतस्य पुनरत्यन्ताय गृहपरित्यागो विकटाटवीभ्रमणं च

स्वगृहात् **सायले** ग्राममाप्तोऽयमाप्तेनैकेन ब्रह्मचारिणा ब्रह्मचर्य-व्रतेन दीक्षितः शुद्धचैतन्येत्यभिधानमदम्भं लम्भितः । परिधापितकाषा-यवासाः साधुवासाहतं भिक्षुविडम्बितुम्बीपात्रं ग्राहितश्च । ततोऽयं तेन सहैव योगमभ्यस्यन् कोटकांगडापुरं प्रापत् । ततोऽपि गतोऽयं प्रसिद्धे सिद्धपुरे पुरे समागतो नीलकण्ठमहादेवमन्दिरे स्थिति-मकरोत् । इतस्तु प्रयाते मूलशंकरे गृहेषु कोलाहलः प्रादुरासीत् क्व गतो मूलशंकरः, क्व गतो मूलशंकर इति । तमन्वेष्टुकामस्तज्जनको भृत्यानादिदेश । स्वयं चानुपदी[2] बभूव । कस्याप्येकस्य पुरुषस्यावेद-नात् मूलशंकरस्य प्रद्रुतस्य संकेतो विदितो जज्ञे । सिद्धपुरीये महोत्सवे जनसमवाये संमिलितोऽसौ तदीयपित्रा निजगृहे, निजगृहे चानिन्ये ।

---

१. अवसरे । २. अनुपदी अन्वेष्टा ।

मा स्म यासीत् पुनरित्याशङ्कया रक्षापुरुषा नियुक्ताः। परं मूलशङ्करस्य चेतसि स एव विचारः समुत्पद्यते स्म कथंकारं मृत्योः पारं यायामिति। अथास्तंगते भगवति सवितरि, जाते जरन्महिषकायकालकान्तिकाशिनि निशावतारे, अतिसंभ्रमभ्रमद्भ्रमरनिकुरम्ब[1] इव प्रधावति दूरं तिमिरपटले, तरुणतमालकाननमिव, अञ्जनगिरिगुहागर्भमिव, इन्द्रनीलमणिमहामन्दिरोदरमिव विशति सकलजीवलोके कृतनिश्चयो मूलशंकरः प्रहरिणां चक्षुर्विक्षेपमत्यन्ताय प्रदुद्राव। भृशमन्विष्टोपि शिवपथं प्रविष्टो न संकेतं ददौ। अनधिगतप्रवृत्तिरेवासौ वीतरागवृत्तिरासीत्। अभिनवयौवनारम्भरमणीये वयसि वर्तमानो मूलशंकरस्तृणीकृतस्त्रैणविषयरसो बहिः प्रयातः। अपत्यमत्यन्तसमृद्धस्य महानुभावस्य। नेदानीं यावद् बहिर्गृहाद् अन्यत्र गतोऽभूत्। कामं बहिर्गमनमसौ कृतवान् परं ज्ञानसरणिरमसृणाऽप्रगुणा चास्तीत्यविदितमेवासीत् तस्य सर्वोपधाशुद्धबुद्धेः। क्वापि साधुभ्नुवैरसाधुभिर्बाधितः साधितश्च। क्वचन वञ्चकैर्वञ्चितो लुञ्चितश्च। क्वापि लुण्टाकैर्लुण्ठितः कुण्ठितश्च। क्वचन मूषकैरिव मोषकैर्मुषितश्चित्तं दोषितश्चासौ प्रोषितः। अणकपणकमपि[2] तदा तदन्तिके नावर्तत। क्वापि रजनीमजीगमद्रहः, क्वापि चाहः। वेपथुश्च चेतसि पुनर्मा निग्राहिषीति। चिररात्राय तत इतो बभ्राम। कुत्राप्यरण्यं शरण्यं कृतवान्। क्वाप्यपरिमितपतन्निर्झरजलतुषारस्पर्शमञ्जरितपादपपुष्पपरिमलमिलन्मधुकरझङ्कारमधुरान्, अमन्दमृदुशाद्वलान्, जलस्थलीप्रदेशान्, क्वचन गरलतरलव्यालावलीवलीढ[3]—स्नीढ[4]—मलयज[5]—संकुलवकुलबहुलजंगलमालाविशालभयशालिशैलशिलाः समुल्लङ्घयन्, क्वचन तरुखण्डे गण्डकण्डूयनानि विदधतः पल्लवांश्च कवल-

---

१. निकुरम्बं समूहः। २. अणकं कुत्सितम्। ३. व्यालाः सर्पाः। ४. स्नीढं स्निग्धम्। ५. मलयजं चन्दनम्।

यतो वन्यश्वापदानवलोकयन्, अतिचपलकपिकुलान्दोलिततरुशिखराग्रगलितशिलास्फालनस्फुटत्फलरससुगन्धिना स्रवत्कुसुममकरन्दद्रवार्द्रीकृतपांसुपटलेन वर्त्मना विद्यार्थी प्राचालीत्।

योगविद्यापरिशीलनायोत्तरभारतगमनम्

गुर्जरदेशादहमदाबादं, ततश्च बडौदामटन्, चेतनमठे मठन् ब्रह्मानन्दादिब्रह्मचारिभ्यो वेदान्तशास्त्राण्यध्यगीष्ट। अनवरतमज्जद्वनगजमदामोदसुरभिततरङ्गामपरगङ्गामपरसागरराजमहिषीं समुत्तीर्य भगवतीं मेकलकन्यकां,[1] सम्फुल्लपल्लवितकक्कोल[2]—सल्लकीसरलसालसर्जार्जुननिम्बकदम्बजम्बूस्तम्बोदुम्बर—खदिरकरञ्जाञ्जनशोभाञ्जनप्रायैस्तरुभिराकीर्णाम्, अभिमतं मतङ्गजानां, शिशिरतरं तरङ्गानिलैः, समुल्लङ्घ्य च दक्षिणं नर्मदातीरपुण्यारण्यम्, अर्वलीशिलोच्चयं ततश्चोत्तरं भारतं वर्षं प्रयातो मूलशंकरः। गगनवीथीमिव सिंहराशि[3]—राजिताम् उत्पतङ्गाम् उत्थितवृश्चिकां च, छन्दोजातिमिव शार्दूल[4]—विक्रीडितमनोहरां हारिहरिणीमन्दाक्रान्ताम् अनवरतवसन्ततिलकोद्भासितामतिविचित्रचम्पकमालां च, सीतामिव बहुकोट[5]—रावणावृतामुत्पन्नकुशलवां चारण्यानीमवगाहमानस्यास्य मध्येमार्गं नवतमालनील-

---

१. नर्मदाम्। २. कक्कोल-सल्लकी-सरलादयो वृक्षविशेषाः। ३. गगनवीथीपक्षे सिंहवृश्चिकौ राशिभेदौ। पतङ्गः सूर्यः। अन्यत्र पक्षी। ४. छन्दोजातिपक्षे शार्दूलविक्रीडित—हरिणी—मन्दाक्रान्ता—वसन्ततिलका-चम्पकमाला-शब्दा उन्नेयाः। अरण्यानीपक्षे शार्दूलानां विक्रीडितेन मनोहराम्। हारि सुन्दरं यथा स्यात् तथा हरिणीभिर्मन्दमाक्रान्ताम्। वसन्ते तिलकवृक्षैरुद्भासिताम्। अतिविचित्रचम्पकपुष्पलतामालायुक्ताम्। ५. सीतापक्षे बहुकोटेन अतिकुटिलेन रावणेन वृताम्। कुशलवयोः सुतयोरुत्पादयित्रीम्। अरण्यानीपक्षे बहुकोटरं यद् वनं तेन वृताम्। कुशो दर्भः, लवः किञ्जल्कः तेषामुत्पादयित्रीम्।

द्युतिर्महर्क्षो[1] हर्यक्ष[2] इव सम्मुखीनोऽभवत्। घनतरकण्टकाकीर्णशीर्णशाखिशाखाजालजटिलेषु विलम्बिततनुरतनुनिबिरीस[3]-प्रतानिनीप्रतानेषु सरीसृप इवायमसृपत्। कुटिलकण्टकाविद्धविग्रहो जातः। अतिशिशिरहिमशीकरनिकरावसन्नं पादतलम्। आरण्याः शाकमूलादय एवाशनायां[4] शमयितुं सुलभा अभूवन्। एवमपसरन् मार्गान्[5] मार्गान्, नीवारीणि[6] वारीणि, सहंसनिनदान् नदान्, सकरेणु[7] रेणुस्थलम्, आच्छादितदिशि खराणि[8] शिखराणि लङ्घमानो रंहसोच्चावचानि कष्टान्यनुभवन् नानास्थानेषु पर्यटीत्। पाणिनिरिव सोऽयं कुमारः[9] श्रमणादिभिः, युवा खलतिपलितवलिनजरद्भिस्तत्तत्पुरुषैः समस्यमानो यौगिक[10]शब्दसमस्यां साधु समाधित्सुः परिबभ्राम। विद्योपलब्धये मृत्युक्लेशपरिजिहीर्षया च वनं भवनमिव, गुरुगृहानिव गिरिगुहाश्चामन्यत। यत्र क्वापि कस्यापि महात्मनो नामधेयं श्रुतवान् तत्रैव विस्मृतान्यकार्यो गतवान्। येन केनाप्युपायेनोपेयिवान् गुरुभ्यो विविधा विद्या अधिगतवान्। योगविद्यायां तु विशेषेणाहतोऽभूत्।

संन्यासदीक्षा, दयानन्देति संज्ञाकरणं च

चाणोदकल्याणपुरे कल्याणमतिरयं दाक्षिणात्यं कंचन

---

१. महान् ऋक्षः 'रीछ' इति भाषा। २. सिंहः। ३. निविडलताकुञ्जेषु। ४. अशनाया बुभुक्षा। ५. मृगसम्बन्धिनः। ६. नीवारा व्रीहयः विद्यन्ते येषु तानि नीवारीणि। ७. करेणुर्हस्ती। ८. कठोराणि। ९. पाणिनिपक्षे कुमारः श्रमणादिभिः, युवा खलतिपलितवलिनजरद्भिरिति सूत्रं तत्पुरुषसमासश्चोन्नेयः। प्रकृतिप्रत्ययादियोगेन सिद्धाः शब्दा यौगिकाः। दयानन्दपक्षे युवा कुमारः श्रमणादिभिः बौद्धभिक्षुप्रभृतिभिः। खलतिः खल्वाटः, पलितः जराजनितशुक्लकेशः, वलिनः वलिसंयुक्तः, जरन् वृद्धः इत्यादिभिस्तत्तत्पुरुषैः संगच्छमानः। १०. योगशास्त्राय प्रभवति यौगिकः ताहशशब्दसमस्याम्।

स्वामिनं गुरुरित्यभ्युपगम्य संन्यासदीक्षामग्रहीत्। ततः प्रभृत्येव मूलशंकरो दयानन्दसंज्ञयाऽऽख्यायत। पूर्णानन्दः सम्यक्चारित्रः साधुः पूर्णमानन्दं प्रददद् दयानन्दसंज्ञोदयं चकारेति श्रूयते। शंकरमूलमन्वेषिषिषुः[१] सम्प्रति दयानन्द एवास्मद्वाचां विषयः। येन खलु भारते वर्षे दयामानन्दं चोद्भावयता स्वीयं दयानन्द इति नाम कृतार्थीकृतम्। सहृदयाः! प्रेक्ष्यतां स्वामिनो यूनो दयानन्दस्येदानीं सर्वाङ्गीणोऽभ्युदयः।

अथ नानास्थानेषु परिभ्रमन् दयानन्दो नानासंन्यासिभ्यो ब्रह्मचारिभ्यश्च नानाशास्त्राण्यार्षाण्यनार्षाणि वाधीयानो द्वादशोत्तरैकोनविंशतिशततमे वैक्रमाब्दे हरिद्वारे प्रवर्तिष्यमाणकुम्भमहोत्सवसंमेलने संमिलितोऽभूत्। तत्रैव चण्डीपर्वतारण्येषु विहरन् योगाभ्यासं व्यतानीत्। ततो हिमाचलप्रदेशविभागान् हृषीकेश-केदारघाटोत्तरकाशी–तुङ्गनाथ–गङ्गोत्तरी–प्रभृतीन् ससंभ्रमं बभ्राम। यत्र तत्र तान्त्रिकाणां संन्यासिब्रुवाणामश्लीलाः पाखण्डलीला निभालयन् उच्चनीचसंसारव्यवहारे संसरन् न क्वापि शान्तिमलभत। अनेकेषां विदुषां महानुभावानामीक्षणोत्सङ्ग[२]-सङ्गजनितं लाभमनुभवतोपि न तस्य तुतोष मनः। तत्र कारणं केवलं शिवरात्रिप्रहेलिकाया अप्रशमनमेव। न कोऽप्येवंलक्षणो विचक्षणो दृग्गोचरीभूतो यः शिवरात्रिविषयिणीं तदीयामेषणां मनसः शमयितुमलंकर्मीणः[३] स्यात्। तस्मिन् काले पुस्तकानां मुद्रितानामभाव एवाभूत्। ग्रन्थमुद्रणमल्पप्रचारमेवादृश्यत। अद्यत्वे तु मुद्रितपुस्तकानां सुलभत्वान्नास्ति काठिन्यम्। तदानीं लेखबद्धं पुस्तकं यदि कस्यापि पार्श्वे संभवति स्म तर्हि स तन्निगूह्य सप्तम्यां कक्ष्यायां स्थापयति स्म। स्वापतेयविहीने[४] परिव्राजि दयानन्दे क्वेयती

---

१. अन्वेष्टुमिच्छुः। २. उत्सङ्गः क्रोडः। ३. अलंकर्मीणः समर्थः। ४. स्वापतेयं धनम्।

शक्तिर्यतोऽसौ पुस्तकं लभेत । मूल्यादपि लब्धुं नालम् । लेखितुं च नापपारत् । तथापि तेनाध्ययने कियत् परिश्रान्तमिति वयमनुभवितुमपि न शक्नुमः ।

शव-परीक्षणम्

एकदोत्क[१]—कादम्बकदम्बचुम्ब्यमानाम्बुजराजिरजोरञ्जिताम्भसि गङ्गासरित्तीरे समुपविष्टः पुस्तकमेकं पठन् दयानन्दो मानवशरीरस्नायूनालोचयन्नासीत् । अञ्जसाऽसमञ्जसं[२] पौर्वापर्यविपर्ययं पुस्तकेऽनुभवन् व्यचीचरत् । बहुधा विचार्यमाणेऽपि यदा न किंचिद् बुबुधे तदा किं कर्तव्यमिति व्यामुह्यत् । तत्र व्यतिकरे शवमेकं नीरे प्रवहन्तमालुलोके । अपहृतवसनो बद्धकौपीनश्च भूत्वा निम्नगायां[३] कूर्दनं चकार । हस्तेनामृश्य मृतशरीरं तीरोपान्तभूमौ निधाय च्छुरिकया तद् विदारयितुमारेभे । कुशलो भिषगिव हृदयं ददर्श । यकृत् निकृत्तं शिरश्चोत्प्रेक्षांचक्रे । पुस्तकलिखितं वृत्तमंशतोपि तत्र शवे दृश्ये नादृश्यतेत्यचित्रीयत । तदानीमेव तत्पुस्तकं सद्यो नद्यां चिक्षेपाक्षेपभूयिष्ठम् । चकार चैवं चेतसि पुस्तकानां याथार्थ्यनिर्णयोऽप्यनुभवसव्यपेक्षः । न केवलं ग्रन्थावलोकनमात्रेणैव सन्तोष्टव्यम् । चतुरेणानिच्छताप्यच्छमतिना स्वयं परिच्छेत्तव्यं[४] वस्तुतत्त्वम् । विद्यालाभाय विज्ञानविवृद्धये च कुणपविदारणमपि[५] धर्मसीमानं नातिक्रामति । न चाधर्मपक्षनिक्षिप्तं भवतीति ।

मथुरायां विरजानन्दगुरोः समीपे गमनमध्ययनं च

एतावतापि यदा विज्ञानकुसुमलतिका नोल्लसिता, शिवरात्रिघटनासंकटो ग्रन्थिश्च यथापुरं[६] जटिल एवासीत् तदा चिन्तासन्ता-

---

१- उत्काः उत्कण्ठिताः ये कादम्बाः कलहंसाः तेषां कदम्बः समूहः । तेन चुम्ब्यमाना या अम्बुजराजिः कमलपंक्तिः तस्या रजसा रञ्जितम् अम्भः पानीयं यस्य । २- अञ्जसा शीघ्रम् । ३- नद्याम् । ४- विवेक्तव्यम् । ५- कुणपः शवः । ६- पूर्ववत् । पुरा अनतिक्रम्य ।

नवितानैकतानः श्रीमान् दयानन्दो मनागपि शर्म न लेभे। कुतोऽपि व्यज्ञायि मथुरापुर्यामेको बाह्यचक्षुर्विहीनोऽप्यन्तःप्रज्ञाचक्षुर्विधूतपाप्मा स्वामी विरजानन्दसंज्ञया प्रतीतः प्रतिवसतीति। वेदं व्याकरणं चासौ विद्वानिति ख्यातिं गतोऽभूत्। मनस्येवं विचारः संचचार- अवश्यं प्रेक्षणीयोऽयं महानुभावः। तच्चरणकमलदर्शन-स्पर्शनयोः का हानिः। तेनैव मदीयो मनोरथश्चेत् पूर्येत, को जानाति। सम्प्रधार्यैवं सप्तदशोत्तरैकोनविंशतिशततमे वैक्रमाब्दे मथुरामभिप्रतस्थे। शमनस्वसुस्तीरे[१] गत्वा कलिकालकल्मषमुषः श्रौतपक्षपुषो विदुषो दण्डिनो द्वारं प्रत्यपद्यत।

विरजानन्द-वर्णनम्

दण्डी स्वामी विरजानन्दः स्वाध्यायप्रवचनाभ्यां समयं गमयन् निजं ब्राह्मण्यं सफलयति स्म। कोमले महसि,[२] चरमे वयसि, वृद्धे तपसि, पृथुनि यशसि, गुरुणि श्रेयसि वर्तमानः, सदः[३] सदाचाराणाम्, आश्रयः श्रुतीनाम्, मही महिम्नः, प्रपा कृपारसस्य, क्षेत्रं क्षमाङ्कुराणाम, पात्रं मैत्रीसुधायाः, प्रासादः प्रसादस्य, सिन्धुः साधुतायाः। यस्य चानश्लीलं शीलम, अनाहार्यमौदार्यम्,[४] अवञ्चनं वचनम्, अस्मयं[५] स्मितम्, अविचारगोचरं गाम्भीर्यम्। यस्मिन् व्याकरणे च प्रकृतेः[६] परः प्रत्ययः। परः सन्निकर्षः संहिता वर्णा-

---

१- शमनस्वसा यमुना। २- तेजसि। ३- स्थानम्। ४- अकृत्रिमम्। ५- अगर्वम्। ६- व्याकरणपक्षे प्रकृतिः धात्वादिः ततः परः प्रत्ययो भवति। वर्णानां परः सन्निकर्षः संहितोच्यते। बन्धने चर्षौ इति सूत्रेण हृदयशब्दादाकाङ्क्षितो यत् प्रत्ययो हृद्यमिति रूपं निष्पादयति। विरजानन्दपक्षे प्रकृतेः प्रजानां परः उत्कृष्टः प्रत्ययः विश्वासः। वर्णानां ब्राह्मणादीनां परः परमः सन्निकर्षः सम्प्रयोगः संहिता यजुर्वेदादिः सम्पद्यते। संहिताध्ययने चत्वारो वर्णाः सातिशयं सन्निकृष्टा भवन्तीत्यर्थः। सद्गुणैर्हृदयस्य बन्धनकारके यत्र ऋषौ विरजानन्दे यत् किंचिदपि प्रत्ययत्वेन विश्वस्ततया काङ्क्षितं तदेव हृद्यं सुन्दरं सम्पन्नम्।

नाम्, । सद्गुणैर्हृदयस्य बन्धने चर्यां यत्र यत्प्रत्ययत्वेनाकाङ्क्षितं तदेव हृद्यं भवति । येन मुनिना पाणिनिनेव कृतः समर्थः७ पदविधिः स्त्रीशूद्रं यावदवधारणे वेदमन्त्राणां नित्यमव्ययीभावमापन्नः । मनुष्यसमाजद्वन्द्वे शूद्राणामनिरवसितानामप्येकवद्भावः । यश्चापथं८ नपुंसकमिव सगर्धं चर्द्धं नपुंसकं मत्वा पाणिनिरिवैकदेशितत्पुरुषेण सह समस्य समस्कार्षीत् ।

गुरुशिष्यालापः

पुरोवस्थितं दयानन्दमुद्वीक्ष्येन्दुदर्शनेनेव कुमुदं विरजानन्दनयनं कमप्यानन्दमनुभवदुदलासीत् । ततस्तयोरेवमभूदालापः—

दण्डी– कस्त्वं भोः ! किमर्थमत्रागतोसि ।

दयानन्दः—भगवन् ! मां दयानन्द इति भणन्ति जनाः । सत्यशास्त्राण्यधिजिगांसुः श्रीमदन्तिकमागतोस्मि ।

दण्डी—इतः पूर्वं किमध्यगायि तत्र भवतेतस्ततः परिभ्रमता ?

दयानन्दः—स्वामिन् ! अहं सारस्वतसिद्धान्त कौमुद्यादीन् ग्रन्थान् व्याकरणेऽध्यगीषीति ।

७- पाणिनिपक्षे समर्थः पदविधिः, यावदवधारणे इति सूत्राभ्यां नित्यमव्ययीभावः समासो भवति । द्वन्द्वसमासे च शूद्राणामनिरवसितानामिति सूत्रेणैकवद्भावो विधीयते । विरजानन्दपक्षे येन स्त्रीशूद्रं यावद् वेदमन्त्राणामर्थावधारणे कृतः समर्थं शक्तः पदविधिः स्थानविधानं नित्यमव्ययीभावमविनाशित्वमापन्नः । अबहिष्कृतानां शूद्राणां तन्तुवायादीनां च मनुष्यसमाजयुगले खल्वेकवद्भावः ऐकरूप्यमव्ययत्वमापन्नः ।

८- प्राणिनिपक्षे अपथं नपुंसकम् । अर्धं नपुंसकम् इति सूत्रे । अर्धं नपुंसकमित्यनेन चैकदेशितत्पुरुषसमासो विधीयते । विरजानन्दपक्षे यः अपथं कुत्सितं मार्गं नपुंसकं मत्वा गर्वेन लोभेन सहितं च ऋद्धं समृद्ध पुरुषमपि नपुंसकं मत्वा समानदेशयुक्तेन तस्य पुरुषेणान्येन सह संगमय्य तं सगर्धमृद्ध पुरुषं समस्कार्षीत् शोधितवान् ।

दण्डी—एते खल्वनार्षा ग्रन्थाः। निरर्गल[१]—खलस्खलितकपोलकल्पनाकल्पिताः शुद्धसंकल्पेन त्वया प्राग् द्राग् व्युदसनीयाः। दूरतः परिहार्याः। यमुनायां प्रक्षेप्याः। तत ऊर्ध्वं मदन्तेवासी भवितुमर्हसीति।

दयानन्देन सहर्षवर्षप्रकर्षं तद्दूरीकृतम् दूरीकृतं चानार्षं तदखिलं ग्रन्थजातं विनिन्द्यमनिन्द्येन कालिन्द्यां प्रक्षिप्य। दण्डिस्वामिना तदात्व एवासौ विशिष्य स्वशिष्यत्वेन कल्पितः। लब्धप्रतिष्ठस्य परमेष्ठिनिष्ठस्य श्रेष्ठमतेर्विरजानन्दयतेः स्वविद्याविहारमन्दिरे परिनिष्ठित एष नियमः स्पष्टो निर्दिष्ट आसीद् यत् स संस्कृतव्याकरणस्यानार्षान् सारस्वतसिद्धान्तकौमुदीमनोरमाप्रभृतीन् ग्रन्थान् स्वविधेयैर्विनेयैस्त्याजयित्वा केवलमृषिप्रणीतान् अष्टाध्यायीमहाभाष्यादीन् ग्रन्थानेव तानध्यापयांबभूव। इत्थं च कामयांबभूव मा स्म कश्चनाप्यनृषिभाषितदूषितपुस्तकान्यधिजिगांसतेति। उक्तं नियममनुसृत्य कृत्यविद् विरजा विरजानन्दो दयानन्देनाप्यनार्षान् सदोषानवकर्ष्य[२] मोहग्रन्थीनिव ग्रन्थान् अकदर्थितकदर्थितसमर्थनाय तदानीमेकत्रिंशता रूप्यैराप्यं महर्षिपतञ्जलिप्रणीतं महाभाष्यं नाम मूर्धाभिषिक्तं पाणिनीयव्याकरणग्रन्थमानाययत्। विरजानन्दयतेस्त एव विद्यार्थिनः शिष्या भवितुं शक्नुवन्ति स्म ये निजभोजनाच्छादनादिनिर्वाहविषये निश्चिन्ताः संभवन्ति स्म। यतः शरीरयात्रायाश्चिन्तया सत्रा मात्रयापि छात्राणां शास्त्रसत्त्रस्य[३] सुतरामसत्कल्पनापात्रत्वात्। दयानन्दस्य तूच्चशुच्याचारप्रमुदिताभ्यां श्रीदुर्गाप्रसादक्षत्रियामरलालौदीच्याभ्यां सज्जनाभ्यां

१- निरर्गलाः उच्छृङ्खलाः ये खलाः दुष्टाः तेषां स्खलितौ यौ कपोलौ ताभ्यां कल्पनाभिः कल्पिताः। मिथ्याप्रपञ्चरचनाञ्चिता इत्यर्थः।

२- विरहय्य। ३- शास्त्राध्ययनस्य।

भोजनाच्छादनादिसंविधानं महितं विहितम् । संविहितकशिपुरेष[1] वशी गुरुनिदेशवशंवदो निरतिशयं विद्याविषयं बाढमवगाढुमारेभे। व्रती दयानन्दः शिष्यो विशिष्य विरजानन्दस्य सेवायां सर्वदा दत्तचित्तोऽवर्तत । तत्सपर्यायाः पर्यायेण स पर्यवेक्षणं चकार । नित्यं स्नानं, सन्ध्यां, योगाभ्यासं, भ्रमणं, व्यायामादिकं चानुष्ठाय निष्ठया नियमेन गुरोः स्नानार्थं विमलं कालिन्दीसलिलं स्वयमाहृत्यासौ संनिधत्त स्म । तस्यादेशवशंवदत्वेन, सेवया, शुश्रूषया चमत्कारिण्या हृदयहारिण्या प्रतिभया चाकृष्टो हृष्टस्तुष्टश्च दण्डी स्वामी दयानन्दायात्यन्तायास्निह्यत् । दण्डिस्वामिनः स्वभावः परमतिकोपनोऽभूत् । अतः कारणादसावल्पीयस्यपि कारणे बहुधा दयानन्दमतिकठोरमददण्डत् । परं दयानन्दश्चण्डनस्यापि दण्डिनस्तद्दण्डनं मण्डनमेवामन्यत । न हि तेन हितेन तेनात्मापमानोऽमानि मानिनापि सता ।

गुरुप्रसादः

एकदा दयानन्देनाश्रमभवनं प्रमार्ज्यैकत्र स्थापितेऽवकरनिकरेऽकस्मादागन्तोर्दण्डिनः पादः पतितः । तावतैव नितान्तमशान्तः क्रुद्धो दण्डी विरुद्धो भूत्वा दयानन्दस्यान्तेवासित्वं पर्यहार्षीत् । रुष्टः पुष्टे तद्वपुषि चानिष्टं यष्ट्या क्रूरं प्राहरत् । विद्वदग्रगण्योपि साधारण्यानया घटनयैव स कटुवचनपाटवं प्रकटयन् निजनैकट्यं तस्य व्यघटयत् । परं परिणामे गुरोर्मृदुलतां वत्सलतां च विदन् दयानन्दः साबाधमपि निजापराधं तत्समक्षमक्षमापयदेव । श्रीविरजानन्दः स्वामी दयानन्दं स्वकीयं परमं प्रियं प्रतिभावन्तं नूत्नं शिष्यरत्नमनुभवन्नुल्ललास । स खलु दयानन्दस्याप्रतिहतामतर्कितां च तर्कशक्तिं सूदर्कां तर्कयन् अकर्कशामिमां वाणीमभाणीत्-

---

१- विहितभोजनाच्छादनव्यवस्थः । भोजनाच्छादने सद्भिरुभे कशिपुरुच्यते ।

प्रिय दयानन्द ! त्वया सह को विवदितुमर्हेन्नाम। न कोपीत्यहं मन्ये। त्वं तु साक्षात् कालजिह्व एवासि। यथातिकरालः कालः सर्वान् कालयति चालयति च तथैव त्वत्तर्कोऽप्रतर्क्योऽजेयोऽविगेयश्च विलसतीति। एवं स कालजिह्व इत्याह्वया तमाह्वयत्।

दयानन्दस्य स्मरणशक्तिरतिप्रबला तीव्रसंवेगा चासीत्। सकृद् द्विर्वा श्रवणमात्रेणैव स पाठं स्मृतिविषयीकर्तुमलमवर्तत। तद्धारणाशक्तिकारणादेव गुरुर्विरजानन्दस्तस्मिन् नितरां प्रासीदत्। एकदाष्टाध्याय्याः काचन प्रयोगसिद्धिरेवंभूता क्लिष्टा म्लिष्टा श्लिष्टा चोपस्थिता भूता यानुभूतापि पठितपाठस्य स्वनिवासस्थानमुपेतस्य दयानन्दस्य स्मृतिपथादतीता जाता। पुरा कदापि नैवं समजनि। अतः स्वयमेवासौ तेन दुरुच्छेदं खेदमनुबभूव। अन्ततः श्रीगुरुचरण-सरोजसमीपमुपेत्य प्रणतेन तेनानुदितबुद्धिना सा प्रयोगसिद्धिः पृष्टा। विरजानन्दस्तु सकृदेव पाठं पाठयति स्म। न क्रियासमभिहारेण। पाणिनिरिवासावाम्रेडितं[1] पाठं भर्त्सन एव प्लावयति स्म। अतः कारणाद् भर्त्सयमानस्तमसावाह स्म-गम्यतामितः स्वतः पाठं स्मृत्वा-गम्यताम्। न वयमेकमेव पाठं पुनः पुनः पाठयतुमिह मठामः इति। द्व्यहं त्र्यहं वा दयानन्दस्तत्प्रयोगसिद्धये विरजानन्दं प्रार्थयामास महाराज ! भवतानुकम्पां सम्पाद्यैकवारं पुनस्तं कठिनं पाठं पाठ्योऽहं निःशाठ्यः। अहं सकलं बुद्धिबलं प्रयुक्तवानस्मि। परन्तु किंकुर्यामार्य ! स पाठः स्मृतिपदवीमेव नारोहति। दयानन्देनात्यर्थं विनयगाथयानुनाथितोपि गुरुस्तं पाठं पुनर्नापीपठत्। पर्यवसाने

१- 'आम्रेडित भर्त्सने' इति पाणिनिसूत्रेण भर्त्सनविषये ह्याम्रेडितस्य प्लुतः स्मर्यते तद्वद् विरजानन्दोप्याम्रेडित पाठं पृच्छन्तं शिष्यं भर्त्सयन्नेव विप्लुत करोति स्म। आम्रेडितं पाठमसौ न पाठयति स्मेत्यर्थः।

चाक्रोष्टा रुष्ट इव विरजानन्दो दयानन्दमभ्यधात्-त्वं मया सकृदेव चोद्यं चोदितः। यावत् पूर्वाधीतं पाठं स्मृतिपथोपनीतं कृत्वा मम न श्रावयिष्यति तावदग्रिमः पाठो न भविष्यति। इदानीं पुनस्त्वामहं स्थाने[1] ब्रवीमि यद्येष दुरभियोगः प्रयोगस्तव स्मृतिपथं नागच्छेत् तर्हि स्वच्छे यमुनाकच्छे यथेच्छं गत्वा निकामं तत्र जले निमज्जनीयं, न तु सावज्ञं निर्लज्जेन सतेह प्रतिनिवृत्य मया व्यासज्य वर्तनीयम्। अध्यापितपाठश्रावणं विना नोपस्थानीयोऽह-मिति भावः। दयानन्दस्त्वगतिकगतिः श्रीगुरुचरणकमलममलं संस्पृश्य ततः प्रस्थितः। विश्रामघट्टस्य समीपे सीताघट्टशिखरमधि-रुह्य विस्मृतिशय्यामधिशय्य शयानं तं प्रयोगं संशयानोऽसौ प्रसह्य स्मृतिपथमुपनेतुं बलवन्निजललाटतटमाटिटन्। तदानीं तेन प्राणाः पणाः प्रणत्वेन पेणिरे। यद्यद्य प्रदोषं यावन्निर्दोषोपि सदोषः कृतधीप्रमोष कठिनानुयोगः स प्रयोगो मम स्मृतिपदवीं नारोक्ष्यति तर्हि सरोषोऽहमसन्तोषपोषं पुष्णन्ननश्नन् अवश्यमेवेह शमनस्वसुर्य-मूनायाः पाथसि निपत्य मङ्क्षु निमङ्क्ष्यामि विनङ्क्ष्यामि च। नश्वरं निजकलेवरं मकरादिजलचराणामाहारं संपादयिष्यामि। इत्येतां भीषणां सन्धामनुसन्धाय विस्मृतप्रयोगस्मरणायैतावान् प्रयत्नशीलो निमीलत्प्रमीलो हृदि निखातखेदकीलोऽवहितचेता उदग्र एकाग्रोऽभूद् यथा देशकालावपि न पर्यजानात्। स्वदेहाभ्यासमपि व्यस्मार्षीत्। स्वप्नावस्थामिव प्रपेदे। इत्थं तथ्यं स मत्या प्रत्यैद् यथा मन्ये कश्चिन्मनुष्योऽदृश्य एव दीघदीर्घतरां सुतरां प्रयोगसिद्धिं साधु सिद्धां बुद्धौ प्रसिद्धां शुद्धामद्धाऽध्यापयन् श्रावयतीति। यदा स सकलामविकलां प्रयोगसिद्धिमश्रौषीत् तदोपजातचेतनः सुप्तोत्थित इव संजज्ञे। भृशं हृष्यन् प्रसन्नतापारावारपारमेतुं नापपारत्।

१- युक्तम्।

प्रधावन्नेव गुरुचरणान्तिकमयासीत् । उपक्रमप्रभृत्यपवर्गपर्यन्तमखिलां तां सिद्धिं साधीयः शुद्धामशिश्रवत् । आश्रवस्य[२] दयानन्दस्य कृतलक्ष्यनिर्धारणां धारणामनुकार्यं धैर्यं च निभाल्य गुरुर्गुरुवात्सल्यात् प्रेमपुलकिततनुरजायत । सहर्षमश्रुवर्षमवर्षत् । अकुण्ठोत्कण्ठया कण्ठे परिष्वज्य भूरि भूरि पूरिताह्लादः शुभाशीराशिभिस्तमभ्यषिञ्चत् । ततः प्रभृति दयानन्दो यदा कदापि पाठं प्रस्मरति स्म तदैव समाधिस्थो भूत्वा तं स्मृतिविषयीकरोति स्म ।

गुरुदक्षिणा

नियमवान् दयानन्दः सार्धं वर्षद्वयं यावद् यथावद् विरजानन्दगुरोरमले चरणकमले शरणीकृत्य तन्निषेवणप्रवणः प्रवीणधिषण[३]-तयाकष्टमष्टाध्यायीमहाभाष्यवेदान्तसूत्राद्यनेकानीष्टानि शिष्टानि विशिष्टानि शास्त्राण्यध्यैष्ट । तत्प्रसादादासादितात्मप्रसादस् तत्सकाशात् प्रकाशितहृदयाकाशः स्वप्रतिभाविभाविभासितमतिराभात् । सद्यो ह्यानवद्यविद्याविद्युदुद्द्योतद्योतितो विदिद्युते । एवं विनयोपपन्नो व्युत्पन्नधीरुत्पन्नबोधोऽयं प्रसन्नः सन्नासन्नं गुरुमुपसन्नोऽध्ययनावसाने तद्दक्षिणां दित्सन्नाह स्म— भगवन् ! प्राच्यार्षशास्त्रपारावारपारदृश्वनाऽत्रभवता भवताहमतिदुस्तरविस्तरशास्त्राकूपारपारं[४] तारितोस्मि । तेन सर्वथा कृतार्थः सम्पन्नोऽहं श्रीमन्तं मतिमन्तं सन्तं साधुचर्यं गुरुवर्यमुच्चैरुच्चार्य सत्कार्यमाचार्यमतितमां धन्यं वदामि । धन्यं चात्मानं मन्यमानः प्रसीदामितमाम् । तत्र भवताचार्यवर्येण साध्वीं विद्यामध्यापयता मयि या महत्यनुकम्पा सम्पादिता तस्या आनृण्यं गन्तुं पुरुषायुषेणाप्यनलंकर्मीणोस्मि । तथापि रिक्तेन पाणिना नोपस्थानीया गुरव इति प्राचीनान-

---

२- वचनेस्थितस्य । ३- धिषणा बुद्धिः । ४- अकूपारः समुद्रः ।

पाचीना[1] चार्यावर्तीयार्यमर्यमर्यादा । अतोऽध्ययनपरिनिष्ठायां सत्यां सनिष्ठं सप्रतिष्ठं चेष्टं शुभाशीराशिमन्तिममादातुं श्रीमदन्तिकमुपेयिवान् अहमिमानि श्रद्धाभक्तिभावभरितानि भवत्पुण्यचरितानीवाचरितानि सातिशयं प्रियाणि कानिचिद् वेदाङ्गकानीव लवङ्गकान्युपायनीकरोमि । प्रीत्या ग्राह्यमिदमुपग्राह्य[2]-मार्येण गुरुवर्येणेति । इत्यभिधाय कांस्यपात्र्यां निधाय च तानि गुरुचरणयोरार्पिपत् ।

पुनरपि विनयग्राही प्राञ्जलिः प्रणतश्च सप्रणयं समुचितां वाचमेवमवोचत्-— अयि मम मन्दभागधेयस्योन्नायक ! भाग्यविधायक ! शिक्षादायक ! नित्यसहायकाचार्यवर्य ! कोटिशः प्रणमामि भवन्तम् । मह्यं स्निह्यन् गुणगृह्यो भवान् यन्निःसीमेनानुग्रहेणानुगृह्य सद्वेदविद्यानिध्यभिप्रायं प्रायः प्रायच्छत् तदर्थं मदीयमन्तःकरणं भवन्तं प्रति निरतिशयं भक्तिप्रकाशमातनुते, त्वच्चरणारविन्दमकरन्दबिन्दुबिन्दुरिन्दिन्दिरोऽहं[3] भवन्तं सर्वं स्वमर्पयामि । मत्सविधे सा सुविधा तु नास्त्येव प्रशस्तवस्तुसम्पदाम् । अभूमिरहं लौकिक्या विभूतेः । तथापि भवदीयं प्रियतमं वस्तु देवकुसुममिव देवकुसुममिदं[4] सेवायां समर्पयन्नमन्दमानन्दं विन्दामि । प्रियो देवानां दक्षिणाया दाताहं भूयासम् । स्वीक्रियतामदः पराक्रियतां च मदज्ञानजो मदः । स्वीयो विधेयो विनेयः प्रियः शिष्यः सेवकोऽयं दयानन्दः सोल्लासमाशीराशिभिरभिषेचनीयः समावर्तनीयश्च सद्वर्तनीमनुसरन्नाज्ञानुवर्ती देशाटनायेति ।

१- अनपाचीना शुद्धा । २- उपग्राह्यमुपदा । ३- इन्दिन्दिरो भ्रमरः । ४- देवकुसुमं लवङ्गम् ।

अनेन विनयेन नयेन चातिमात्रं प्रह्लन्नगात्रश्छात्रं प्रति शास्त्रकुशलः पेशलो गुरुर्विरजानन्दः सगद्गदं गिरमिमामुदीरयामास— वत्स ! सकुशलमीयतां मीयतां च सत्यानृतम्। प्रीतोऽस्मि ते। अखिलमधीतं प्रतीतं[1] च सफलीक्रियताम्। आजन्म ब्रह्मचर्यमाचर्यतां, विचर्यतां च समन्ततः। देशस्योद्धार उपकारश्चानुष्ठीयताम्। अनार्षा ग्रन्थग्रन्थयः प्रमथ्यन्ताम्। सनाथ्यन्तां चर्षिप्रणीता जगद्धिताः पद्धतयः। सत्यशास्त्राणि समुन्नीयन्ताम्, मतभेदभिन्नाऽज्ञानसंहतिरपनीयताम्। आद्यो वेदप्रतिपाद्यो धर्मो मर्माहत इव लुप्तप्रायोऽद्य विपद्यते, स पुनः प्रसार्यताम्। निःसार्यतां च निःसारः कदाचारप्रचारः। सञ्चार्यतां मुदाधारः सर्वत्र सदाचारः। एष एव ममादेशः, एतदनुशासनम्। एष एव च देशे विदेशे विशेषेणोपदेशः। इयमेव विशिष्टानुशिष्टिरिष्टा मत्प्रदिष्टा। अहं गृहीतव्रतं भवन्तं शुभाशिषा युनज्मि। स सर्वशक्तिरव्यक्तोऽपि नक्तंदिवं व्यक्तोऽन्तर्यामी स्वामी भगवान् मघवान् तुभ्यमभ्यन्तरं निरन्तरं प्रबलं बलं भवच्छुभेच्छुरच्छं यच्छेदिति। इतीमां गुरोरमृतसमधुरां मधुरां वाचमाचम्य दयानन्दः सानन्दमङ्गीकारेणान्तरङ्गं तरङ्गयन् रम्यं हृद्गम्यं सन्तोषपोषं पुपोष। गुरोः कुलात् प्रस्थानवेलायां गुरुणा पुनरप्यभाणि वाणी— पश्य भोः शिष्य दयानन्द ! अभिनवमानवरचितपुस्तकेषु मुनीनामृषीणां परमात्मनश्च भूयसी निन्दा स्पष्टं समाविष्टावतिष्ठते। प्रायेण नास्तिकनिर्मितानि तानि पुस्तकान्यमन्दं निन्दन्ति वेदान्। सावज्ञमज्ञोपज्ञानि चाधिक्षिपन्त्यास्तिकान्। ऋषिप्रणीतग्रन्थेषु त्वेष दोषो लेशतोपि नास्ति। एतद्दोषविवर्जिताः खल्वार्षा ग्रन्थाः।

१- प्रतीतं विचारितम्।

आर्षानार्षग्रन्थानामेष भेदोऽवश्यं विमृश्यः। न च त्वया कदाचन विस्मार्यः इति। इममादेशमुपादाय श्रीचरणयोर्न्यस्तहस्तमस्तकः श्रीमान् मतिमान् व्रती दयानन्दः सानन्दं शुभाशिषामनुपदं गुरुणा कृताभ्यनुज्ञो देशाटनं चिकीर्षुर्लोकोन्नतिपथपथिको भूत्वा प्रतस्थे।

(मालिनीवृत्तम्)

इति गुरुवरविरजानन्दतः[1] प्राप्य शिक्षां,
व्रतरतिरथ दत्त्वा दक्षिणां दीक्षितोऽसौ।
अचलदमितशोकं लोकमुद्धर्तुकामः,
सपदि दधदखण्डं ब्रह्मचर्यस्य दण्डम् ॥ १ ॥

— —

इति प्रथम उल्लासः

१- यद्यपि 'अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेद्' इति वचनात् प्रकृते मालिनीवृत्ते 'विरजानन्द'शब्दस्थाने मगणत्वसाधकेन विर्जानन्द इति निर्देशेन भाव्यम्, तथापि तथा सत्याचार्यचरणानां यथार्थनाम्नो भ्रमः समापद्येत। स दोषो मा प्रसाङ्क्षीदिति कृत्वा शुद्धप्रसिद्धनामनिर्देश एवादरः कृतः। विरजा, विर्जा इत्युभयोरेकत्र वर्णाधिक्येऽपि मात्राचतुष्टय-स्योभयत्र तुल्यत्वाल्लयस्वारस्याभग्नत्वाच्च।

अथ द्वितीय उल्लासः

(वंशस्थं वृत्तम्)

शुभैः शिवाशंसिभिराश्वभीशुभि[1]—स्तमी[2]—तमस्तोममपोहितुं ततम्।
हिमांशुरानन्दमयः सुनिर्मलः कृतोदयः प्रांशु[3]—रभाद् दयोज्ज्वलः।१।

यथा पुरा महिताय लोकहिताय मृत्युविजयिनो महायोगिनो महात्मनः प्रशस्तस्य महर्षेरगस्त्यस्याश्रमाद् दिव्यास्त्रसम्पन्नः प्रसन्नः श्रीरामचन्द्रोऽतन्द्रो रक्षोवधाय दक्षो विजनस्थानमपि जनस्थानं[4] प्रति प्रस्थानमकरोत् तथा गुरोर्विरजानन्दाद् गृहीतादेशो लब्धाशीर्वचनश्चोपसम्प्राप्तत्रिंशवर्षोऽवाप्तविद्याप्रकर्षो महाभागः श्रीमान् दयानन्दः कार्यक्षेत्रमवतीर्णः सर्वप्रथमं विंशत्युत्तरैकोनविंशतिशततमे (१९२०) वैक्रमाब्दे वैशाखमासस्यान्ते, आगरा—नगरे यमुनातीरस्थ—भैरवमन्दिरनिकटे श्रीश्रेष्ठिगल्लामल—रूपचन्द्रस्य भवनमध्यमध्युवास। तत्राविगीतायाः श्रीमद्भगवद्गीतायाः प्रभावोत्पादिकां श्रोतृजनाह्लादिकां प्रथितां कथामचकथत्। बहुजनानुरोधाद् विद्यारण्यविहारिश्रीविद्यारण्यमुनिविरचितस्य पञ्चदशीत्याख्यस्य मुख्यस्य नवीनवेदान्तग्रन्थस्य कथामप्यकथयत्। पञ्चदशीग्रन्थे ब्रह्मणोपि भ्रमः संभवतीत्यनुचितमरुचितं लेखं निभाल्य शल्येनेव विद्धश्चित्तवैकल्यमाकलयत्। बद्धाश्रद्धातिरेकश्चासौ तं ग्रन्थं सहस्राक्षरमप्युदस्राक्षीत्[5]। तत्रस्थ एवायं स्वनिर्मितसन्ध्यापुस्तकस्य सम्पादनमकार्षीत्। श्रीरूपलालमहोदयेन तत् त्रिंशत् सहस्रं पुस्तकप्रति[6]

१- अभीशुभिः किरणैः। २- तमी रात्रिः। ३- प्रांशुरुन्नतः। दयानन्दरूपः समुन्नतश्चन्द्रोदयो जातः इति ध्वन्यते। ४- नासिकाख्यं जनपदम्। ५- उत्सृष्टवान्। ६- पुस्तकस्य मात्रा पुस्तकप्रति। सुप् प्रतिना मात्रार्थे इत्यस्वपदविग्रहोऽव्ययीभावः समासः।

मुद्रापयित्वा प्रचारितम् । ततः प्रभृत्येव भगवान् दयानन्दोऽप्रतिमस्य परमात्मनः प्रतिमापूजनविधेः खण्डनमप्यारेभे । श्रीमद्भागवतपुराणस्य खण्डनायाप्येकं भागवतखण्डनाभिधं पुस्तकमलेखीत् । आगरानगरात् प्रस्थितः स्वामी वैदिकसाहित्यग्रन्थान्वेषणतत्परः सन् आबू-धौलपुरप्रभृतिस्थानेषु परिभ्रमन् एकविंशत्युत्तरैकोनविंशतिशततमे विक्रमवत्सरे माघस्य कृष्णद्वादश्यां दृश्यान्तराणि पश्यंश्चतुर्भिर्निजशिष्यैः सह ग्वालियरपुरं प्रपेदे । तत्रत्यनरेशः स्वामिनं महेच्छं शुभेच्छया पप्रच्छ –आसप्ताहं भागवतपुराणकथायाः श्रवणपथातिथीकृतायाः किं माहात्म्यमिति ? स्वामी तु पक्षपातनिरपेक्षः सङ्कोचमोचं प्रोचे— क्लेशश्लेषं भ्रेषं[1] कष्टमनिष्टं वा विहाय नान्यत् किंचित् तत्फलमस्तीति ।

तत्प्रयुक्तमुक्तमुत्तरं ग्वालियरनरेशो नारोचयत् । स चैकं सप्ताहं यावद् भागवतकथां कारयितुं सप्रयोजनं बृहदायोजनं विदधे । किंतु दैवगतेर्वैचित्र्यात् तस्मिन्नेव सप्ताहे महाराज्ञ्याः पञ्चमास्यो[2]—गर्भो व्यापद्यत । राज्ये च सूचिकेवारुन्तुदा विषूचिकाख्या रुजा परितः प्रससार । ययानेके प्राणिनः प्राणैर्व्ययुज्यन्त । घटितयानया घटनया भूयांसो जनाः स्वामिनोऽनुयायिनोऽभूवन् । तस्य नित्यसत्यपरायणतया नारायणैकशरणतया च वचसि निरत्ययं प्रत्ययिताः साधारणा असाधारणाश्च जनाः प्रमनः[3]—स्वमनःसम्प्रधारणया प्रगुणगुणगणनिर्धारणान् तमसाधारणधिषणं मनीषिणमजीगणन् । ग्वालियरपुरात् प्रस्थितः स्वामी करौली-जयपुराचरौली-कृष्णगढाजमीढादिस्थानेषु पर्यटन् द्वाविंशत्युत्तरैकोनविंशतिशततमे वैक्रमवत्सरे चैत्रस्य

१- विनाशम् । २- पञ्च मासान् भृतः पञ्चमास्यः । द्विगोर्यप् इति यप् प्रत्ययः । ३- प्रमनः प्रसन्नं यत् स्वमनः निजं चित्तं तत्कृतया सम्प्रधारणया विचारेण ।

अथ द्वितीय उल्लासः

(वंशस्थं वृत्तम्)

शुभैः शिवाशंसिभिराश्वभीशुभि[1]–स्तमी[2]–तमस्तोममपोहितुं ततम्।
हिमांशुरानन्दमयः सुनिर्मलः कृतोदयः प्रांशु[3]–रभाद् दयोज्ज्वलः।।१।।

यथा पुरा महिताय लोकहिताय मृत्युविजयिनो महायोगिनो महात्मनः प्रशस्तस्य महर्षेरगस्त्यस्याश्रमाद् दिव्यास्त्रसम्पन्नः प्रसन्नः श्रीरामचन्द्रोऽतन्द्रो रक्षोवधाय दक्षो विजनस्थानमपि जनस्थानं[4] प्रति प्रस्थानमकरोत् तथा गुरोर्विरजानन्दाद् गृहीतादेशो लब्धाशीर्वचनश्चोपसप्तत्रिंशवर्षोऽवाप्तविद्याप्रकर्षो महाभागः श्रीमान् दयानन्दः कार्यक्षेत्रमवतीर्णः सर्वप्रथमं विंशत्युत्तरैकोनविंशतिशततमे (१९२०) वैक्रमाब्दे वैशाखमासस्यान्ते, आगरा–नगरे यमुनातीरस्थ–भैरवमन्दिरनिकटे श्रीश्रेष्ठिगल्लामल–रूपचन्द्रस्य भवनमध्यमध्युवास। तत्राविगीतायाः श्रीमद्भगवद्गीतायाः प्रभावोत्पादिकां श्रोतृजनाह्लादिकां प्रथितां कथामचकथत्। बहुजनानुरोधाद् विद्यारण्यविहारिश्रीविद्यारण्यमुनिविरचितस्य पञ्चदशीत्याख्यस्य मुख्यस्य नवीनवेदान्तग्रन्थस्य कथामप्यकथयत्। पञ्चदशीग्रन्थे ब्रह्मणोपि भ्रमः संभवतीत्यनुचितमरुचितं लेखं निभाल्य शल्येनेव विद्धश्चित्तवैकल्यमाकलयत्। बद्धाश्रद्धातिरेकश्चासौ तं ग्रन्थं सहस्राक्षरमप्युदस्राक्षीत्[5]। तत्रस्थ एवायं स्वनिर्मितसन्ध्यापुस्तकस्य सम्पादनमकार्षीत्। श्रीरूपलालमहोदयेन तत् त्रिंशत् सहस्रं पुस्तकप्रति[6]

१- अभीशुभिः किरणैः। २- तमी रात्रिः। ३- प्रांशुरुन्नतः। दयानन्दरूपः समुन्नतश्चन्द्रोदयो जातः इति ध्वन्यते। ४- नासिकाख्यं जनपदम्। ५- उत्सृष्टवान्। ६- पुस्तकस्य मात्रा पुस्तकप्रति। सुप् प्रतिना मात्रार्थे इत्यस्वपदविग्रहोऽव्ययीभावः समासः।

मुद्रापयित्वा प्रचारितम्। ततः प्रभृत्येव भगवान् दयानन्दोऽप्रतिमस्य परमात्मनः प्रतिमापूजनविधेः खण्डनमप्यारेभे। श्रीमद्भागवतपुराणस्य खण्डनायाप्येकं भागवतखण्डनाभिधं पुस्तकमलेखीत्। आगरानगरात् प्रस्थितः स्वामी वैदिकसाहित्यग्रन्थान्वेषणतत्परः सन् आबू-धौलपुरप्रभृतिस्थानेषु परिभ्रमन् एकविंशत्युत्तरैकोनविंशतिशततमे विक्रमवत्सरे माघस्य कृष्णद्वादश्यां दृश्यान्तराणि पश्यंश्चतुर्भिर्निजशिष्यैः सह ग्वालियरपुरं प्रपेदे। तत्रत्यनरेशः स्वामिनं महेच्छं शुभेच्छया पप्रच्छ -आसप्ताहं भागवतपुराणकथायाः श्रवणपथातिथीकृतायाः किं माहात्म्यमिति ? स्वामी तु पक्षपातनिरपेक्षः सङ्कोचमोचं प्रोचे— क्लेशश्लेषं भ्रेषं[1] कष्टमनिष्टं वा विहाय नान्यत् किंचित् तत्फलमस्तीति।

तत्प्रयुक्तमुक्तमुत्तरं ग्वालियरनरेशो नारोचयत्। स चैकं सप्ताहं यावद् भागवतकथां कारयितुं सप्रयोजनं बृहदायोजनं विदधे। किंतु दैवगतेर्वैचित्र्यात् तस्मिन्नेव सप्ताहे महाराज्ञ्याः पञ्चमास्यो[2] गर्भो व्यापद्यत। राज्ये च सूचिकेवारुन्तुदा विषूचिकाख्या रुजा परितः प्रससार। ययानेके प्राणिनः प्राणैर्व्ययुज्यन्त। घटितयानया घटनया भूयांसो जनाः स्वामिनोऽनुयायिनोऽभूवन्। तस्य नित्यसत्यपरायणतया नारायणैकशरणतया च वचसि निरत्ययं प्रत्ययिताः साधारणा असाधारणाश्च जनाः प्रमनः[3]—स्वमनःसम्प्रधारणया प्रगुणगुणगणनिर्धारणान् तमसाधारणधिषणं मनीषिणमजीगणन्। ग्वालियरपुरात् प्रस्थितः स्वामी करौली-जयपुराचरौली-कृष्णगढाजमीढादिस्थानेषु पर्यटन् द्वात्रिंशत्युत्तरैकोनविंशतिशततमे वैक्रमवत्सरे चैत्रस्य

१- विनाशम्। २- पञ्च मासान् भृतः पञ्चमास्यः। द्विगोर्यप् इति यप् प्रत्ययः। ३- प्रमनः प्रसन्नं यत् स्वमनः निजं चित्तं तत्कृतया सम्प्रधारणया विचारेण।

कृष्णपक्षैकादश्यामवश्यदृश्यानि दृश्यानि पश्यन् पुष्कराख्ये मुख्ये महोत्सवे संमिलितोऽभवत् । तत्र च धर्मप्रचारकार्यमार्य आचार्योऽयमनिवार्यं कार्यमिति विचार्यातिचारुरुचिः सुचिरं रुचिरं चकार । एतावतानेहसा स्वामी यत्र कुत्रापि यात्रामकृत, कृतकृत्यः प्रायस्तत्र सर्वेष्वपि स्थानेषु पौराणिक-जैनवैष्णवचक्राङ्कितकण्ठेकालतिलकधारिप्रभृति—नानाविध—सम्प्रदायप्रवर्तकै—स्तैस्तैर्महद्भिर्विद्वद्भिः सहानेकान् युक्तिप्रयुक्तिसमर्थान् शास्त्रार्थान् व्यतानीत् । सर्वत्रैव च प्रसृतोच्चयशश्चयं विहिताभ्युदयं रिपुञ्जयं विजयं लेभे । एतेन तस्य धर्मप्रचारकार्ये सारल्यमजनि । सहस्रशो जनाश्च समन्वयेन तमन्वयुः । पुष्करमहोत्सवोपस्थानानन्तरं दृढः परिवृढोऽयमजमीढमेव पुनः प्रतिनिववृते । तत्र राविन्सन–शूलब्रेडादिभिः यीशुमतावलम्बिभिरादरिभिः पादरिभिः सह वादं विवादं विचारं विहारं व्याहारं व्यवहारं च भूयः समाचरत् । तेन यूरोपीयलोकेष्वपि स्वामिमहाभागस्यावलुलोकयिषा तद्विचाराणामवजिगमिषा चोच्चैः समुज्जजृम्भे ।

कर्नलब्रुक्समहोदयेन सह संलापः

तदानीं पश्चिमशोभारते भारते श्रीकर्नल ब्रुक्समहोदय आंगलो राजस्थानप्रदेशस्य राजकीयः प्रतिनिधिरासीत् । स काषायवासांस्यवेक्ष्यातिशयेन कषायितचेताः संजायते स्म । असावप्येकदा श्रीवंशीलालश्रेष्ठिन उपवने पवनेरितकुसुमिततरुलतासुरभिसमुल्लसिते श्रीस्वामिना सह समागमाय समागमत् । यदा लोकाः स्वर्णवर्णोज्ज्वलमूर्जस्वलं कर्नलं दूरादायान्तमवालोकयंस्तदा समस्ता अपि भयत्रस्ता विहस्ताः सञ्जज्ञिरे ।

तदुत्प्रेक्ष्य प्रेक्षावता स्वामिना निर्भयेन सता प्रोक्तम्— न भेतव्यम् । शान्तैर्भाव्यम् इति । कर्नलमहाशयः सदाशयः स्वशिर-

स्त्राणमवतार्य त्राणमिव मन्वानस्तन्वानः प्रियवचनानि स्वामिनं प्रत्युद्ययौ[१]। करग्राहं गृहीत्वा चासन्द्यामुपाविशत्। मिथः संभाषणावसरे स्वामिना गोरक्षणविषय उपन्यस्तः। पर्यस्तभयेन च वस्तुतो गवां रक्षणमनिवार्यतया विधेयं प्रतिपादितम्। कर्नलब्रुकश्चैवमनपवाद्यमाद्यं चोद्यं[२] चोदितो यद् भवन्तोऽस्मद्देशे शासनासनशय्यामधिशय्य गोघातगातकसंनिपातादत्यन्तमत्याहितमहितं च समाचरन्ति। दृश्यतां विमृश्यतां च एकेनैव गोपशुना समधिकाधिकनिराधिक[३]—जनिमतामभिमतो लाभः सम्पद्यते। किंतु हन्त भवन्तस्तं जीवन्तमेव सन्तमन्ततः स्वयं घातंघातमदन्तः सदन्ता हसन्तः समन्तात् सञ्च न्तीति। श्रीस्वामिनः सूदर्कतर्कसमन्वितं सूचितं[४] सूचितं वचः कर्नलमहोदयोऽभ्युपागात्। अन्येद्युश्चासौ स्वामिनं स्वनिवासभवने सङ्गन्तुमाजुहाव। परस्मिन् दिवसे कर्नलमहाशयशकटं प्रकटं स्वामिनं नेतुं तन्निकटं समेयाय। वह्य[५]—वाह्यः स्वाम्यवगाह्य बाह्यमध्वानं कर्नलभवनं प्राप। तत्र नूनं पादोनां घण्टां यावत् कण्ठाञ्चितवाचोयुक्तिप्रयुक्तिभिः कर्नलमहोदयेन गोरक्षाविषयभूषितं भाषितमभाषि। पर्यवसाने च तेन गोहननजनितहानयो मननान्निर्विशयं[६] वाग्विषयीकृत्याङ्गीकृताः। ततः स्वामी प्रत्युवाच— यद्येवं, तदद्यैव सद्यो भवान् कृत्यामिव[७] गोहत्यामिमामत्यन्ताय किमिति न त्याजयति। कुतश्च क्षणेनैव घृणितमिदं कर्म न प्रतिरुणद्धि इति। कर्नलोऽब्रूत— नायमद्यावद्यापि ममाधिकारमध्यवर्ती विषयो वरिवर्ति यदहमनादृत्यां प्रतिकृत्यां[८] च गोहत्यां भवद्देशमध्ये प्रतिरुध्यामिति। एवं भवितुम-

---

१- अभ्युत्थानादिसत्कारं चकार। २- प्रश्नम्। ३- आधिर्मानसी व्यथा तेन रहिता निराधिकाः जनिमन्तः। ४- सुष्ठु उचितम् ५- वह्यं शकटं तेन वाह्यः वोढव्यः ६- निःसंशयम्। ७- पिशाचीमिव। ८- प्रतिकारयोग्याम्।

र्हति । अहं भवते निश्चितरेखं लेखं स्वच्छं स्वेच्छया यच्छामि । श्रीमतेममुपादायात्रभवान् लाटमहोदयः संगमनीयः । स एवात्र विषये प्रभवतीति । स्वामी तु तत्करपत्त्रं करपत्त्र[1] मिवापत्रपात्रास-करमप्यादाय ततः प्रत्यावृतत् । उद्दीप्तललाटो लाटो निजहृद्वाट[2] कपाटं कदा स्वामिने समुद्घाटितवानिति नाद्यापि विज्ञायते विज्ञैः । प्रकृत्या कृत्याऽऽकृत्या च स्नीढः[3] स्वाम्यजमीढ एव रामस्नेहिनां गेहिनां महान्तमध्यक्षं प्रत्यक्षं शास्त्रार्थायाह्वयत । पूर्वं त्वसौ कार्या-न्तरस्य जानानो[4] ननुनचं[5] कुर्वन् तद्व्याजेनाजि[6] समाजे नाजीत् परन्त्वन्ते वयं तु राम राम इत्यभिरामं शब्दमविरामं रटामः । अनायासमशनवसनादिलब्ध्वा रसमयं समयं गमयामः । व्यर्थेन शास्त्रार्थेन किं नः प्रयोजनम् । न वयं तत्र सविशये विषये किमपि निजसद्मनि स्थिता विद्म इत्युक्त्वा सुखं पराजयमुखं प्रतीत्यार्हणीय-जनगर्हणार्हः सोपवर्हं[7] निजपरिवर्हं[8] परिगृह्य ततः पलायांचक्रे ।

कदाचन बहुश्रेयस्यो भूयस्यो ललनाः सदुपदेशं ग्रहीतुं स्वामिनः सकाशमाययुः । ताः स्वामिना सादरं प्रोक्ताः— यतो वयं प्रयतेन्द्रिया यतयः स्मोऽतः स्त्रियो नोपदिशामः । तत्रभवतीभिः स्वपतयः प्रहीयन्ताम् । त एव च महीयन्तां सदुपदेशलाभेन । तेषामुपदेशेनैव मतिमत्यः सत्यो भवत्योपि कृतार्थाः सम्पत्स्यन्त इति । अजमीढात् स्वामी कृष्णगढं प्रयातः । तत्र वल्लभमतस्य बहुखण्डनं मानमर्दनं च वितेने । ततः प्रस्थाय दूदू—वगर्वादिपदेष्वगर्वं विहरन् हरिरिवाखर्व-पराक्रमःक्रमेण सर्वं प्रतिरोधिबलं चर्वन्नर्वेव प्लुतगतिरप्लुतब्रह्मचर्यः

१- क्रकचमिव । २- वाटो मार्गः ३- स्निग्धः । ४- कार्यान्तराप-लापेन शास्त्रार्थमपह्नुवानः, अपह्नवे ज्ञः इत्यात्मनेपदम् । ज्ञोऽविदर्थस्य करणे इति षष्ठी । ५- ननु च न च यस्यां क्रियायां तद् ननुनचम् । मयूरव्यंसकादिसमासः । अपलापमित्यर्थः । ६- आजि युद्धम् । शास्त्रार्थ-मिति यावत् । ७- सोपधानम् । ८- स्वपरिच्छदम् ।

सन्नागरा-नगरं प्रत्यारत् । तत्र भागवतखण्डनविषयकमेकं पुस्तकं लघ्वप्यक्षुद्रमुद्रयोन्निद्रं मुद्रापयित्वा जनताहिताय परितो वितताार । ततो मथुरापुरीमित्वा निजगुरुदेवस्य हिमवत इव महामहिमवतः श्रीविरजानन्दस्य सानन्दं पुनर्दर्शनमकरोत् ।

कुम्भमहोत्सवे समागमनं पाखण्डखण्डनीपताकोद्धूननं च

अनन्तरं मेरठपुरं प्रयान् हरद्वारे त्रयोविंशत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दे कुम्भमहोत्सवावसरे समाययौ । तत्र चोच्चैरुत्साहसाहसरसिकोऽयं मूर्तिपूजां खण्डशः खण्डयितुमखण्डं स्वं पाण्डित्यमण्डयत् । चतुर्विंशत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दारम्भे ससंरम्भं भीमगोडामुत्तरेण लोकोत्तरेण धैर्येण वीर्येण शौर्येण च परिपूर्णः समुद्गूर्णघूर्णमानदोर्दण्डो मण्डितसप्तस्रोतःसेतुबन्धस्योपरि प्रणीतनवपर्णकुटीरः पाटीर[1]—शीतलहृत्तलः श्रीमान् स्वामी दयानन्द आनन्दकन्दः प्रस्तरपूजकान् नास्तिकान् जयन्तीं पाखण्डखण्डनीं नाम वैजयन्तीमुद्धूय भूयो भूयो विषमविषयाशीविषविषज्वालाजालावलीढान् मूढान् सोढानेककष्टान् दुष्टान् दूयमानमानसान् उदूढदुराचारभारान् असारान् संसारान्निःसारयितुं शुद्धं प्रसिद्धं चाभिमतं वेदमतं प्रसारयितुमखिलखलकलितनिरर्गलगलगलितकलकलानाकुलयितुं च प्रचण्डमुद्दण्डभण्डखण्डनं कर्तुमारभत । प्रत्यहं स्वामी धर्मोपदेशं शङ्कासमाधानं च प्रावीवृतत् । जनसमुदाये स्वामिनो धर्मप्रचारस्य काप्यपूर्वा शोभा समजायत । शुशुभे शुभेन कर्मणा शोधितहृन्मर्मणाऽसौ सौभाग्यवान् ।

१- पाटीरं चन्दनम् ।

महतो महीयान् जनसमवाय: कृताध्यवसाय: सत्यसिद्धान्तमण्डिनीं पाखण्डखण्डिनीं नाम पताकां राका[1]-मिव पूर्णविभाकां[2] वेदोदितानुवा[3]-कामभिलक्ष्य त्वरितं दुरित परिहरिष्यन्निव हृष्यन् सद्धर्मकर्ममर्मण्यस्तृष्णङ्[4] निरुपद्रवं प्रद्रवन् इत्थंभूतस्तत्र समवैद्यथा तत्परिणामभूता लक्षशो मानुषा: पाखण्डमताद् उद्विजमानास्तद्विमुखा: समजनिषत। नग्ना भग्ना:, विरागिणोऽनुरागिण: उदासीना उपासीना:, वैष्णवाश्चाप्रभविष्णव: सन्त: समेपि चित्रीयां कलयन्तो विषमां दशामापेदिरे।

प्रगाढपाखण्डदलनाय भूयस्तपोनुष्ठानं सर्वस्वत्यागश्च

तस्मिन्नुज्जृम्भितदम्भे कुम्भसमारम्भे श्रीस्वामिनाऽखण्ड: पाखण्डाख्यो मुख्यो यावान् यादृशो विसदृशो बाढं गाढो मिथ्याप्रपञ्चो वञ्चकलुञ्चक[5]-ग्लुञ्चक[6]-जनाञ्चित: सञ्चितोऽदर्शि तस्य तावतस्तादृशस्योन्मूलनसमर्थमर्थ्यं[7] सामर्थ्यमद्भुतविभूतिसंभूते पूतेपि स्वस्मिन्नानुभूतम्। अत: समूलं तदुन्मूलनायापर्याप्तमात्मानं मन्यमानस्य तस्य महात्मनो यतिवरस्यात्मनीतोऽप्यधिकतरं सुतरां तप: समाधि विधातुं बलवतीच्छा[8]-च्छाचर्च्छत्। सर्वं स्वं परित्यज्य विभजेयं भगवन्तं च भजेयमिति विमला प्रबला च भावना हृदयममन्दमान्दोलयत्। तदात्व एव महोत्सवसभाजनागतै: सभाजनासनभोजनैर्विविधानुरक्तभक्तजनैर्गर्हानर्हमर्हणीयं यत् तन्निमित्तं वित्तं चित्तशुद्धया बुद्धया च विविच्य रुच्यमशनवसनादिवस्तुजातमुपाहारि हारि, तदशेषमसौ क्षितेभ्यो[9] बुभुक्षितेभ्यो विपन्नमग्नेभ्यो नग्नेभ्यो

१- पौर्णमासीमिव। २- पूर्णा विभा यस्यां सा पूर्णविभाका। ३- वेदे उदित: अनुवाको यस्या:। राकासूक्तं हि वेदे पठ्यते। पताकापक्षे तु वेदोदित: वेदप्रतिपाद्य: अनुवाक: अनुवचनं प्रवचन यस्याम्। ४- पिपासु:। ५- लुञ्चका: प्रलम्भका:। ६- ग्लुञ्चका धूर्ता:। ७- अपेक्षितम्। ८- इच्छा, अच्छा, आचर्च्छत् इति च्छेद:। ९- क्षीणेभ्य:।

दीनेभ्यः क्षुद्रेभ्यो दरिद्रेभ्यश्चाकुण्ठोत्कण्ठयावण्टयत् । मनीषिजना-भाष्यं महाभाष्यं नाम व्याकरणपुस्तकमेकम्, एका भद्रा स्वर्णमुद्रा, निर्मलकोमलमलमलांशुकराशिग्रन्थिश्चैक इत्येतत् त्रयं समुदितं मुदितेन मनसा परमपूज्यस्य प्राज्यप्रज्ञस्य विज्ञस्य श्रीगुरोर्विरजानन्द-स्यान्तिके प्राजीहयत् । शिष्टमुच्छिष्टमिव मत्वा सर्वं स्वं परित्यजन् केवलं कौपीनमात्रधारी स्वच्छन्दविहारी ब्रह्मचारी दयानन्दश्चारुचर्यो विचचार । कैलाशपर्वताभिधः साधुः सर्वस्वत्यागिनं महाभागं स्वामिनं दयानन्दं तत्त्यागकारणं यदाऽप्राक्षीत् तदा द्राक्षामधुरया गिरा स्वामी प्रत्युदतरत्— यावदनल्पीभूतः परिग्रहः स्वल्पीकृत्य न निगृह्येत तावत् पूर्णस्वातन्त्र्यानुपलब्धेर्जीवनसाफल्ये वैकल्यमाः पद्यते । अधिकाधिकवस्तुसंयोजनमपि निष्प्रयोजनमेवापतति । परमं चरमं चोद्देश्यं साधयितुं स्वच्छन्दत्वं निर्द्वन्द्वत्वं चावश्यकमस्तीति । इयन्तं कालं यावद् बहुत्र भ्रमता यतिवरेण मूर्तिपूजनम्, वैष्णवम-तावलम्बनम्, वाममार्ग-चोलीमार्ग-बीजमार्गादिमार्गणम्, अवतार-वादः, कण्ठाभरण-तिलकमालादिधारणम्, पुराणोपपुराणप्रामाण्यम्, शङ्खचक्रगदादिगदा[1]-ध्यारोपः, वह्नावह्नाय[2] तप्तायास्तनोरङ्कनम्, गङ्गास्नानात् काशीनिवासाच्च मुक्तिः, कल्पितदैवतनामस्मरणाद् भवसागरतरणम् इत्येतानि चान्यानि च पापखण्डापरनामधेयानि विगेयानि[3] पाखण्डानि सम्यग् बुबुधिरे । सर्वत्यागी भगवदनुरागी दयानन्दोऽतः परं चिरं स्थिरं मौनं धारयित्वा विकटगङ्गाटवी-तटवीथिकानिकटमाटीत् । हृषीकेश–हरद्वार–कनखल–शुक्रताल-लण्ढौरा-परीक्षितगढ–गढमुक्तेश्वर–रुडकी–मीरापुरादि–नानाप्रदेशेषु परिव्रजन् मौनमाकलय्यैकान्तवासप्रियः शान्तस्वान्तस्तस्थौ । विव-दिषायां तु सत्यां सत्यां गीर्वाणवाणीवीणामेवाक्वाणीत् ।

१- गदो रोगः । २- अह्नाय शीघ्रम् । ३- निन्द्यानि ।

रासलीलारसिकस्य रावकर्णसिंहस्य मानभङ्गः

अर्धतृतीयान् हायनान् यावद् अतिकठोरघोरतपश्चर्यानन्तरं यतिवरः सत्यधर्मं प्रचिचारयिषुः पुनः पाखण्डखण्डनक्षेत्रमवातरत्। पञ्चविंशत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दे कर्णवासे वासमकल्पयत्। तत्र प्रतिवर्षं सोत्कर्षं ज्येष्ठशुक्लदशम्यामतिरम्यो गङ्गास्नानमहोत्सवः प्रवर्तते स्म। स्वामिमहाभागानामागमनं कर्णाकर्ण्य कृतारावो रावः कर्णसिंहो बंहीयोरंहः[1]—सङ्घसंहितस्तत्रोपाजगाम। स खलु रासलीलायां रुचिमाधत्त। स्वामी तु तां लीलामश्लीलां मत्वा तद्विरोधायातिष्ठमानो विरजा विरराज। तदीयमाचारं विचारं च स्वमतप्रतिकूलं शूलमिव मन्यमानः साभिमानः कर्णसिंहः षिड्ग[2] इव निजखड्गं निनर्तयिषुरवर्तत। असौ रङ्गाचार्यस्य शिष्यतामितोऽभूत्। महोत्सवावसरे विविधजनानुरोधाद् उन्मीलत्प्रेमप्रमीला रासलीला प्रारभ्यत। तत्र पौराणिकपण्डितमण्डली संन्यासिवर्गश्च बाहुल्येन लीलासाफल्याय कार्यत आकार्यत[3]। अनुभूतात्मविभूतिः पूताकूति[4]—र्निर्द्वन्द्वो दयानन्दोपि तत्र रसग्रहणाय पुरुहूत[5] इवाहूतः प्रभूतैर्भूतैरिव संभूतः। स तु निन्द्यान् मन्दांस्तान् अमन्दं निरुन्धानः प्रत्याह स्म— एवंभूतेष्व[6]—वद्येषु अविद्यासंमितेषु[7], असत्संमतेषु, अनार्येषु कार्येषु न वयमार्याः संमिलिता भवितुमर्हाम इति। तदेतत्कर्णगोचरीकृत्यापरेद्युरविद्याग्रस्तोऽत्रस्तो रावः कर्णसिंहः प्रवृद्धमात्सर्यो नैष्ठुर्यादनार्यः कृत्या-

---

१- रंहो वेगः। अतिशयेन बहुलं बंहीयः। अतिशयितवेगसंघातसहितः। २- नट इव। ३- आहूतः। ४- शुद्धाभिप्रायः। ५- इन्द्र इव। ६- गर्ह्येषु पापेषु। ७- अज्ञानतुल्येषु।

कृत्यं विस्मृत्य भृत्यैरनुवृत्यः प्रकृत्या दुष्टो निर्दुष्टाचार्यवर्यस्य पटकुटीरं कपटपटुः प्रकटमाटीकत। तदानीं सायं वेला हेलया खेलायांबभूव। सलीलमेलयन्त्यां तस्यां यतिवरः पार्श्वस्थानुपेतान् समेतान् जनान् वेदोपदेशदानेन कृतार्थयन्नासांचक्रे। रावमहाशयस्तदैव स्वामिनमुपतस्थे। उपस्थितमात्र एव तत्रासौ कृतत्रासः सावलेपोऽनर्गलं गलद्गलस्खलद्वचोभङ्गीमङ्गीचकार। श्रमलं गङ्गाजलं सकलकलिमलं दलयन्मुक्तयेऽलम् इत्युक्तवति कर्णसिंहे यतिवरः स्पष्टमकष्टं च सप्रतिष्ठां प्रतिष्ठापयामासेमां वाचमुच्चैः—गङ्गाजलं किल पेयमेव। पानीयत्वात् पानायैव तच्छक्यमुपयोक्तुम्। मुक्तये तन्नालम्। तदर्थं तदनुपादेयं हेयमिति यावत्। न त्वादेयमिति विज्ञेयम्। प्राणिनां सत्कर्मणैव मुक्तिर्भवितुमर्हति, न जलादन्यस्माद्वा कस्माच्चिद्वस्तुनः। डलयोरभेदाज्जडधियामेव जलधीर्जायते। मुक्तौ भेदप्रत्ययभासे को जडो जलत्वं प्रतिपद्येत। जलप्रतिपत्तेरभावाद् जाड्यं न स्यात्। एतेन त्वादृशां मूढदृशां मुक्तौ जीवब्रह्मणोरभेदोपि प्रत्युक्तो[1] वेदितव्यः।

रावकर्णसिंहस्यालिके[2] लुलितं तिलकं विलोक्य श्रीस्वामी तत्प्रयोजनानुयोगपुरःसरमाह— ननु भोः! क्षत्रियवंशावतंसेनापि सता भवता गोधा[3]—विदं मुधा निन्दितवन्दि[4]—मन्दकर्म[5]—न्द्युपलक्षितं लक्ष्म किमित्यसमञ्जसमञ्जसा[6]—ङ्कितम्। तच्छ्रुत्वा कृच्छ्रमृच्छन्[7] रावः कृतारावः कोपानलेनात्यर्थं प्राज्वालीद् अपशब्दांश्चानेकशः प्रयोक्तुमारब्ध। यतिवरस्तु वीतभयः शांतिपूर्वकं सत्यमुपदिदेश। चक्राङ्कितमतस्य निःसारतां चोपपादयन्नवादीत्—

१- निरस्तः। २- ललाटे। ३- गोधौ ललाटे। ललाटमलिकं गोधिः। ४- वन्दिनः स्तुतिपाठकाः। ५- कर्मन्दिनो भिक्षवः। ६- अञ्जसा याथार्थ्येन। ७- कष्टमनुभवन्।

भो राव ! भवादृशाः कीदृशाः क्षत्रियाः सन्ति । ये रासलीलास्वविकसितभालानाम्, अविज्ञातमोहजालानाम्, अनुपजातबालानामपि बालानां स्त्रीवत् तानि तानि स्वाङ्गान्यङ्गारैरिव दूषितशृङ्गारैः शोभयित्वा महापुरुषाणामनुकरणं च कारयित्वा तान् नर्तयन्तो मदान्धा लज्जासिन्धौ न मज्जन्ति । यदि कश्चिद् युष्माकं भगिनीर्नग्नाः कृत्वा तनयाश्चाविनया विधाय सर्वसमक्षं नर्तयेत् तर्हि गर्हितेनानेन कृत्येन किं स्वापमानं नानुभविष्यन्ति भवन्तः इति ।

सिंहसंहननस्य[1] दुर्जनहननस्य महीयसस्तस्य यतेर्गरीयसीरभयास्ता वाचः कर्णातिथीकृत्य कर्णसिंहो रुष्टः स्वोष्ठौ[2] चर्वन्, भृकुटी विकटयन्, असिधारायां वारं वारं करं प्रसारयन्नलक्ष्यत । तद्भृत्येष्वन्यतमः कश्चिदधमः स्वामिनं हस्त[3]—यितुमियेष तदा स्वामी तं न्यक्कृत्य धिक्कृत्य च परास्तवान् प्रोक्तवांश्च— अरे धूर्त ! मूर्तेन रसपूर्तेन स्फूर्तिमतानेन मद्वपुषा कस्ते लाभः पुष्यति । यदि लोहपरीष्टा[4]—विष्टा चेष्टा प्रतिभाति तदितो जयपुरं जोधपुरं चेत्वा[5] तत्रत्यराजभिः सह सम्प्रहरस्व । अथ चेच्छास्त्रार्थे समर्थं मनस्तमेवार्थयते तदा वृन्दावनवनावनीरङ्गशालासङ्गीतसङ्गतं रङ्गाचार्यमिहोदिङ्गय[6] । एवं ब्रुवत्येव भगवति यतिवरे महान् कोलाहलः समुदपादि । तदेतत्सर्वं श्रुतिविषयीकृत्य विहितविरावो रावः स्वयं परिवारात्[7] तरवारि[8]—माकृष्य स्वामिनमसयितुं[9] पुरः समायातः । तत्क्षणमेव स्वामिना तस्य पाणेः कृपाण आच्छिन्नः । प्रत्यासन्नेन

१- सिंहतुल्यशरीरस्य । २- ओत्वोष्ठयोः समासे वा इति वृद्धिविकल्पविधानाद् वृद्ध्यभावः ३- हस्तेन ग्रहीतुम् । ४- परीष्टिः परीक्षा । ५- इत्वा गत्वा । ६- प्रेरय । ७- खड्गकोशात् । ८- खड्गम् । तलवार इति भाषा । ९- असिना हन्तुम् ।

च सता त्सरुं[1] भूमावारोप्य किंचिदवनमय्य चासावसिर्निरस्तो ध्वस्तो व्यस्तः खण्डशश्चक्रे । तत्रैवोपस्थितः श्रीकृष्णसिंहष्ठक्कुरः सुपुष्टां यष्टिं स्वमुष्टौ निविष्टां प्रदर्शयन् रावमहाशयं भर्त्सयमानः प्रोवाच— अयि भोः ! यदि त्वमेनं महात्मानमीषदप्यापदमापादयितुमीहमानः किंचिदनुचितमाचरिष्यसि तर्हि यष्ट्यायष्टिप्रहारेण दुष्टस्य तव मनुजडिम्भस्य दम्भविजृम्भितमखर्वं गर्वं च सर्वं चर्वन्नहं त्वां परेत[2]—पतिपालितपुरीं प्रति प्रहेष्यामीति । एतदाकर्ण्यैव कर्णसिंहो भीतभीतः पृष्ठतःसरोऽभूत् । निजानुचरानुसृतश्च पश्चाद्धावद्भ्यामेव पादाभ्यां स्वशिविरमुपेत्य सविश्वासं निशश्वास ।

गप्पाष्टकनिराकरणम्

कर्णवासे निवसता यतिवरेणाष्टानामनिष्टानां गप्पापरपर्याय-गल्पानां पापकल्पानामनर्गलकपोलकल्पनाकल्पितानां बलवन्निरा-करणमकारि । तानि च गप्पाष्टकानीमानि—

१- अष्टादशपुराणानां कर्त्ता सत्यवतीसुतो व्यासः । २- मूर्ति-पूजनम् । ३- मिथ्याध्यवसायाः शैवशाक्तरामानुजादिवैष्णवसम्प्र-दायाः । ४- दुर्वासनाग्रन्थयस्तन्त्रग्रन्थाः । ५- मांसमदिराभङ्गादि-तरङ्गालिङ्गितानि मादकवस्तूनि । ६- परस्त्रीगमनरूपो व्यभिचारः ७- स्तेयम् । ८- छलकपटाभिमानानृतभाषणादीनि दुष्कृत्यानि च। मन्ये गप्पाष्टकशब्दः पूर्वमप्रयुक्तोपि तत एव कृतसदुपयोगं प्रयोगं लेभे ।

१- खड्गमुष्टिम् । २- परेतपतिर्यमः तेन पालितां पुरीं यमालयमि-त्यर्थः ।

इन्द्रमणिप्रश्नोत्तरम्

तत्रैव श्रीलालेन्द्रमणिः स्वामिनमपृच्छत्— पूतोऽवधूतविषयलूतो[१] भूतयोनि[२]-रिव प्रभूतभूतानुभूतो भव्याकूतो भवन् भवान् अस्मिन् खण्डनमण्डनात्मके मिथ्याप्रपञ्चेऽत्रञ्चितमतिः किमिति पतितः। स्वामी प्रत्युदतरत्— नेदं कार्यमहं मिथ्याप्रपञ्चमञ्चामि। किं तर्हि ? ऋष्यृणनिर्हरणस्येयं मसृणा सरणिर्मया शरणीक्रियते। स्वार्थिनो धूर्ताः सम्प्रतिपन्नकदध्वानं विविधकुरीतिस्थानं त्यक्तात्मसम्मानं धृतमलसंस्त्यानमृषिसंतानं प्रत्यक्षं पश्यन्तोपि न विषीदन्ति। आर्यसन्ततेरियं दीना हीना च दुर्दशा न शक्या द्रष्टुम्। अस्याः समुद्धरणाय मया प्राणैः पणैः प्रयतिष्यते।

बुलन्दशहरमण्डलाधीशेन संलापः

एकस्मिन् दिवसे तत्र स्वामिसंनिधौ बुलन्दशहरमण्डलाधीशः समायात्। सर्वतः स्फुरितामनुपचरितां स्वामिनः कीर्तिं स प्रागेवाश्रौषीत्। तदानीं महाभागः स्वामी निजकुटीरान्तःस्थो ज्ञानध्यानपरायण आसीत्। कुटीरादनतिदूरं स्थित्वा मण्डलाधीशमहाशयेनैको मनुष्यः स्वामिसकाशं प्रेषितः। स्वच्छा दर्शनेच्छा च प्रकटिता। स्वामिना प्रत्युत्तरं दत्तम्— अहमिदानीं सावकाशो नास्मि। मण्डलाधीशः पुनरन्वयूयुजत्— कदा भवान् सावकाशो भविष्यति। उत्तरे प्रत्युत्तरे स्वामिनाप्यन्वयोजि-भवान् कदा सावकाशो भविष्यति। मण्डलाधीशः स्पष्टमाचष्ट— चतुर्घण्टानन्तरमहं सर्वथा सावकाश एवास्मि। एतच्छ्रुत्वैव स्वामी कुटीराद् बहिरायातः। शिष्टाचारपुरःसरं मनःशोधनयन्त्रैर्वेदमन्त्रैः पुण्यश्लोकैर्मनुस्मृतिश्लोकैश्च मण्डलाधीशं राज्यधर्ममुपदिशन्नाह— यस्य

१- अवधूता विषयरूपा लूता येन सः। लूता ऊर्णनाभतन्तुजालम्।

२- भूतयोनिः ब्रह्मा।

शिरस्येककुटुम्बडिम्भानां भरणपोषणभारप्राग्भारः[1] समापतितो भवति स इतस्ततो दन्द्रम्यमाणो[2] बम्भ्रम्यमाणश्च[3] संलक्ष्यते। अतिमात्रं कृशगात्रो रात्रौ भृशं जागर्ति। शिरोऽवधूननस्यापि तस्यावकाशो न जायते। परन्तु भवद्वचनादहमतीव चित्रीयां कलयामि यत् सहस्रमनुष्याणां प्रेक्षणरक्षणशिक्षणभारः स्थिर-सन्धिबन्धयोः श्रीमत्स्कन्धयोर्निहितोस्ति। विपन्निमग्नानामापन्नि-वारणं भवदीयमावश्यकं कर्त्तव्यं भवति। तथापि भवन्तः कथयन्ति यच्चतुर्घण्टानन्तरमहं सर्वथा सावकाश एवास्मीति। मण्डलाधीश-महोदयेन स्पष्टमिष्टं वचस्तदूरीकृतम्। दूरीकृतविषादेन लब्ध-प्रसादेन च यथागतं निववृते।

वाचाटपण्डितानां स्वामिसंनिधौ मूकीभावः

अहमदगढवास्तव्यः पण्डितः कमलनयनोऽलीगढ—वास्तव्यः पण्डितः सुखदेवश्च पञ्चदशभिः स्वपण्डितैः सह स्वामिसकाशमीयतुः। तैः सर्वैः कतिपयेऽतिकठिनाः प्रश्नाः प्रष्टुं सृष्टा अभूवन्। असाधा-रणाश्च ते कृतविद्या यदा विद्यानिधेः स्वामिनः संनिधिं जग्मुस्तदा समुचितविनयसाधनमभिवादनं चक्रुः। यतिवरस्तु तृणासनम-ध्यास्य क्षणं हिमाचल इवाचलो ध्यानावस्थितस्तस्थौ। पुनश्चक्षुषी उन्मील्य सर्वान् निभालयन् उपदेष्टुमारेभे। तदा तदीयं विशालं भालं, मोहनं मुखमण्डलं, दिव्या भव्या तेजोमयी मूर्तिः, वचन-रचनामधुरिमा चेत्येतत्सर्वं समुदितं तस्मिन् पण्डितमण्डले तथा प्रभावं जनयामास तथा च तान् विमोहयामास यथा ते यथाभिमतं प्रश्नान् प्रष्टुं स्वामिना मुहुर्मुहुश्चोदिता अपि न कश्चिद्वाचां प्रचारमूरीचक्रुः। सहसा हतसाहसा हतोत्साहाश्च सन्तो मूका-

---

१- प्राग्भारः राशिः। २- भृशं गच्छन्। धावन् इति भावः।

३- भृशं भ्रान्तिमनुभवन्।

स्तस्थुः । युक्तमेवोक्तमुक्तिप्रयुक्तिज्ञैरभियुक्तैः— महानुभावः प्रतिहन्ति पौरुषम् इति ।

ते हि स्वामिवचनानि यथार्थानीत्येव गिरमुद्गिरन्तः कुरीतिखण्डनमनवच्छिन्नमश्रृण्वन् । परतश्चाधिगङ्गं मानभङ्गसङ्गिस्वाङ्गमलप्रक्षालनार्थं चल चलेति चेलुः । कार्तिकमासस्यान्ते यतिवरः कर्णवासात् प्रस्थाय चासी—नाम्नि स्थानेऽनभिमतं चक्राङ्कितमतमखण्डयत् । ततोऽलीगढ—प्रतोलीं१ डुढौके२ । तत्र गुर्जरदेशीयेन हीरावल्लभाभिधेन बुधेन शास्त्राशास्त्रि३ बभूव । यतिवरात् पराजितः श्रीहीरावल्लभः स्वीयाः शालिग्राममूर्तीराहितसन्मतिस्फूर्तिर्गङ्गातरङ्गभङ्गसङ्गिनीश्चकार । ततो यतीश्वरोऽयमनूपनगरमुपासरत् ।

ताम्बूलविषदानघटना

तदानीमनूपनगरे सैयदमुहम्मदाभिधानः कश्चिद्यवनः करसमाहर्तोपमण्डलाधीशपदे प्रतिष्ठितो राजकीयः पुरुषो बभूव । असावारव्यपारस्यभाषयोः सम्यग्भाषी मनीषी प्रसिद्धः प्रवुद्धो विद्वान् स्वामिनश्चरणकमलसेवायामहर्निशमुपतिष्ठते स्म । तस्य हृदये स्वामिनोऽनवद्याया विद्याया वरिष्ठस्य तपोनुष्ठानस्य चातिशयितः प्रभावोऽभवत् । निरतिशयगुणगरिम्णा स्वामिनि तस्य परा प्रीतिः श्रद्धातिरेकश्चावर्तत । यतिवरकृतात् प्रचण्डपाखण्डखण्डनादुद्विजमाना नानाप्रस्थानाः स्वार्थिनो जनाः स्वस्वार्थविघाताद् हेतोर्यतिद्रोहिणः समवर्तिषत । एकदा द्विजेनैकेन कपटघटनापटुना स्वामिनः समीपमुपेत्य सविनयं प्रणम्य च तस्मै ताम्बूलवीटिकाटीकयां५ बभूवे । सरलस्वभावः स्वामी तां निजास्ये न्यास्यत् । तस्या

१- प्रतोली विथी । २- ययौ । ३- शास्त्रैश्च शास्त्रैश्चेदं युद्धं प्रवृत्तमिति शास्त्राशास्त्रि । ४- उपमण्डलाधीशः तहसीलदार इति भाषा । ५- प्रददे । कर्मणि प्रत्ययः ।

विषसंपृक्तत्वादास्यन्यासससमकालमेव विषमः प्रभावः प्रादुर्भवन्न-लक्ष्यत। किं तु जानताप्यपरुषा[1] यतिवरेणाधमः स पुरुषः परुषं नोक्तः पश्चाच्च स्वयमेकान्ते गङ्गातटमटित्वा प्राणघातकस्य तस्य तरलस्यापि गरलस्य न्योलीक्रियाद्वारोपचारोऽकारि। विरचित-मनस्तापेन केनापि पापेन जनकल्याणकराय यतिवराय भयङ्करो गरो[2] मञ्जुलताम्बूलदलेन सहादायीति वार्ता तद्भक्तानार्ता-नातन्वती समस्तवस्तुसंपदभिरूपेऽनूपे नगरे सर्वत्र प्रसृता। अतिदारु-णोऽयं घृणितः समाचारः प्रसारं प्रसारं प्रदेशाधिकारिणः सैयद-मुहम्मदस्यापि श्रवणविवरं प्रविष्टः। तेन तदैव स महाब्राह्मणः साग्रहं निग्राह्यानायितः शृङ्खलाबन्धं बन्धयित्वा च स्वामिसकासमुप-स्थापितः, स्वामिनाऽऽगन्तुकः समन्तुरपि[3] स जन्तुरवलोकनमात्रेणै-वानुगृहीतः। तत्क्षणादेव च ततो दृष्टिरपसारिता। मनीषिणः स्वहितैषिणः ससम्मदस्य[4] सैयदमुहम्मदस्य तद्बन्धनात्मकं तत् कार्यमसत्कार्यमनुचितमरुचितमिव मत्वा च मौनमालम्बितम् पृष्टे सति रुष्टेन करुणार्णवेन सकरुणेयं भणिता भणितिः— भवतैको नवो मानवः कारागारे मत्सम्बन्धाद् बन्धनीतः। किन्तु श्रीमतेदं निश्चप्रचं विज्ञेयं विज्ञेन यदहं संसारं बन्धनान्मोचयितुं रोचयितुं च समागतोस्मि। न तु कारागारे सनिर्बन्धं बन्द्धुम्। यदि कश्चिद् दुष्टो निजदुष्टतामुत्स्रष्टुं नेष्टे तर्हि वयं निजश्रेष्ठतां विस्रष्टुं किमिति चेष्टेमहि इत्येतदभिधाय स्वामी तं विप्रं क्षिप्रं निःस्पन्दना बन्धनान्मोचितवान्।

मृतकश्राद्धादिनिराकरणम्

वैलोन-स्थाने शुभाकृतिना कृतिना यतिना मृतकानां श्राद्धं बुद्धिसिद्धसिद्धान्तविरुद्धं प्रतिपाद्य निराकृतम् अभिहितं च हितं

१- अपगता रुट् रोटो यस्य, तेन। २- गरो विषम्। ३- सापराधोऽपि ४- सहर्षस्य। प्रमदसम्मदौ हर्षे। पा० ३.३.६८

वचः—अयि मूढाः ! यूयमञ्जलिना जले जलं मा सम्मेलयत। यदि जलेन सेचनं वोऽभीष्टं तर्हि स्पष्टं दृष्टफलेऽत्र वृक्षमूले तन्निषिच्यतां येन कश्चिल्लाभोपि सम्पद्येतेति। तत्र वनखण्डी महादेवमन्दिरे कृष्णानन्दसरस्वतीति नाम्ना महानुभावेन सहावतारवादमधिकृत्य सत्यमतिर्यतिः शास्त्रार्थं प्रवर्तयामास। स्वं मतं च शास्त्रसंमतं समर्थयामास। ततश्चतुरोऽसावतरोवले छलेसरे च बलवत् समुच्छलन् निच्छलं प्रचारमकृत। प्रतिभावतः स्वामिनः प्रभावतश्छलेसरेऽग्रतःसरष्ठक्कुरो मुकुन्दसिंहो धनाधिपः स्वभूमिहारत्वस्यांशतो विंशतेराप्तानां मन्दिराणां मूर्तीः समुत्थाप्य कालिन्दीजलतललितकल्लोललुलिताः सप्रसत्तिर्व्यधत्त। ततो यतिवरो वगडियां प्रति यान् सोरोंनामधाम जगाम। अनन्तरमम्बागढमढौकत। तत्र मूर्तिपूजाविषयमुद्दिश्योद्दामविस्फारितवाग्धाराप्रवाहेण शास्त्रार्थमतनोत्।

न्यायसिद्धान्तविदा प्रसिद्धेनाङ्गदशास्त्रिणा पण्डितेन सहाखण्डिते शास्त्रार्थे प्रवृत्ते सति सत्यपक्षरक्षणाक्षमः क्षमी स्वामी तं परास्यन् निजपक्षनिक्षिप्तमकार्षीत्। तेन सोरोंनिकटमटतां कपटपटूनां हठिनां कठिनान्तःपटानां शठानां पाखण्डिभटानां वाग् द्राक् प्रतिरुद्धाभूत्। अङ्गदोपि निर्गताङ्गदः सन् स्वामिभागवतो-१ ऽभवत्। तेष्वेवाहःसु पीलीभीतनिवासिनोऽङ्गदरामाभिधा अपि बुधाः शास्त्रार्थमर्थयमानाः समाययुः। किन्तु हन्त तेपि शास्त्रार्थेऽङ्गदशास्त्रिवन्निरासमीयुः। इत्थमुच्चावचमिथ्याप्रपञ्चरचनाचुञ्चवोऽनेके शाठ्यमूर्तयो धूर्ताः पण्डितंमन्याः संन्यासिवर्यमाचार्यं दयानन्दं निर्द्वन्द्वं सद्वन्द्वाः समुपगम्य व्यपगतमदगदाः सम्पेदिरे-

---

१- प्रसादसहितः। प्रसत्तिः प्रसन्नता। २- स्वामी भगवान् भक्तिरस्य शिवभागवतवत् समासः।

सोरों-स्थानात् प्रस्थाय स्वामी शाहवाजपुरमैत्। तत्र कतिपय-दिवसान् यावदुपस्थितोऽवास्थित। वेदोपदेशं च सविशेषं ततान।

गुरुविरजानन्दयतेर्निधनश्रवणम्

शाहवाजपुरे स्थितिमता स्वामिना हृन्मर्मान्तकृद् दुरन्तोऽयमुदन्त उपलब्धो यन्मदीयो गरीयानभ्यर्हणीयः स्मरणीयो गुरुदेवः श्रद्धाभाजनं सज्जनो महान् पण्डितो दण्डी श्रीस्वामी विरजानन्दो महाभागः पञ्चविंशत्युत्तरैकोनविंशतिशततमे (१९२५) वैक्रमाब्दे कार्तिककृष्णत्रयोदश्यां मथुरायामिदं भौतिकं निःस्नेहं देहं गेहमिव विहाय लोकान्तरमित इत इति। एतदाकर्णनमात्रेणैव विवर्णवदनः सच्छिष्यो दयानन्दः शूलमिव प्रतिकूलमुन्मूलितधृतिकूलंकषा१ कूलमिव चान्दोलितहृच्छोकजलाविलं बहुलमाभीलम२नुभवन्नत्र भवान् आमूलचूलमाकुलो नितान्ततान्तस्वान्तः सन्नवसन्न इमामुच्चैर्वाचमूचे— हन्ताद्य सपद्यविभाव्यभव्यवशाद् भव्याकृतिर्व्याकृति-संस्कृतिसूर्यः स्वसौर्येण तेजसा सहैवाञ्जसास्तमुपागादिति।

वदायूंप्रभृतिस्थानेषु भूयो वैदिकधर्मप्रचारः

ततः प्रस्थाय स्वामी वदायूंमुपायात्। तत्र कार्तिकमासभवे जनसम्मेलने सममिलत्। वदायूंमण्डलाधीशेनापि यतीशः समगंस्त। भूयश्च वैदिकं धर्मं प्राचीचरत्। वदायूंतो नरौलीं कम्पितं च गतोऽकम्पितः कायमगञ्जमाञ्जीत्३। लब्धान्तरो निरन्तरं वैदिकं धर्मं प्रचारयन् ऐकमत्यं च विचारयन् शङ्कापङ्कातङ्कांश्च परिहरन् नरहरिर्यतिवरः फर्रुखावादमुपागमत्। तत्र धर्मप्रचारस्य सातिशयः प्रभावोऽभवत्। श्रीविश्वम्भरनाथादयः शास्त्रगाथापाथोधिमाथा

१- धृतिरूपा कूलंकषा नदी। २- आभीलं कष्टम्। ३- सप्रतिष्ठमगमत।

मण्डिताः पण्डिताः स्वामिना सनाथाः सन्तः सत्पथकथनोपकथनाय तमेवानुनाथितवन्तः। यतिवरसंगमनात् प्राग् एकः श्रेष्ठी नूतनं मूर्तिमन्दिरं सनिष्ठं प्रतितिष्ठापयिषुरासीत्। स खलु यतेः प्रयतेन्द्रियस्य सदुपदेशविशेषाणां प्रभावतः स्वभावतः प्रभावितः परिष्कृतमतिस्तत्स्थाने संस्कृतपाठशालामेव स्थाने१ऽभीष्टां समतिष्ठिपत्। कल्येन२ यतिवरेण तत्र शास्त्रार्थेष्वपि साफल्यमाकल्यत।

कपटपटु-विप्रधर्षणम्

एकदैकः शिवपूजको ब्राह्मणः स्वामिना शास्त्रार्थाय मतिं कुर्वाणः शाठ्यं बिभ्राणस्तत्समीपमुपसर्पन् अपसर्प३ इव सर्पमेकं सदर्पं मूर्तिपूजायै सततकृतसंनिधानायां सभूषायां मञ्जूषायामन्तर्निनाय। अपटुः शास्त्रार्थे कपटी स शठः स्वसामर्थ्यकदर्थितः प्रार्थितं४ प्रस्फुरन्तं तं सविषमाशीविषमाशु स्वामिनो विनाशाय प्रदर्शयन् तेन स्वामिनं बलवत् प्राहरद् व्याहरच्च— एष महादेव एव स्वयं निर्णेक्तं५ निर्णेष्यति यद् भवानवितथपथपथिकोऽथवाहमिति। तथा कुर्वतः सर्वतः खर्व६-धियस्तस्य मनीषेयमुन्मिमेष–एवंविधया सुविधयाहं स्वप्रतिपक्षं क्षेपीयः७ प्रतिक्षिपेयमिति। किंतु स्वामी सावधानः स्वचरणसरसिजानुविद्धं विरुद्धं शैवालमिव८ प्रबलं तमहिर्महिंसन्तमेव सन्तं झटिति घटितपटुतरकरतलाक्षेपाचरणयोः९–र्बलवदाक्षिप्य दूरं न्यक्षैप्सीत्। उच्छेद्यं तच्छिरश्च पार्ष्णिना धृष्णुना धृष्णुवन्नमृद्नात्। अभ्यधाच्चैवम्— ननु भोः! अमुया त्वद्देवतया मयि बहु विलम्बोऽवलम्बितः। मया तु तस्याः क्षिप्रमेव विप्रवासनिर्णयो विहितः। अत्यद्भुतं दृश्यमिदं

१- युक्तम्। क्रियाविशेषणम्। २- स्वस्थेन। ३- प्रणिधिः इव। ४- कृताभियानम्। प्रार्थना स्यादभियाने च। ५- स्पष्टम्। ६- तुच्छमतेः। ७-अतिशीघ्रम्। ८- जलनीली तु शैवालम्। ९- चरणयोः पार्श्वादिति शेषः।

विशेषेण दृश्यमिव पश्यतः पार्श्वस्थान् भूयसो जनान् प्रत्यभिमुखीभूय भूयो यतिवरो गिरमिमामुच्चैरुच्चारयामास— गम्यतां भोः ! सम्वोध्यन्तां च लोका यदनर्गल—कपोलपालिकल्पना—कल्पितानां मिथ्या-देवतानामीदृश्येव गतिर्दृश्या भवतीति ।

नवीनवेदान्ति-मतखण्डनम्

जिनेश्वरभेदवादी यतीश्वरोऽयं नवीनवेदान्तिनां केवलं वाचनिकात् सापवादाद् ब्रह्मवादाज्जुगुप्समानस्तं नारोचयत । तान् प्रत्याचक्षाणश्चैवमाख्यत्— आलस्यमग्नैः श्रमोद्विग्नैर्भग्नोद्योगैर्निरुपयोगैः साधुब्रुवैरसाधुभिरेतैरयं मायावादप्रपञ्चोऽसमञ्जस—मञ्चितोस्ति । एते हि भित्तिभित्ताधावित्तां[१] ब्रह्मसत्तामननुभवन्तोऽप्यहं ब्रह्म जगन्मिथ्येति मिथ्योदन्तं वदन्तो हन्त दिगन्तं समन्तात् तुरन्तं मुदन्तं[२] विधाय भ्रशयन्तो भ्रमन्ति ।

खन्दोर्ह—ग्रामवासी कश्चिच्छत्रसिंहो नाम जट्टस्तस्मिन् प्रघट्टके कृतसंघट्टः स्वामिनः प्रियंकरः सन्नपि दृढं नवीनवेदान्तवादी प्रादुरासीत् । स्वामिसंनिकर्षमुपेतः कृतनमस्कारादिसत्क्रियोऽसौ वेदान्तविषयमालापं कुर्वन् एवं वाणीं बभाण— स्वामिन् ! कामं भवान् यथा तथा कथयतु । किन्त्विदं दृश्यमानं जगद् गगनकुसुमसमानं मिथ्याभिमानम्, स्वप्नसृष्टिवद् भ्रममात्रमसत्यपात्रम्, वन्ध्यापुत्रसमं कल्पितं शून्यजल्पितम्, शशशृङ्गवदसत्यमनादृत्यम् । वस्तुतोऽदः प्रस्तुतवस्तुसंस्तवाभावादवास्तवमेवास्ते । यतिवरस्तद्वचनमुपश्रुत्य स्वहस्तं किंचिदग्रे प्रसार्य विचार्य छत्रसिंहाय मुखे

१- भित्तंशकलम् । आवित्तामुपलभ्यमानाम् । २- मुत् प्रसन्नता तस्यां अन्तकरम् । ३- अवसरे ।

एकां लघु चपेटामददात्। चपेटाघातेन चकितः कपोलं मृद्नन् स प्रोवाच— महाराज ! केवलं सिद्धान्तभेदे विचारपृथक्त्वे वा सत्येव सत्यज्ञानवतां प्रतिभानवतां संमानवतां भवतामेवं कोपावेशवशाद् झटिति चपेटादानं नितरां न शोभते।

स्वामिना तु मन्दस्मितविकसितवदनारविन्देन सता प्रोक्तम्— श्रीमन् ! यदा भवन्निश्चयानुसारं ब्रह्मैवैकं वस्तु सदस्ति। तद्भिन्न-मन्यदसदेव। यच्च किंचिदन्यद् दृग्गोचरीभवति तत्सर्वं मिथ्यैव तदा भवद्भिन्नोऽन्यः को वरिवर्ति यन्मुखावर्तवर्त्ययं[१] चपेटापातो-ऽवर्तत। अत्र भवतो मिथ्यात्वप्रतीतिः कथंकारं नाभूदिति। इत्येव-मुपपत्तिमदूर्जिताश्रयं वचः श्रुत्वा सप्रश्रयं छत्रसिंहः स्वामिनश्चरण-मुपाश्रयत्। उपसंगृह्य च गुणगृह्यः प्रावोचत्— भगवन् ! भवता मदीयं ज्ञानचक्षुरुन्मीलितम्। कीलितं[२] च मिथ्याज्ञानजन्यं तमः। वस्तुतो वयमनुभवशून्या अधन्या एव विलसामः। केवलं वाचाल-बालवद् वाग्जालं सञ्चालयन्तो वेदान्तवादमधिकृत्योन्मत्तप्रलपि-तैरिव वृथाशब्दैर्बुद्बुदायामहे।

साधुगृहमेधिभोजनग्रहणम्

फर्रुखावादे केचन साधुशब्दव्यपदेश्या मनुष्याः प्रतिवसन्ति। ते सर्वे परिश्रमं कृत्वा स्वशरीरयात्रां निर्वहन्तो गृहमेधिनो भवन्ति। तद्धस्तसिद्धमन्नं सम्पन्ना ब्राह्मणवैश्यादयोऽसमञ्जसमिति मत्वा न भुञ्जते। अन्यदा तादृश एव साधुरौदश्वित्कमोदनं[३] स्थाल्यां निधाय परमप्रीत्या ससंमानं स्वामिनं भोजयितुमानयत्। यतिवरस्तदन्नं प्रसन्नः सन्नगृहीत्। तेन कर्मणा तत्रत्या ब्राह्मणा भृशमसन्तोषं दोषं च पुष्णन्तः स्वामिनमभ्यधुः— स्वामिन् ! भवांस्तु साधोरप्यसाधोरस्य

१- मुखमेव आवर्तः तद्वर्ती। २- विनाशितम्। ३- उदश्विता तक्रेण संस्कृतम्।

जनस्य भ्रष्टं भोजनमुपादाय भ्रष्टोऽजनि। भक्ष्याभक्ष्यविचारवतां भवतां मतिमतां सतां न कदाप्येतदुचितमासीत्। स्वामी प्रहसन्नाह–किमुच्यते भोः! अन्नं हि द्विधा दुष्यति। एकं परक्लेशदानेन लब्धम्। अपरं च मलिनवस्तुसंश्लिष्टम्। एतदुभयमप्यत्र नास्ति। एतेषां साधूनामन्नं परिश्रमेणोत्पन्नत्वात्पवित्रतासम्पन्नमेव। अतस्तस्योपादाने न मनागपि दोषलेशावकाशः।

भीष्मस्य गङ्गानदीपुत्रत्वनिषेधः द्वयोर्वेलयोरेव सन्ध्योपासनं च

तत्रैव शान्तनवो भीष्मो गङ्गानद्याः पुत्र आसीदिति मतमुपपत्तिविरुद्धत्वाद् विशुद्धमतिर्यतिरसौ प्रत्याचख्यौ। गङ्गानाम्न्याः स्त्रियाः पुत्रत्वे तु न कापि क्षतिरिति चोवाच वाचमुचितां रुचिताम्। प्रातः सायं द्वयोरेव कालयोः सन्ध्योपासितव्येति सिद्धान्तं निबन्धयन् महाभारतवर्णितं द्वारकातो हस्तिनापुरं प्रयातः श्रीकृष्णस्य यात्राप्रसङ्गमुदिङ्ग्य साधु साधयामास।

यवनप्रश्नोत्तरम्

एकस्मिन्नह्नि सन्निहिते तृतीये यामे चतुःपञ्चाः सप्रपञ्चा यवनाः स्वामिनिकटमटित्वा पप्रच्छुः श्रीमुहम्मदमहोदयः परमेश्वरेणास्मन्निमित्तं प्रेषितः इत्यत्र विषये सूक्ष्मदृशो भवतः कीदृशो विचारः। यतिवरस्तदुत्तरं ददत् त्रिरवोचत्— मद्वचनाद्भवद्भिरप्रसेदिवद्भिर्न भाव्यम्। अहं हि मुहम्मदं सम्मानास्पदं न मन्ये। भवद्भिरपि न साधुकृतं यत् तदनुयायिनो जाताः। यदा शिखैव च्छिन्ना तदातिदीर्घत्वावच्छिन्नाविच्छिन्नश्मश्रुकूर्चमूर्छनेन[1] को लाभः।

हरिगोपालशास्त्रिणः पराजयः, ज्वालाप्रसादस्य मानमर्दनं च

नामधारिब्राह्मणानां निराकरणं कुर्वता यतिवरेण गुण-

---

१. मूर्छनेन वर्धनेन।

कर्मानुगुणमेव ब्राह्मणो भवतीत्यभाणि वाणी। तामाकर्ण्य पुरवासिनो ब्राह्मणाः सातिशयं क्षुभिताः कुपिताश्च सन्तो निजरक्षार्थं ते मयराष्ट्रपुराद्१ हरिगोपालशास्त्रिणमाकार्याहार्यमचेष्टन्त। निश्चयास्तं शास्त्रार्थयुद्धाय संनद्धं चक्रुः। शास्त्रसमराय स्वामिनो दुर्निवारं द्वारं तु सर्वदैवानिरुद्धप्रसारमासीत्। अतः पौराणिकपण्डितानामेको महान् जनौघः सप्रौढि तत्रोपडुढौके। पीताम्बरदासः पण्डितो मध्यस्थो नियतोऽभूत्। अनिश्चितरक्षं पूर्वपक्षं स्थापयन् हरिगोपालः शास्त्री निजगाद— स्वामिन्! मूर्तिपूजाविधानं तु सोपधानं२ कृतोपस्थानं सर्वग्रन्थेषूपलभ्यते। तत् किमिति भवान् मुधा बुधस्तत्खण्डनं विधत्ते। स्वामी प्रत्युवाच— उच्यतां भवद्भिः विद्वद्भिः कस्मिन्नार्षग्रन्थे मूर्तिपूजाविधानं कृताधानमस्तीति। तदा शास्त्री देवताभ्यर्चनं चैव समिदाधानमेव च मनु २.१७६ इति मनुस्मृतिवचनमुद्हरन् तत्रत्य देवतार्चनशब्देन प्रतिमापूजनमित्यर्थं समर्थयामास। अनन्तरमुत्तरन् यतिवरस्तत्पक्षं प्रतिक्षिपन् अखण्डितमण्डितपाण्डित्यः प्रकरणानुक्रमेण, व्युत्पत्त्युपपत्तिभिः, युक्तिप्रयुक्तिभिश्च स्वं मतं शास्त्रसंमतमुपपादयन्नाह— अत्र देवतार्चनशब्दस्याग्निहोत्रविधाने विद्वदतिथिसंमाने च तात्पर्यं पर्यवस्यतीति। एतच्छ्रुत्वा कृच्छ्रापन्नः शास्त्री सुतरां निरुत्तरत्वान्निगृहीतो भीतो रोषाविष्टः पलायिष्ट। पत्काषी३ स काशीमितः प्रकाशं विद्वत्सकाशं निजाशयं प्रकाश्य मूर्तिपूजनपुष्टावदुष्टां पुष्टां तत्रत्य पण्डितकृतहस्ताक्षरजुष्टां स्पष्टां व्यवस्थामवाप्य ततः स्वस्थः प्रतस्थे। स्वामिनिकटमाट्य च नाट्येन शाठ्येन परीतो विपरीतोऽतिप्रकटे विशङ्कटे भूतलस्थले पताकामुत्तोल्यान्तर्निहितशल्यान्निजानुगांस्तद् व्यवस्थापत्रमशिश्रवत्। न चिरात् तत्र सहस्रं मनुष्याः

१- मेरठनगरात्।   २- सोपबर्हम्। सप्रमाणमिति यावत्।
३- पादाभ्यां कषति तच्छीलः। पदिक इत्यर्थः।

संघीभूयावतस्थिरे। विपुलकोलाहलकाहलं१ विकलं च तत्स्थलमभूत्। शास्त्रिप्रयुक्तैश्छलप्रपञ्चरचनाञ्चितैः पौराणिकैरभियुक्तैरनुक्षणं स्वामिसमीपं मनुष्यः प्रैष्यत यदनावृतेऽत्र विवृते प्रदेशे समागम्यताम्। शास्त्रार्थरणाय चाह्वाय संनह्यताम्। स्वामी तु तेषां कपटकौशलं पेशलं सम्यगजानात्। अतः केवलं कोलाहलाकुलानामुच्छृङ्खलानां खलानां संकुले कुले गमनमनुचितं मत्वा तत्र न जगाम। पुनः पुनः पर्यनुयुज्यमानश्चाप्तसमज्यः२ सावज्ञमवादीत्— यूयमवःस्थिता एव किमिति मुधा शब्दायध्वे। यदि शास्त्रार्थकण्डूयाचिखण्डयिषास्ति तर्हीहस्थोऽहं तत्खण्डनताण्डवपण्डितः संनद्धोस्मि। तत्प्रतिवचने हरिगोपालः सविस्मयं स्मयमान आह— नाहं दयानन्दस्य निवासस्थानमुपैष्यामि। तत्र गमनान्निश्चितो मे पराजयोऽवश्यं भविष्यतीति।

अधिगतैतदत्युज्जृम्भितकोलाहलवृत्तो मण्डलाधीशः संजाताशङ्कस्तमातङ्कं प्रशमयितुं कोटपालं तत्कालमादिक्षत्। कालकरालः कोटपालस्तु लब्धादेशो धृतनिजवेशो यतीशनिवासस्थानं प्रत्यागमत्। सुधीशं यतीशं च बहिः स्वसमीपमाकारयत्। यतिवरस्त्वन्तःस्थित एवास्त। आकारितोपि बहिर्नायात्। अन्ते श्रीलालजगन्नाथेन कोटपालः प्रोक्तः—हंहो स्वार्थत्यागिनं संन्यासिनं भवान् स्वविधेयं विगेयमिव३ मत्वावधीरयन्नेवमाकारयति। नैतदुचितम्। सर्वथा निरपेक्षोऽयं वीतरागो महाभागो भवतः किमपेक्षते। अतः सापेक्षेण भवतैव तत्समक्षं गत्वा समीक्षणीयोऽयं महाप्रभावो महानुभाव इति। तदनु कोटपालः स्वयमेव स्वामिसमीपमुपगम्य नम्यो रम्यामिमां गिरमुज्जगार— अयि भिक्षो! कोऽयं कुतोऽयं

१- काहलं व्याप्तम्। २- प्राप्तकीर्तिः। समज्या कीर्तिः सभा च।
३- निन्द्यमिव।

भैरव आरवः सम्प्रवर्तते इति। यतिवरस्त्वनुत्तरमुत्ततार१— वयं तु स्वस्थाने एव स्थाने तिष्ठामः। न च कंचन किंचित् कटुवचन-मुच्चारयामः। न केनापि कलहं कलयामः। कुवचनरचनाञ्चित-वाचोऽभितः प्रवाचोर वञ्चका मामचोद्यं चोदयन्ति। तथाप्यह-मदूनो३ मौनमाकलयन् शान्तस्तिष्ठामि। भवन्तो राजकर्म-चारिणोऽधिकारिणो भवन्ति। इदं भवतामेव कर्तव्यमापतति यत् तत्र गत्वा स्वच्छं पृच्छेयुः क उग्राः समग्रं व्यग्रयन्तः परितो भैरव-मारवमारचयन्तीति। कोटपालोऽन्ततः समन्ततः सन्ततां यथार्थां वस्तुस्थितिं विज्ञाय विज्ञवरस्वामिसकाशं प्रकाशं द्वावारक्षिकौ नियुक्तवान्। येन कश्चित् क्षुद्राशयः सोपद्रवोऽभद्रो दानव इव मानवो निरुपद्रवं भद्राशयं महात्मानं नोपद्रवेदिति। तत्र कोलाहले कृतोत्फालं हरिगोपालं चाहूय भूयो भयवर्जं गर्जं गर्जं तथाततर्जद् यथा स भीतभीतः पीतगर इव तस्मान्नगरादाशुतरमपासरत्। गते तस्मिन् धूर्ते मूर्तः प्रमाद इव सोन्मादः सत्पथविमुखस्तत्सखो ज्वालाप्रसादाभिधोऽबुधः पीतस्फीतमदिरो मुहिरः४ प्रतिद्वन्द्वी-भूयासन्दीमेकामादाय स्वामिनिकटमाटत्। पुरः संनिधापितां च तामध्यास्य निरर्गलं विशृङ्खलं गलस्खलद्वचोऽश्लीलं स चंचलो-ऽनल्पं जल्पितुमारभत। उपस्थितैः सभ्यैस्तथा कर्तुं प्रतिषिद्धोपि विरुद्धोऽसौ गालिप्रदानान्न विरराम। मणिलालादयः स्वामिनः प्रैष्या अदृश्यं तद् दृश्यमवेक्ष्य कोपावेशविवशाः समुद्गूर्णदण्डा-स्तमुद्दण्डं प्रचण्डं दण्डयितुमुत्तस्थुः। उन्मत्तोऽयं न किंचिद् वक्तव्य इत्येवं ब्रुवत्यपि यतीश्वरे प्रखरतरकरचरणप्रहारेण तडिन्निभां विभां निदर्शयन्तो दृढां निविडां वचोभङ्गीमङ्गीकृत्य ते

१-न विद्यते उत्तरः उत्कृष्टो यस्मात् तथाविधमिति क्रियाविशेषणम्।

२- प्रवक्तारः। ३- अखिन्नः। ४- मूर्खः।

तमतितमामतीतडन् । तदीयां विनिन्दितामासन्दीं च वह्लावह्लाय१ संनिधाय भस्मसाच्चक्रुः । अन्येद्युः श्रीलाल-जगन्नाथः स्वामिसकाशमायातः । विदितवृत्तान्तोऽभ्यधात्— महाराज ! यदि स दुष्टो रुष्टः सन् न्यायाधिकरणं राजद्वारमुपेत्य स्वकठोरताडनसहकृतावधीरणानिवारणाय कृतोद्योगोऽभियोगद्वारेण भवत्सेवकानामधिकरणं२ सम्पादयेत् तत्र च यथावृत्तं वृत्तं प्रष्टुं साक्षित्वेन भवानाकार्येत तदा श्रीमान् किमभिधास्यति । स्वामी प्रत्यूचे— नाहं तथ्यं मिथ्या करिष्यामि । यद् यथावृत्तं तत् तथैव सत्यपथप्रवृत्तोऽभिधास्यामि । तदनन्तरं जगन्नाथः श्रीचरणयोः प्रणतः सविनयमवदत्— भगवन् ! क्षुद्रा इमे विकृतमतयः प्राकृता जना भवदीयममूल्यं जीवनमूलमुन्मूलयितुमाहितयत्नाः प्रकटितविक्रममप्यत्रभवन्तं मर्यादामतिक्रामन्तः पुनः पुनराक्रामन्ति तेन भवन्तोऽस्मद्‌भवनस्याभ्यन्तरप्रदेशस्थमावासमित्वा तत्र निवासमभ्युपयन्तु । यतिवरोऽवादीत्— अयि प्रेयन् ! इह तु भवान् मामेवं सुरक्षया रक्षिष्यति किंत्वितोऽन्यत्रगतस्य मे रक्षां को विधास्यति । मम रक्षणं तु विलक्षणो भगवान् देवाधिदेवः परमात्मैवाप्रमत्तो विधत्ते । अतोऽहं सर्वथा वीतभयोऽस्मीति ।

ओझोपपदेन हलधरेण सह शास्त्रार्थः

हरिगोपालशास्त्रिणः पराजयादुद्विजमानाः साभिमाना अपि गतमानाः समुचितसज्जाभावाल्लज्जाम्बुनिधौ निमग्ना भग्नाशा दुरभिलाषाः पौराणिकपण्डिताः स्फुरदहंकारफूत्कारं विषमं विषधरमिव हलधरमोझोपपदमनुपदं कर्णपुरात् स्वनिकाय्यमानाय्य३

१- अह्लाय शीघ्रम् । २- अधिकं रणं कलहमित्यर्थः । ३- निकाय्यो निवासः ।

यतिवरप्रतिरोधाय पुरोधाय शास्त्रार्थसमरभुवि समवतारयामासुः। मूर्तिपूजनमुद्दिश्य विशिष्य शास्त्रार्थोऽभूत्। हलधरस्तु हलधर इव[१] हालारसिकस्तान्त्रिकमन्त्रनियन्त्रणचुञ्चुर्हालाहलयोरुभयोः संमेलनाद् यतिवरं प्रति हालाहलभावं[२] धारयन् प्रतीये। वादोपक्रमे कृतक्रमः स सुरापाणमेवादौ संभाषणपणं पेणे। मदिरापानं वैधं समर्थयन्नसौ 'सौत्रामण्यां सुरां पिबेद्' इति वचनं प्रमाणत्वेनोपन्यस्तवान्। स्वामी तु हलधरपक्षे दोषोन्मेषमुद्घोषयन्नाह—न खल्वनेन भवद्वचनेन यज्ञे मदिरापानविधानं सिध्यति। अत्र सुराशब्दस्य सोमलतारसात्मके तात्पर्ये पर्यवसानात्। ततो हलधरः स्वामिनं संन्यासिनो लक्षणं पप्रच्छ। सल्लक्षणो यतिवरस्तल्लक्षणमुदाहृत्य तं ब्राह्मणस्य लक्षणमप्राक्षीत्। तस्योत्तरमप्रतिपद्यमानो दुरभिमानोऽसावधरोत्तरमकरोत्[३]। तदा यतिवरः प्राह- प्रकरणाद् बहिर्न गन्तव्यम्। प्रस्तुतं विषयमधिकृत्यैवोच्यताम्। हलधरस्तु यथाकथंचिन् निजत्राणमिच्छुर्विच्छिन्नमतिरित्थं वाचमुत्थापयामास- प्रकरणशब्दमसकृदुच्चारयन् भवान् स्पष्टमिदं पृष्टो व्याचष्टां प्रकरणशब्दः कथं निर्माणमेति?

यतिवरः- प्रपूर्वात् कृधातोः ल्युट् प्रयये कृते प्रकरणशब्दः सिध्यति।

हलधरः- कृधातुः समर्थोऽसमर्थो वा ?

स्वामी-समर्थ एवासौ।

हलधरः- समर्थ इत्युच्यते, कः समर्थो नाम ?

स्वामी- सम्बद्धार्थः समर्थः, संसृष्टार्थः समर्थः, संप्रेक्षितार्थः समर्थः।

१- बलराम इव। २- हालाहलं विषम्। ३- अनौचित्यमधरोत्तरम्।

व्यतिरेकेण तत्समर्थनाय सापेक्षमसमर्थं भवतीति महाभाष्यकारवचनमत्र प्रमाणम् ।

हलधरः-नेदं महाभाष्यकारवचनं, किं तर्हि ? भवतः स्वमनीषिकयोत्प्रेक्षितत्वाद् रिक्तं वचः । तदानीमेव स्वामी महाभाष्यं पुरः प्रकाश्य द्वितीयाध्यायस्य प्रथमाह्निके तद्वचनमदीदृशत् ।

हलधरः- नाहमिदं प्रमाणीकरोमि । यतोऽहं महाभाष्यकर्तुर-पेक्षया महत्तरो विद्वत्तरोस्मि । मदीया विद्याप्यनवद्या तत्तुल्यकक्षामवगाहते ।

स्वामी- अयुक्तमेतत् । त्वदीया विद्यापि सावद्या विना विनयसम्पदम् । महाभाष्यकर्तुः पतञ्जलेः प्राञ्जलमञ्जुलवाचः संमुखे भवानतीव क्षोदक्षमः क्षोदीयान् प्रतीतो भवति । इत्येवमुभयोर्वादिनोश्चिररात्राय शास्त्रार्थः प्रववृते । अन्ते सर्वसंमत्येदं निर्णीतं यत् 'समर्थः पदविधिः' (पा. २. १. १.) इति व्याकरणसूत्रं यदि सर्वत्र पदसम्बन्धिविधौ प्रवर्तेत तर्हि स्वामिनो विजयः । इतरथा केवलं समास एव तत्प्रवृत्तौ हलधरस्य विजयः स्वीक्रियेतेति । अग्रिमे दिनेऽव्यग्रः स्वाम्युदग्रं हलधरं समग्रजनसंमुखं शास्त्रार्थाय संनद्धं बद्धपरिकरमुदीक्ष्य प्रहसन्नुवाच— प्रियवर हलधर ! दृश्यतामिदं चक्षुःप्रकाश्यं महाभाष्यम् । यत्र समर्थः पदविधिरिति सूत्रं सर्वत्र पदविधौ प्रवृत्तिमत् प्रदर्शयन्नाह स्म भगवान् भाष्यकारः —एकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति । विभक्तिविधानं पराङ्गवद्भावश्चासंगृहीतः (महाभाष्य २. १. १.) इत्यादि । एतेन किमायातम् ? इदमत्रायातम्—यत् समासवदन्येपि कर्मण्यण् (पा. ३. २. १.) अत इञ् (पा. ४. १. ९५.) प्रभृतयः कृत्तद्धिताः पदविधयः समर्था एष्टव्याः । तेपि सामर्थ्ये सत्येव स्युर्न त्वसामर्थ्ये । यथा महान्तं

कुम्भं करोतीत्यत्रासामर्थ्याद् अण् न भवति। एवं चैतत्सूत्र-प्रवृत्तिर्न केवलं समास एव, प्रत्युत सर्वत्रापि पदसम्बन्धिविधौ निर्बाधा सिद्धा भवतीति१।

हलधरस्तु श्रुत्वैतद्युक्तिप्रमाणोपपन्नं वचो व्युत्पन्नमतेर्यते-रुत्पन्नव्यामोहो दुरारोहोद्भटपाण्डित्यसोपानः सोपानत्कोपि निरुपानत्कमिवात्मानं मन्यमानः खिन्नमना मौनमाकलयत्। अप्रतिपन्नोत्तरोऽसौ सर्वैरैकमत्येन स्वामिसमक्षमक्षमो वक्तुं व्यक्तं पराजितः समुद्घोषितः। लब्धापयशश्चयश्च यः सूच्या विद्ध इव क्रुद्धो विरुद्धो मूर्तिमद्दुष्कीर्तिपिशाच्या वाच्यतां नीतो भीतोऽप्रतीतो निजगृहं प्रतीतः। एवं कर्णपुरेपि मण्डलाधीशाङ्गल– श्रीथेन–महाशयस्याध्यक्षतायां लक्ष्मणशास्त्रिणा हलधरेण च सह यतिवर्य-स्यात्युत्कटः प्रकटः शास्त्रार्थोऽभूत्। तत्रापि यतिवरस्यैव प्रवरा विजयवैजयन्ती समुदमुदलसत्। श्रीथेनमहोदयः सुहृत्संमितां

१- समर्थः पदविधिरितिसूत्रभाष्ये यद्यप्येकार्थीभावः सामर्थ्यमधि-कारश्च, व्यपेक्षा सामर्थ्यमधिकारश्च, द्विविधं सामर्थ्यमधिकारश्च, एकार्थी-भावः सामर्थ्यं परिभाषा च, व्यपेक्षा सामर्थ्यं परिभाषा च, द्विविधं सामर्थ्यं परिभाषा चेत्येवं षट्पक्षीसंभवे एकार्थीभावः सामर्थ्यं परिभाषा चेत्येष एव पक्षः सिद्धान्तशय्यामधिशायितः। उक्तं च भाष्ये—एकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति, विभक्तिविधानं पराङ्गवद्भावश्चा-संगृहीतः व्यपेक्षायां पुनः सामर्थ्येऽधिकारे च सति विभक्तिविधानं पराङ्ग-वद्भावश्च संगृहीतो भवति, समासस्त्वसंगृहीतः। व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां समास एकोऽसंगृहीतः। तत्रैकार्थीभावः सामर्थ्यं-परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवतीति।

तथापि व्यपेक्षां विनैकार्थीभावस्यासंभवत्वान्नान्तरीयकत्वादेकार्थीभावेन

मितां निजसंमतिमित्थमनवाहित्थमकपटं प्राचीकटत्— मान्या महाशयाः ! मदीयसंमत्यामत्यन्तायानुबद्धेऽत्र शास्त्रयुद्धे श्रीमान् स्वामी दयानन्दः सरस्वानपि सरस्वतीरूपः संन्यासी लसदभ्युदयं विजयं लेभे। तस्य वाचोयुक्तयो वेदानुसारिण्यो हृदयहारिण्यश्चासन्। अहं तत्समक्षं प्रतिपक्षं प्रतिक्षिप्तं मन्ये।

रथोद्धत वृत्तम्

धूनयन् प्रखरवाग्रथोद्धतान्,
कर्णसिंहसमजिह्मगानुगान्।
तर्जितानकृत मूर्तिपूजकान्,
नास्तिकांश्च्युतगभस्तिकानृषिः ॥१॥

इति द्वितीय उल्लासः।

सह व्यपेक्षामप्युन्नीय द्विविधं सामर्थ्यं परिभाषा चेत्येष एव पक्षो भगवतो भाष्यकारस्याभिमतो द्रष्टव्यः। इसुसोः सामर्थ्ये पा० ८-३-४४ नित्यं समासेऽनुत्तरपदस्थस्य (पा. ८-३-४५) इत्याभ्यां सूत्राभ्यां व्यपेक्षैकार्थीभावयोर्द्वयोः सामर्थ्ययोः स्पष्टमुक्तत्वात्। तेन व्याकरणे यावान् पदगन्धो नाम स सर्वः संगृहीतो भवति। एवं चैतत्सूत्रप्रवृत्तिर्न केवलं समास एव, प्रत्युत सर्वत्रापि पदसम्बन्धिविधौ निष्प्रत्यूहमूहितव्या भवति। इतरथा केवलैकार्थीभावे सामर्थ्ये परिभाषायां च सत्यां समास एवेदं सूत्रं प्रवर्तेत, नान्यत्र पदसम्बन्धिविधौ। अत एवैकार्थीभावे सामर्थ्येऽधिकारे च सति पराङ्गवद्भावविभक्तिविधानासंग्रहरूपो यो दोषो भाष्यकृता प्रोक्तः स एकार्थीभावे सामर्थ्ये परिभाषायां च सत्यां नोक्तः। एतत्सूत्रस्य केवलं समास एव प्रवृत्तौ सत्यामेकार्थीभावे सामर्थ्येऽधिकारपरिभाषयोरविशेष एव स्यात्। सर्वत्र पदविधेः समर्थस्यैवेष्टत्वात् समासादन्येषां पदविधीनामपि संग्रहणं भगवानिष्टं मन्यते इति प्रत्येतव्यम्।

अथ तृतीय उल्लासः

वसन्ततिलकं वृत्तम्

नारायणैकशरणः करुणापरोऽयं,
प्रोद्धूतधूर्तजनहूर्ति[1]रुदीतकीर्तिः ।
सर्वातिशायिनिगमाशयमाशु शंसन्,
काशीनिवासिविबुधान् विविधाञ्जिगाय ।।१।।

काशी–शास्त्रार्थः

फर्रुखावादात् प्रस्थितः स्वामी कर्णपुर-जलालाबाद-कान्य-कुब्जादिषु पर्यटन् अनितरसदृश्यां काश्यां नैकदृश्यान्तराश्चर्यकर्यां महापुर्यामुपाययौ। भरतपुर-रीवां-नरवादिनरेशा अपि लसद्वेशाः कार्यविशेषात् कृतसंनिवेशास्तत्र विरेजुः। महानगर्यामार्यधर्मधुर्यस्याचार्यवर्यस्य यतेः प्रचुरं प्रचरन् वेदोपदेशः सविशेषमशेषमनीषिमानुषहृद्देशं प्रविवेश। तत्र विविधवर्गजा दिग्गजा इवोद्भटाः प्रतिभटाः स्फुटं स्वामिना सह शास्त्रार्थं घटयितुं प्रकटितविकटवाग्गदा[2] वाग्गुदा[3] इवाहितवाग्गुदागदाः[4] संव्यूदिरे[5]। आनन्दारामेऽभिराम आर्यमहोत्सवः समुज्जृम्भते स्म। येन धर्मप्रचारः स्फारीभवन् परितः प्रास्फुरत्। महोत्सवोत्स[6]समुत्सुका लोकाः प्रकाममकामयन्त यद्यतिवरोऽयमत्रत्यैः प्रसिद्धैः शास्त्रवृद्धैः प्रबुद्धैः प्रतिबद्धः

१- हूर्तिः कौटिल्यम्। हूर्छा कौटिल्ये इत्यस्मात् क्तिन्। राल्लोपः (पा० ६.४.२१) इति छस्य लोपः। २- प्रकटिता वाग्रूपा गदा शस्त्रविशेषो यैः। ३- कुत्सितः पक्षिविशेषः। चमगादड़ इति भाषायाम्। ४- आहितो वाचि गुदायां च गदो रोगो येषाम्। ५- संवादेन चकाशिरे। सम्पूर्वाद् वदतेर्भासनेऽर्थे आत्मनेपदम् (पा.१.३.४७) ६- महोत्सव एव उत्सः प्रस्यन्दः तत्र समुत्सुकाः।

शास्त्रार्थयुद्धमनुरुन्ध्यादिति । वाराणसेयरामनगराधिराजो महा-राजोपि समुदमिदमुदीक्षमाणस्तस्थौ यत् काशीस्थपण्डितानां स्वामिना सह मुख्यं सांमुख्यं स्यादिति । अखण्डब्रह्मचर्यश्चारुचर्यः शौर्यवीर्यवान् आचार्यवर्यः सर्वतोनुवृत्तामिमां यदा निजकर्णाभ्यामा-कर्णयत् तदासौ यतीशः काश्यधीशं प्रति सन्देशमिमं तत्क्षणं प्राहिणोत्—तत्रभवता मूर्तिपूजादिविषयानुद्दिश्य विशिष्य जुष्यमदूष्यं शास्त्रार्थं कारयित्वा सत्यासत्यनिर्णयः करणीय इति । अधिगत-यतिवरसन्देशो व्यपगतकद्वेशो नरेशोपि कृताभिनिवेशो विशेषेण पदार्थयाथार्थ्यावगमाय शास्त्रार्थमर्थयमानस्तत्रार्थे समर्थानामर्थिनां कृतलक्षणानां विचक्षणानां दक्षिणारक्षणाद्यर्थितसमर्थकमर्थभार-प्राग्भारं१ सकलमविकलमेकल एवोद्वहन् षड्विंशत्युत्तरैकोनविंशति-शततमे (१९२६) वैक्रमाब्दे कार्तिकशुक्लद्वादश्यां कृतमङ्गलो मञ्जुलं मङ्गलाख्यं वारं साधिकारं वितताधिकरणाय शास्त्ररणाय निरणैषीत् ।

अकुण्ठितकण्ठपीठीस्थापितोच्चावचसंस्कृतपुस्तकराशिरूर्जित-भाषी यशोभिलाषी पत्काषी काशीवासी शास्त्रार्थकलानिपुणः प्रगुणगुणो विद्वद्गणः कृतादेशेन नरेशेन प्रवराय शास्त्रसमराय समुद्योजितः । सुसंविधानं शास्त्रार्थस्थानं च विनिश्चेतुं नगरकोट-पालः श्रीरघुनाथसहायः प्रकाशं स्वामिसकाशं प्रेषितः । स्वामिना तु कोटपालं निभाल्येदं वचनमुपन्यासि— संन्यासिसामान्यान्मान्यो-ऽहमन्यस्य कस्यचित् स्थानं विवादाय नोपैमि । किंतु स्थितिवशाद-वशेन मया शक्येतान्यत्र कुत्रापि गन्तुमनुमन्तुम् । अनन्तरमानन्दा-रामस्थानं शास्त्रार्थोपस्थानाय स्थाने निर्णीतम् । कैलाशकाश-नीकाशकाशीयशःप्रकाशकाः२, समिद्धबुद्धि विशुद्धानन्द-बालशास्त्रि-

---

१- प्राग्भारः राशिः । अर्थभारसमूहम् इत्यर्थः । २- नीकाशम् सदृशम् । कैलाशः पर्वतः । काशः पुष्पविशेषः । कैलाशकाशसदृशं तत् काश्या यशः तस्य प्रकाशकाः ।

प्रभृतयः, कृतमतयः, प्लुतगतयः, प्रोद्दण्डाः, प्रचण्डाः, दण्डमण्डिताः, पण्डिताः काशीनरेशसहिताः, महता प्रबलेन बलेन संवलिताः, कलितालीकानल्पकल्पनाः, कल्पनान्तकठोराः, घोराः स्वप्रतिभया प्रतिभयाः[१] सन्तोऽसन्तोषपराहताः, हताहता इवोत्पथपतिताः, सतताहृतप्रस्तरमूर्तयो धूर्तास्तथाकथिताः प्रथिताः, वितथाचारकथा-कथकाः, व्यथकाः, समुदितमदोपहताः प्रहतानेकपटुपटहा नियते समये प्रयतेन्द्रियेण यतीन्द्रेण सह शास्त्रार्थमव्यर्थं समर्थयितुं नचिरादुपतस्थिरे। प्रत्यूहव्यूहापोहनाय राजकीयरक्षापुरुषाध्यक्षोऽपि प्रत्यक्षं स्वमासनमहीनं वितन्वन्नवतस्थे। वादारम्भे ह्युपलम्भ्यः[२] स्वाम्यरोषणो घोषणामिमामकारयद्— एकस्मिन् काले एक एव पण्डितो मया सह वादमातनुयात्। वेदचतुष्टयं च विहाय नान्यद् ग्रन्थजातं प्रमाणकोटावाटीकयेद् इति। अथोभयपक्षतः प्रोक्त-नियमपालनमभ्यनुज्ञाय प्रववृते शास्त्रार्थः। स्वामिना मनुप्रोक्तं धर्मलक्षणं पृष्टो विशुद्धानन्दः खल्वपलक्षणं व्याजहार। चोदना-लक्षणोऽर्थो धर्मः (मीमांसा १.२) इति मीमांसाकृज्जैमिनिमुनि-संमतं धर्मलक्षणं सम्यग् ब्रुवन्नपि स मनुस्मृत्युदितं दशलक्षणकं धर्मं विदितं न चक्रे इति महदाश्चर्यम्। बालशास्त्री चाधर्मलक्षण-मनुयुक्तः किंचित् प्रत्युत्तरं न लेभे। ताराचरणमाधवाचार्यादीनाम-प्येवं भूतैव गतिर्भूता। ततः प्रतिरुद्धैर्विरुद्धैर्युगपत्समवेतैः प्रति-वादिभिः प्रतिमाशब्दस्य वेदेऽस्तित्वं पृष्टः स्वामी हृष्टः सम्यक् स्वच्छमुत्तरं यच्छन्नाह स्म— प्रतिमाशब्दस्तु वेदे वर्तमानो जागर्ति। 'न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः' (यजुः ३२.३) इति यजुर्वेदीयद्वात्रिंशदध्यायस्य तृतीयो मन्त्रोऽत्र प्रमाणम्। किन्तु प्रतिमाशब्दस्य प्रस्तरनिर्मितपरमात्ममूर्तिपूजनविषयको योऽर्थो-

---

१- भयङ्कराः। २- उपलम्भ्यः प्रशंस्यः। उपात्प्रशंसायाम् (पा.७.१.६६) इति उपपूर्वाद् लभेर्ण्यति नुमागमः।

भवद्भिरभिप्रेयते तस्यार्थस्य वेदे सर्वथाऽभाव इष्टो द्रष्टव्यः । प्रतिमापूजनविधेरवैदिकत्वेनाविधेयत्वात् । 'अकायम् अव्रणम्' (यजु० ४०.८) इत्यादिवेदोक्तिभिः सह व्याघातापाताच्च । निराकृतेराकृतिः कथंकारं संभवतीति स्वयमेव प्रेक्षयोत्प्रेक्षणीयं१ प्रेक्षावद्भिः ।

प्रस्तुतमन्त्रस्य तु वस्तुभूतोऽयमर्थः प्रस्तोतव्यो भवति— यस्य परमात्मनः प्रभोर्महन्नाम यशश्च विद्यते, यो महतां नाम्नामग्नीन्द्र-मित्रवरुणादीनां यशसामन्नानां च सम्पन्नानामविपन्नो धारयिता प्रतिपन्नोस्ति तस्याचिन्त्यशक्तेर्महेश्वरस्य प्रतिमा प्रतिमानं सादृश्य-मुपमानं वा नास्तीति । अनुपमोऽप्रतिमश्च भगवान् निरतिशयशक्ति-शाली न केनाप्युपमेयो भवितुमर्हति । अन्यत्राप्याम्नाये समाम्नायि बहुधायमर्थः । तद्यथा— न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते (यजुः २७.३६) ।। न हि त्वा कश्चन प्रति ।। इत्यादीन्युदाहरणानि व्याहरणीयानि द्रष्टव्यानि । मन्ये भवद्भि-श्चिररात्राय प्रध्वंसितान्धतमसखेदा वेदा नाध्यगायिषत । केवलं पुराणवाणीवीणयैवोपगायतां सतां वः कालोऽत्यगात् । अनभ्यासेन वेदानामाचारस्य च वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जि-घांसति ।। (मनु० ५.४) इति मनुस्मृतिवचनमपि न स्मृतिविषयीकृतं प्रतीयते । इतरथेयमीदृशी दुर्दशा न दरीदृश्येत । इत्थमनवहित्थ२-मुपदिशतः प्रहृष्यतो महर्षेरनुपमां सुषमामुन्मीलितामीलितां३ सुशीलां वाक्शैलीं च परिशीलयतां प्रतिपक्षिणां पक्षः प्रतिक्षणं क्षीणतां गतः । तेषां यशोऽभ्रश्यत । तेजो न व्यराजत । म्लानं मनोऽभूत् । मलिना च मनीषा न समुन्मिमेष । समस्तैरपि विहस्तैस्तैः४

१- प्रेक्षा बुद्धिः । २- अनवहित्थं स्पष्टम् । अवहित्था आकारगुप्तिः ।
३- स्तुत्याम् । ४- व्याकुलैः ।

कियन्तंचित् कालं त्वालम्बितनियमपालनं विहितम्, किंत्वन्ते भविष्यन्तं निजपराजयमुदीक्ष्य क्षतोत्साहैः सकृदेव सर्वैः संभूय भूयानारावोऽकारि । प्रस्तुतमुपस्थितं विषयमुत्सृज्य कश्चिन्न्यायविषयिणीं चर्चामचर्चयत् । कश्चिच्च व्याकरणभणितिमभाणीत् । कोपि कोपी कौपीनवन्तं भगवन्तं स्मृतिविषयं प्रश्नमपृच्छत् । अपरस्तदितरः पुराणवाणीमुपावीणयत् । एवं घण्टाचतुष्टयावधि सोपधि१ विविधं वैतण्डिकत्वं मण्डयित्वातिबहुलचपलकोलाहलकलनानन्तरं सकला अपि विकलाः खलाः शनैः शनैः शास्त्रार्थस्थलात् प्रस्खल्य निलिल्यिरे ।

प्रसिद्धेऽस्मिन् काशीशास्त्रार्थे भूयो वयोवृद्धैरपि शास्त्रसिद्धैर्विद्वद्भिश्छलप्रपञ्चवञ्चनाञ्चितो मार्गोऽमार्गि । तेनैव च मिथ्या निजविजयलाभाशा हृदयाकाशे प्राकाश्यत । माधवाचार्येण सुरगिरा लिखितानि कानिचित् पत्त्राणि वेदा इमे इति कृत्वा वितथैव कथा कथिता प्रथिता । वस्तुतः कस्यचिद् गृह्यसूत्रस्य पृष्ठानीमान्यवर्तन्त । तत्रापि रात्रौ संवृत्तायां प्रकाशानुवृत्तेरभावात् तदपष्ठु२ पृष्ठं दुष्ठु दृश्यत्वेन सुष्ठु पाठ्यं नाभूत् । तस्मिन्नेव कलकलेऽखिलाः खलु खिलीकृताः३ खलास्ते समुच्छलन्तश्चल चलेति चेलुः । रक्षापुरुषाध्यक्षः काश्यधीशस्य समक्षमसत्पक्षमक्षतमीक्षितुमक्षमस्तं प्रोवाच— हन्त भोः ! भवत्संमुखे प्रमुखे सहेलं खेलत्यसत्ये यत्सत्यं सत्यं विमुखं सन्मिलत्प्रमीलं४ निमीलल्लोचनं संलक्ष्यते । सत्यस्यैव जयेन भाव्यम् । न त्वसत्यस्य । किंत्वत्र विपरीतमक्षिलक्षीक्रियते । असत्यपक्षनिक्षिप्ताः काशीस्थपण्डिताः सोल्लासविलासं लीलां कलयन्ति ।

१- सकपटम् । २- विकृतम् । ३- दुःस्थितिं नीता । ४- आगतनिद्रम् ।

सत्यपक्षसमाश्रितः श्रीमान् दयानन्दः स्वामी त्वातिवेलमवहेलितः[१] परिलक्ष्यते। मध्यस्थेन सता भवता न्यायसिद्धान्तसिद्धः संदिग्धसाध्यः पक्षोऽन्याय्यत्वात् परिहरणीयः। निश्चितसाध्यवान् सपक्षस्तु[२] न्याय्यत्वेन तत्सिद्धान्तसिद्धः समाश्रयणीयः, इत्युक्त्वा विरतवचसि रक्षाध्यक्षो रघुनाथप्रसाद[३]सहितोपि रघुनाथप्रसाद-[३] रहितस्तमेकान्ते नीत्वा बोधयांबभूव यदत्रभवन्तोपि मूर्तिपूजका याजकाः सन्ति वयमपि च तथाभूता भवामः। एष दयानन्दस्त्वमूर्तिपूजकत्वादुभयोरेवावयोः प्रतिपक्षभूतोऽस्तीत्यतः सत्प्रतिपक्षत्वाद् हेत्वाभास इव वादिजयलाभे हेय एव। यया कयापि विधयारातिविजय एव ज्यायान् ज्ञेय इति। दृश्यतामार्याः ! अनार्यस्य काश्यधीशस्य कीदृश्यपवित्रा विचित्रा च वाचां प्रचारशैली। महिताभ्युदयः स्वामिमहोदयस्तु वस्तुतः स्तुतो विजेतासीदतः पुनरपि ससंरम्भमारम्भं प्रकाश्य तस्यामेव काश्यां सप्तकृत्वः प्रचरंश्चकाशे। परं काशीनिवासिनो मूढाः प्रौढानेकमिथ्यारूढिरूढास्तस्मात् परिवृढाद् दृढं पराजयमुखवीक्षणमुत्प्रेक्षमाणास्तत्संमुखीना न बभूवुः। शास्त्रार्थाय द्रुह्यन्तस्तन्नामतोपि बिभ्यतः प्रद्रवन्तस्ते स्वामिसमीपमुपेतुं गर्हित[४]मजिह्रयुः[५]। स्वामिनः सांमुख्यं कर्तुं न तेषु नतेषु[६] कश्चन प्राभवत्।

प्रयागकुम्भादिषु भ्रमणं, वेदोपदेशश्च

प्रथितवैदुष्याः काश्याः सकाशात् प्रस्थाय विख्यातप्रख्या-

१- अतिक्रान्तकालम्। २- स पक्ष इति पदद्वयमपि श्लिष्यते।

३- रघुनाथप्रसादो रक्षापुरुषाध्यक्षः, रघुनाथस्य श्रीरामचन्द्रस्य प्रसादश्च। तेन विरोधपरिहारः। ४- निन्द्यम्। ५- ललज्जिरे। ६- अभिभूतेषु।

भिख्यो१ महर्षिः सहर्षं निर्बाधप्रसरः कुम्भावसरे प्रयागमुपासरत् । तत्र च रिङ्गत्तरङ्गभङ्गाया गङ्गाया रोधसि विरोधानुरोधपुरःसरं प्रश्नोत्तरधारां सारासारविचाराधारां स्फारां प्राचारयत् । ततः प्रतिनिवृत्तः प्रतिपक्षं प्रतिगर्जन् मिर्जापुरमाययौ । तत्रापि धर्ममुपदिदेश । यत्प्रभावाच्छतशो ब्राह्मणैर्मूर्तिपूजात्यागः सन्ध्याग्निहोत्रविधानं च ससंमानं प्रारेभे । ततोपि निवृत्य कृत्यविद् डुमरांव२मायन्नरमारामार । दानपुरं चेत्वा कतिपयानि लसदाख्यानानि वेदव्याख्यानानि चकार ।

पटनायामाङ्गलराज्यप्रतिनिधिश्रीराबर्ट्‌ससंनिधौ यीशुमतखण्डनम्

अनन्तरं पटुविधिघटनाघटितं पटनापुटभेदनं३ चिरंतनमुपागतोऽहर्निशं धर्ममुपदिशन् प्रतिदिशं यशःसन्तानवितानं तेने । तस्मिन्नवसरे भारतेऽधिकृतो मुख्यो राजप्रतिनिधिः श्रीराबर्ट्‌सनामाङ्गलो दीप्तधामापि स्वीयशुभागमनेन पटनापत्तनमलंकुर्वन्नासीत् । अन्यतरेद्युरसौ स्वामी प्रांशुयशा यीशुमतमधिकृत्य सहृदयहृदयगम्यं रम्यं विहितामृतसख्यं व्याचख्यौ । स्वामिनः कीर्तिः कृतदिगन्तरालपूर्तिर्न्यक्कृतसाकृतीशमूर्तिधृतस्फूर्तिः४ प्रायो राज्यपदाधिकृतानां कतिनामपि कर्णगोचरतामैर्त५ । अतो हेतोस्तद्व्याख्यानश्रवणेच्छयाच्छमतयो बहवो राजकीयाः पुरुषा अपि समाजमाजग्मुः । तस्मिन्नहनि क्रियमाणे व्याख्याने श्रीराबर्ट्‌समहोदयोपि कृतोदयोऽभूत् । स्वामी व्याख्यानं कुर्वन्नवर्तत ।

१- प्रख्या बुद्धिः, अभिख्या शोभा, नाम च । २- डुमरांवमायन् आगच्छन् अरम् आराम् नाम पुरमार जगाम । ३- पुटभेदनं नगरम् । ४- अपास्तसाकारेश्वरमूर्तिः । ५- ऐर्त अगमत् । ईर् गतौ लङ् ।

श्रीमति राबर्ट् समहोदये सदसि विहितोदये सति निर्भयप्रसरं प्रसरन्ती स्वामिनो व्याख्यानवाग्धारा यीशुमतसमालोचनायां परिणता सती सातिशयं समुद्दिदीपे। व्याख्यानावसाने श्रीराबर्ट् स-महानुभावोऽद्भुतप्रभावं साधुस्वभावं महर्षिं हृष्यद्रोमा प्रणनाम। प्रशस्तां प्रशस्ति च भूयसीं वितन्वन् सगद्गदमगदीत्— महर्षे! यदा भवान् अस्मदुपस्थितावपि बाइबिलमाविलं मन्वानस्तत्र निराकुलं निरातङ्काशङ्कश्च भाषमाणो नापत्रपते न चानुकम्पते१ तत्रान्यत्र साधारणजनसमवाये तु भवतोऽनुकम्पाधानं२ सर्वथाऽशक्यसम्पादनमेव बुद्ध्या बोद्धव्यं भवति। युक्तियुक्तमुक्तमभियुक्तैः— सम्यक्चारित्रः सर्वथा निरपेक्षः संन्यासी भुवने भवने वनावनौ वा न कुतोपि कदापि बिभेतीति। अथर्ववेदेपि परमात्मस्वरूपमेवं न्यरूपि—

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम्॥
(अथर्व० १०. ८. ४४) इति

कलकत्तायां श्रीकेशवचन्द्रसेनेन सह संलापः

एवमकुतोभयः प्रचारं कुर्वन्नगर्वः सर्वं धूर्वन्३ धूर्वन्तमरिग गुणिगणगणनीयो महनीयो यतिवरो मुंगेरमुपयन् भागलपुरमुप जगाम। तत्रैकं मासं यावद्धर्मं प्रचारयामास। वर्धमानन शोपि स्वीयैश्चतुर्भिः संशयशय्याशायिभिर्नैयायिकैः पण्डितैः र दर्शनार्थमुपेयाय। एकोनत्रिंशदुत्तरैकोनविंशतिशततमे (१९२ वैक्रमाब्दे महर्षिरयं वाक्कील—श्रीचन्द्रशेखरसेनस्योद्योगयोग

१- अनुकम्पते दयते पश्चात्कम्पते च। २- अनु, नु इति द्विधा च्छेद

३- निराकुर्वन्।

कलकत्तामुपागात् । तत्र सुरेन्द्रमोहनठक्कुरस्य प्रमोदकानने स्वमासनमाशिश्रिये । धर्मोपदेशं चारेभे । समागतवत्येव महात्मनि स्वामिनि तत्रत्यवृत्तपत्रेषु तदागमनवृत्तं सर्वत्रानशे१ । तत्र स्थितस्य यतेः प्रायः समयो बङ्गदेशीयपण्डितैः समं वादानुवाद एव व्यत्येति स्म । ब्राह्मसमाजनेता श्रीकेशवचन्द्रसेनो महाशयः स्वामिना संगतः सन्नेकदाख्यत्— यदि भवानाङ्गलभाषामवेदिष्यत् तर्ह्याङ्गलदेशे ममातीव सहायकोऽभविष्यत् । तदात्व एव स्वामी तदनुरूपमभिरूपमुत्तरं न्यरूपयत् संस्कृतभाषानभिज्ञो विज्ञो भवान् यदि तां संस्कृतां सुभाषितभूषावेशां भाषामज्ञास्यत् तर्हि मम वेदभाष्यविधावत्यर्थमेवार्थ्यं साहायकमाचरिष्यत् । तदभावे मम महाञ्शोको जायते इति ।

मुम्बय्यामिदम्प्रथममार्यसमाजप्रतिष्ठापनं, विविधग्रन्थप्रणयनं च

कलकत्तायां हुगलीपुर्यां चावस्थितो यतिवरस्तत्रत्यैर्व्यस्तैः समस्तैश्च पण्डितप्रवरैः शास्त्रार्थप्रचारं मिथो धर्मविचारं च निरत्ययमतनोत् । कलकत्तातो निवृत्तोऽयं बिहारोत्तरमध्यप्रदेश-महाराष्ट्र-गुजरात-मुम्बयीप्रभृतिप्रान्तानां प्रायेण सर्वेष्वपि महानगरेषु निर्भ्रमो बभ्राम । विविधैर्विबुधैः सार्धं बुधोऽयमनेना२ अनेकशः शास्त्रार्थं व्यचीचरत् । कतिषुचित् स्थानेष्वार्याणां समाजमतिष्ठिपत् । सर्वतः पूर्वं द्वात्रिंशदुत्तरैकोनविंशतिशततमे (१९३२) वैक्रमाब्दे मुम्बय्यां महापुर्यामार्यधुर्योऽयमार्यसमाजं निर्ममो निर्ममे । तदीयनियमांश्चोपदशानुपदिदेश३ । त्रिचतुरान्

१- व्याप्नोत् । अशूङ् व्याप्तौ लिट् । २- निष्पापः । अविद्यमानमेनो यस्मिन् सः । ३- दशानां समीपमितान् ।

ग्रन्थांश्च ग्रन्थित्वा प्राकाश्यमनैषीत्। श्रीमहादेवगोविन्द—रानाडे-प्रभृतिभिः शुभाकृतिभिः कृतिभिः समाजोन्नायकैः सहायकैः सह समगंस्त। सद्विद्याचुञ्चुरवञ्चितमतिः समञ्चितोऽयं प्रपञ्चितमिमं कार्यराशिमाशूपपञ्चैर्हायनैः सम्यञ्चं सञ्चितमाञ्चीत्। विपश्चिदपश्चिमोऽयं यतिवरः पश्चिमभारतात् प्रत्यावृत्य पुनः फर्रुखाबाद-मुपागात्। तत्र वेदविरोधियीशुमतावलम्बिचक्रमाचक्राम।

अयोध्यायां वेदभाष्यभूमिकालेखनोपक्रमः

ततो वाराणसीमैत्। तत्र लाजरसाभिधमुद्रणालये ऋग्वेदादिभाष्यभूमिकाख्यग्रन्थरत्नमुद्रापणप्रबन्धं बबन्ध। जौनपुरादयोध्यामुपेत्य सुरभिसमीरे निर्मलनीरे सरयूतीरे वेदभाष्यभूमिका-लेखनमुपचक्रमे। विरोध्यप्रतिरोध्योऽयमयोध्यातः[१] प्रस्थाय लक्ष्मणपुरं शाहजहांपुरं च स्वचरणरजोभिः पावयन् सद्वृत्तानुद्भावयन् दुर्वृत्तांश्च न्यग्भावयन् बरेलीप्रतोलीमागात्।

दिल्ल्यामाङ्गलराजागमनमहोत्सवे संमेलनम्

ततः कर्णवासे निवासं कृत्वा चतुस्त्रिंशदुत्तरैकोनविंशतिशत-तमे (१९३४) वैक्रमवत्सरे दिल्लीनगर्यामाङ्गलदेशीयराजागमन-निमित्तस्वागतमहोत्सवे संमिलितोऽभूत्। तत्र शेरमलाधिकृते दाडिमारामे स्वकार्यतोऽनिवार्यतया व्यवहार्याणामुपकार्याणां[२] संविधापनं व्यदधात्। तदन्तिक एव रयीशानां[३] शिविराण्यासन्। सन्मार्गनिविष्टदृष्टिः कृष्टि[४]र्यतिवरोऽयं तत्रैवात्यन्तीनामुपदेशा-मृतवृष्टि[५]धारासारेण प्रावर्तयन्। तदानीं बहवो नरपतयः स्वामिना संगन्तुमत्यन्ताय कृतमतयोऽभूवन्। किंतु पौराणिक-

१- विरोधिभिः अप्रतिरोध्यः अनिवार्यः। २- शिविराणाम्। ३- रईस इति ख्यातानाम्। ४- विद्वान्। ५- अत्यन्तं गामिनीम्।

पण्डितास्तान् वञ्च्यानिव मत्वा वञ्चयमानाः साभिमानाः स्वामिसंगमने तेषां निरन्तरमन्तरायं व्यदधुः। दिल्ल्यां निभाल्ये राजकीयस्वागतसंमेलने संमिलितस्य यतेरिदमेव मुख्यं प्रयोजनमुल्लसितमासीद् यद् भारतवर्षीया अधिराजा महाराजाः सम्राजो विभ्राजो मण्डलोपमण्डलाधीशा महीशास्तथान्ये लब्धप्रतिष्ठा विशिष्टाः शिष्टाश्चार्यसमाजप्रतिपादितानां वेदोदितार्यसिद्धान्तानामभिधानेन विधानेन च प्राप्तपरिचयाः स्युः। येनार्यधर्मः प्रचुरं प्रचरेत्। प्रयोजनान्तरमिदमप्यासीद् यत् तस्मिन्नवसरे समग्रदेशस्योदग्रा१ उग्रा अनुग्रा विविधवेशभूषाभाषितभूषिता विद्वांसः शिक्षादीक्षान्वीक्षणसक्षणा विलक्षणा विचक्षणा धर्मकर्ममर्मज्ञा विज्ञाः सविशेषका२ उपदेशकाः स्वसंमतमतप्रचाराय नियतं समवैष्यन्ति, तैः समस्तैः सह संभूय भूयः संवादविधानस्योपयुक्तोऽयं समय इति। दिल्लीसंमेलने प्राच्यर्षिप्रणीताध्वन्यध्वन्यो३ धन्यो विद्वन्मूर्धन्यो महर्षिर्लसद्भांसि निजवचांसि सभाजितसमाजानां महाराजाधिराजानां कर्णशष्कुल्यवच्छिन्ने नभस्य४प्यनवच्छिन्नं५ न्यपातयत्। रचितसमाजो हुलकरमहाराजोऽन्ये च कतिपये प्रोच्चमहिमानो राजानोऽत्यन्तायेममुद्योगमप्यकार्षुर्यत् सम्पूर्णजनपदनरपतयः संघीभूय स्वामिनः सदुपदेशं विशेषेणाकर्णयेयुः। परं प्राप्त६कालोऽप्ययमुद्योगोऽप्राप्तकालानां७ क्षितिपालानामनेककार्यान्तरव्यासक्तत्वात् सफलतां नालभत।

१- उद्भटाः। २- सतिलकाः। विशेषकं तिलकम्। वैशिष्ट्ययुक्ताश्च। ३- ऋषिप्रणीताध्वनि अध्वन्यः पथिकः। ४- कर्णशष्कुल्यवच्छिन्ने नभसि श्रोत्रे इत्यर्थः। ५- विच्छेदरहितम् ६- उचितावसरः। ७- अलब्धावसराणाम्।

भिन्नमतावलम्बिनां विदुषामैकमत्यस्थापनाय विशिष्टगोष्ठीप्रतिष्ठापनम्

एतदतिरिच्य रुच्यमतिर्यतिवरो धर्मविषये विरोधमपनेतुं सर्वभूतहिताय चेष्टमान एकामिष्टां परिनिष्ठां गतां विद्वद्गोष्ठीं निजावासस्थान एव प्रतिष्ठापयितुं निर्दिष्टवान्। यत्र मनीषी कन्हैयालालः, श्रीनवीनचन्द्ररायः, श्रीकेशवचन्द्रसेनः, मनीषीन्द्र-मणिः, श्रीयुतः सैयदोऽहमदखानः, श्रीमान् हरिश्चन्द्रश्चिन्ता-मणिः, इत्येवमादयो विद्वांसः पुमांसः समाजोद्धारका विराजमाना विरेजिरे। सभामध्ये वर्तमानः श्रीस्वामी सभाया उद्देश्यं वर्णयन्नाह—सर्वेऽपि वयमिदानीं मार्मिकधार्मिकसंशोधनप्रति-बोधनकर्मणि प्रवृत्ताः स्मः। तस्मादस्माकं समेषामपीदमावश्यकं कर्तव्यं भवति यत् स्वं स्वं प्रतिविषयं विशय१मनिवार्यतया निवार्य सत्यधर्मं शुद्धेन प्रतिबुद्धेन च मनसाङ्गीकुर्वीमहि। सर्व-संमतं चैकमेव मार्गमविलम्बमवलम्बेमहि। येन भेदभावोद्भेदं, प्रद्वेषरोषावेशं, मनोमलिनतां, जटिलां निटिलकुटिलतां२ च विरहय्य सर्वथाऽक्षय्यं सौहृदय्यं रस्यं सांमनस्यं च सानन्दं विन्दे-महि इति। किन्तु तत्र समवेतारो नेतारो निरन्तरमान्तरं दुरा-ग्रहग्रहं सविग्रहं३ विग्रहमिव हन्त दुरन्तोदयं विदन्तोपि समन्ततः कृतांतमिव४ कृतांतं५ कर्तुं नापपारन्६। अतः कारणात् परिषदसौ सुदृशां विमृशां दृशि दृषदिव निष्प्राणाऽजनि। प्राणत्राणक्षम-निर्णिक्तनिर्णीतपरिणामरूपफलानिष्पत्तेः। तत्रैव महोत्सवावसरे श्रीकेशवचन्द्रसेनः स्वामिनं स्वैरं निर्वैरं प्रैरिरत्—यदि भवान्

१- संशयम् २- निटिलं मस्तकम्। ३- सशरीरम्। ४- यमराजम्।

५- कृतः अन्तो यस्य तादृशम्। ६- नालमभूवन्। पार कर्मसमाप्तौ लुङ्।

निर्देश्ये निजोद्देश्येऽविकलां सफलतालतामुल्लासयितुं पल्लवयितुं चाश्चितं वाञ्छति तर्हि सजोषं निर्दोषं चोद्घोष्यतां यद्यदहं किंचिदुपदिशामि तत्तदीश्वर एव दिशं दिशन् मयोपदेशयति। ईश्वरादेशवंशवदैव मे वाग्धारा प्रसरीसरीतीति१। एवं क्रियमाणे स्वदेश्यस्य भवत उद्देश्यस्य साफल्येऽवैकल्यं साधीयः सम्पद्येत। एतदाकर्ण्य वर्ण्याविर्ण्यविलब्धवर्णो२ यतीश्वरः स्वस्य भगवदवतरणत्वप्रपंचं स्पष्टं प्रत्याचष्ट। आचष्ट चैवम्—सर्वव्याप्तः स आप्त ईश्वरः। किमसौ कस्यापि श्रवोविवरे३ किमपि विवरीतुमवतरति। अहं स्वमास्य४मसत्यलास्यविकास्यमुपहास्यं च न कर्तुमर्हामि। तत्रैव महोत्सवे मुद्रणालयोन्निद्रा भद्रा आर्यसमाजनियमा अपि नियमेन निरुपद्रवाक्षुद्रजनेषु प्रचाराय परितो व्यतारिषत। पश्चापप्रान्तीयाभिरनेकाभिरनुरक्ताभिर्व्यक्तिभिर्व्यक्तभक्तिभिर्व्यक्तं शक्तिमान् यतिवरः स्वप्रान्तं प्रत्युत्क्रान्त्यै प्राञ्जलेन निमन्त्रणाञ्जनेनाञ्जितश्च।

चान्द्रपुरसम्मेलनम्

दिल्लीवल्लीमतल्लीं सभाजयित्वा पवित्रचारित्रोऽयं मयराष्ट्रं सहारनपुरं च पुरन्दर इवारिपुरं दारयिता समुल्लङ्घयन्नलङ्घ्ययशाः शाहजहांपुरमण्डलान्तर्गतमतिप्रसिद्धं चान्द्रपुराख्यं मुख्यं सम्मेलनं प्रत्यामन्त्रितः सन् नियन्त्रितमनाः प्रमनाः प्रपेदे। शाहजहांपुरस्य प्रथितः कथितो रयीशः श्रीमान् मनीषी प्यारेलालस्तत्र संमेलने स्वस्वधर्मेषु ख्यातिमुपेयुषामनेकेषां शेमुषीजुषां विदुषां समन्वयनाय प्रबन्धं बबन्ध। निगमपथगामी स्वामी तत्रभवान् महान् सरस्वतीस्वरूप इव भासमानो भासमानो५

१- पुनः पुनः प्रसरति। मर्तेर्यङ्लुकि रूपम्। २- विपश्चित्। ३- कर्णकुहरे। ४- आस्यं मुखम्। ५- भा दीप्तिः तया असमानः। अनुपमदीप्तियुक्तः।

दयानन्दः, टी० जे० स्काटः पादरी, मनीषीन्द्रमणिः, नवलमहाशयः पादरी, मौलविर्मुहम्मदकासिमः, जॉन टामसनः पादरी, मौलविः सैयदोऽब्दुलः, मंसूरः सूरिश्चेत्येवमादयो विविधधियः सुधियस्तत्र समवायन्। सातिशयं कृतादराः पादरिणः प्रबलेनोत्साहेन समुपागमन्। पञ्चाशत् सहस्रं दर्शकानां संख्या समवर्तत। मार्च-मासस्य विंश्यां तिथौ सभाभवनं पर्यपूर्यत। चतुस्त्रिंशदुत्तरैकोन-विंशतिशततमे (१९३४) वैक्रमेऽब्दे संजायमानमनुपमानमिदं बृहत्संमेलनं प्रकटितानार्यमतावहेलनं ललितं खेलनं चक्रे। मौलवयः पादरिणः सर्वेऽपि तत्र संनिविष्टासु विशिष्टास्वासन्दीषूपविष्टाः। श्रीमनीषिणः प्यारेलालमहोदयतः प्रति[1] श्रीमुक्ताप्रसादः सृष्ट्यु-त्पत्ति विषयमधिकृत्य पञ्च प्रश्नान् प्रास्तावीत्। पूर्वं तु वाद-कर्तॄणां वक्तॄणां पौर्वापर्यविनिर्णय एव भूयान् कालश्चस्खाल। अन्ततः पादरी श्रीस्काटमहाशयो यथा तथा कृत्वा प्रावोचत्—ईश्वरः सृष्टिमभावादुदपादयदिति। रचनायाः कालं तु न वयमाकलयितुं शक्नुमः। सुखायैव सृष्टिर्व्यरचीति वयं प्रतीमः। ततो मौलविः प्रत्युवाच—ईश्वरः सृष्टिं स्वरूपादेव निरमासीत्। कदासौ निरमासीदित्यनेन किं नः प्रयोजनम्। भो जनाः! भोजनाङ्गरोटिकाद्यशनेनैव प्रयोजनं नः। सा रोटिका कस्यां घटिकायामघटिष्टेत्यनिष्टः प्रश्नो निरर्थक एव। सर्वे पदार्था मनुष्यनिमित्तका एव निर्मितिमाधीयन्त। मनुष्यश्चेश्वरं स्तोतुं निर्मितः। एवं प्रवृत्ते वादे मौलविपाद-रिणोरेव मिथो विप्रतिषेधः समुदजृम्भत। पर्यवसाने स्वामी दयानन्दः प्रसन्नगम्भीरया धिया वाचा चोवाच—सत्यं जिज्ञासितु-

---

१- प्रतिनिधिः। प्यारेलालमहोदयस्य प्रतिनिधिर्भूत्वेत्यर्थः। प्रतिः प्रतिनिधिप्रतिदानयोः (पा. १. ४. ९२) इति कर्मप्रवचनीयत्वात् पञ्चमी।

मिदं सम्मेलनं प्रवृत्तम्। अनया दूष्यदृश्यया विसदृश्या१ व्यावक्रोश्या२ऽनर्च्यंयाऽरुच्यया च व्यावचर्च्या३ वादे विजयोदयो न भवितुमर्हति। अन्योन्यं वैरं विरोधं च परिहाय संवादविधानं विदुषां धर्मः। सृष्टिरियं परमात्मना जगदुपादानकारणभूतां परमाणुरूपां प्रकृतिमुपादाय निर्ममे। अनादिरनन्तश्चासौ भगवान्। अभावाद् भावोत्पत्तिः खलु न शक्या भवितुम्। कारणगुणाः कार्यगुणमारभन्ते। अतो जगत्कारणमभावो नेष्टव्यः। इतरथा कार्यरूपं जगदप्यभावरूपमेवापद्येत। यदीश्वरः स्वरूपेण जगन्निरमास्यत् तर्हि जगदपीश्वररूपमेवापत्स्यत। वेदविरुद्धमतावलम्बिभिर्नेदं शक्यं युक्तियुक्तं वक्तुं यदियं सृष्टिः कदारचीति। इयं विसृष्टिर्यत आ बभूवेत्यस्य रुचितमुचितं चोत्तरं वैदिकवाङ्मयसमाम्नायाचार्या वयमार्या एव दातुं प्रभवामः। प्रतिपुण्याहं४ प्रतिशुभकार्यं चार्यपण्डिताः शिवसंकल्पं पठन्तः सृष्टेरारभ्याद्यावधि हायनायनदिनमासतिथिघटिकाघण्टापलविपलादिसकलकालकलाकलनपरिमाणं सन्निर्माणं ज्योतिःशास्त्रेणाविर्भूतज्योतिषः परिगणयन्ति। जीवो, जगत्कारणं प्रकृतिश्चेत्युभावपि स्वरूपेणानादी अनादीनव५मीरितौ। पूर्वप्रलयावशिष्टकर्मणां फलप्रदानायेश्वरः सृष्टिं रचयति। स्वाभाविकश्चायमीश्वरस्य सृष्टिरचनात्मको गुणः। जीवा धर्मार्थकाममोक्षाणां सिद्धिं साधीयः साधयेयुरित्येतदर्थं सृष्टिरियं रचितेति।

यतिवर्यस्याचार्यस्यार्यमर्यादानुरूपामभिरूपां युक्तियुक्तामिमां वाचोयुक्तिप्रयुक्तिं निशम्योपक्षिप्ताः प्रतिपक्षिभिः केचन प्रतिक्षेपाः।

१- विरूपया। २- अन्योन्यमाक्रोशः व्यावक्रोशी, तया। ३- अन्योन्यं चर्चः व्यावचर्ची, तया। ४- पुण्यदिनम्। ५- अनादीनव दोषरहितम्। आदीनवो दोषः।

आचार्येण त्वनवक्षेपेण१ संक्षेपेण तेषां पर्यनुयोगपरिहारौ२ व्यधायिषाताम् । भूषितभाषिताचार्यवर्यभाषणामृतवर्षणानन्तरं समेषामन्येषामनार्यमतावलम्बिनां विद्यादम्भिनां वादिविडम्बिनां वादा धृतावसादा हृतप्रसादाश्चावर्तन्त । अपरेद्युः सान्द्रं तच्चान्द्रपुरीयं सम्मेलनमवसितिमाससाद३ । यवनमौलयो मौलवयः, प्रांशुयीशुकृतादराः पादरिणश्च समिथ्याध्यवसितयस्तत्र४ कृतवसतयः श्रितस्वनिवसतयः५ सन्तस्ततो निववृतिरे ।

पंचापप्रान्ते गमनम्

अमलां सफलामचञ्चलां चान्द्रीं विभां बिभ्रच्चन्द्र इवातन्द्रश्चान्द्रपुरान्निवृत्तो यतिवरोप्यमन्दं मन्दमतीनसकृदमृतविन्दुस्यन्दिवाग्विलासैरुल्लासयन् सपदि पञ्चापप्रान्तं प्रति प्रतस्थे । पञ्चापप्रान्तमुपेतो लोधियाने लवपुरे च सद्धर्मप्रचारं शास्त्रार्थविचारं नूतनार्यसमाजसमाहारं६ च वितन्वन्ननपह्नवो७ऽह्नाय सरसवचःस्वरसोऽमृतसरसमुपससार । स्वामिनः शुभागमनं लोकेष्वलौकिकमद्भुतमभूतपूर्वं चोल्लासविकासं चकासयति स्म । हर्षयामास महर्षिः संनिकर्षमितानमितान् विशिष्योपदेश्यान् शिष्यान् मनुष्यान् सविमर्शोत्कर्षं कृताकर्षणैर्मनःप्रहर्षणैर्निजभाषणामृतवर्षणैः । अजस्रं सहस्रं विनयावनता जनता दुःखभञ्जनं निरञ्जनमपि दृगञ्जनं तमहस्करभातस्करमुपस्कृतमतिमतिश्रेयस्करं

१- अवक्षेपेण तिरस्कारेण रहितं यत् तदनवक्षेपम् । तादृशेन । २- सङ्कासमाधाने । ३- अवसितिं समाप्तिम् । ४- मिथ्याज्ञानसहिताः । ५- आश्रितनिजनिवासस्थानाः । ६- संग्रहणम्, निर्माणमित्यर्थः । ७- प्रतारणारहितः, अपह्नव अपनयनं प्रलम्भनं प्रतारणं वा । ८- अहस्करः सूर्यः, तस्य भायाः दीप्तेः तस्करं चौरम् । सूर्यदीप्त्यतिशायिनम् ।

मस्करिणं१ नमस्कर्तुं परिष्कर्तुं चेक्षणेनेक्षणे२ भक्तिपुरःसरमुपतस्थिरे । प्रतिमापूजनतर्जनम्, अवतारवादप्रतिवादं, मृतकश्राद्धप्रतिषेधम्, अविद्यामूलकमिथ्याविश्वासोपहासं च निरन्तरमन्तरान्तरान्तरायरहितं महितं प्रवर्तयन् यतिवरोऽयं सचकितमीक्षितो दीक्षितो रुचितमचकात् । तेन पुराणाभाणकभणितिब्रुडितेषु३ निविडजडेषु पाण्डतब्रुवेषु विक्रान्ता विचारक्रान्तिः प्रक्रान्ता । तत्र विराजमाना यजमानाः पौराणिकवाणीवीणाप्रवीणान् शास्त्रधुरीणान् विवुधगणान् शास्त्रार्थाय सङ्घटयितुं वलवत् प्रयेतिरे । श्रीरामदत्ताख्यः प्रधानाभिख्यः पण्डितवरः शास्त्रसमराय विवशीकृतः । परमसावद्वितीयवेदविदुषो गौरवपुषो निखिलकल्मषमुषो विमलमतिजुषो महर्षेरद्वितीयतामप्रतिभटतां च पठितीशास्त्रेषु प्रमीय शास्त्रार्थं प्रति निजपृष्ठं स्पष्टं दर्शयित्वा च हरिद्वारमारादारत्४ ।

दुष्टपण्डितधूर्तताध्वंसनम्

एकदैको दुष्टो भ्रष्टः पाठशालीयः पण्डितो युष्मभ्यमिष्टानि मिष्टानि मनोमोदकानि मोदकानि दास्यामीति लघुवयोभ्यो बालेभ्यः प्रलोभनं प्रदिश्य निश्युपदेशावसरे५ प्रविश्य च यतेरुपरि तैरनिष्टा इष्टकाः प्राक्षेपयत् । व्याख्यानामृतवृष्टिमध्येऽनिष्टकष्टदेष्टकापातेपि गम्भीरधीरधीर्यतिवरः सकलमनाकुलमवलोकयन् पूर्ववद् व्याख्यानप्रवृत्तावप्रमत्तदत्तचित्तवृत्तिरेवावास्थित । श्रोतृजनेषु व्याकुलेषु चञ्चलेषु च सत्सु बहुलं कोलाहलोऽह्वालीत्६ । तस्मिन् क्षणे विलक्षणप्रतिभावान् आभान्७ जनताजनतापहरः श्रीयतिवरः शान्तिपूर्वकं

१- साश्रुम् । २- ईक्षणे नयने । ३- निमग्नेषु । ४- आरात् दूरम् । ५- निशि रात्रौ । ६- वलवत् प्राचालीत् । ७- आ समन्ताद् दीप्यमानः । भा दीप्तौ शता प्रत्ययः ।

तद् भयं शमयन्नभयो विकस्वरेण स्वरेण प्रोवाच— सज्जनाः श्रोतृगणाः ! एतेनैष्टकापातेन मा भैष्ट । नेयमिष्टकावृष्टिः प्रत्येतव्या प्रत्युत सुमनसां वृष्टिरेवेयमिष्टा पर्येष्टव्येति । इष्टकापातरहस्यं तु निभृतमन्ते विवृतम् ।

प्रक्षिप्तेष्टकाः स्पष्टमबोधोपहताः परस्परमधरोत्तरां१ गिरं गिरन्तो हन्त ते माणवका राजकीयरक्षापुरुषैः सरुषं२ परुषं निगृहीताः । निगृह्य च प्रकाशं स्वामिसकाशमानिन्यिरे । प्रेप्सित-पुरस्कारा अविदितसारासाराः स्वच्छन्दविहारा अनुपजातविकारास्ते कुमाराः स्वामिनः पुरस्तादुपस्थापिताकाराः सन्तो भीतभीताः पतितपतिता ध्वस्तामोदं रोदं रोदं प्रतिबद्धगला विकलाः समजनिषत । मनाक् प्रमुदितमना महामना महर्षिस्तु तानज्ञान-मायाजालान् बालान् प्रेम्णा संभाव्य तेषां शिरसि करावास्फोट्य चिबुके स्पृष्ट्वा च सान्त्वयन् स्वच्छं पप्रच्छ— कथयत भो प्रिय-बालकाः ! युष्माभिरिदमसाधु कर्म किमर्थमनुष्ठितमिति । सरल-विमलहृदयाः सभयाः कम्पितवाग्धारास्ते कुमाराश्चिकीर्षितमिथ्या-मनीषितपूर्तेर्मूर्तस्य तस्याध्यापकधूर्तस्य सकलं सकलङ्कं किल्विष-विषमुदवमिषुः । निरातङ्कशङ्कापङ्कं चोट्टङ्कयामासुर्यदस्मभ्यमना-यासलभ्यं मोदकदानं प्रलोभनं दत्त्वास्माभिरेतेनैवाध्यापकहतकेनेदं दुष्टं कर्मानुष्ठापितमिति । स्वामिनाऽधिगतवृत्तान्तेन तदानीमेव तन्मनःप्रसादकानि मोदकान्यानाय्य तेभ्यो विभज्य दत्त्वा चोक्तम्— युष्माकमधन्यो जघन्योऽध्यापकस्तु मन्ये वो३ यथेच्छमच्छानि मोदकानि न यच्छेत् । अतो हेतोरहमेव युष्मदर्थमर्घ्याणि मोदकानी-

---

१- पौर्वापर्यविपर्ययसहिताम् । २- रुषा क्रोधेन सहितम् । ३- युष्मभ्यम् ।

मानि स्वेच्छया यच्छामीति। इत्येतदुदित्वा चारक्षिकेभ्यस्तान् कुमारानारान्मोचयामास। अमृतसरसे सरसेरितश्रुतिवचनश्चाय-मीशवीयविद्यालयेऽधीयानांश्चत्वारिंशतो नवयुवकान् यीशुमताव-लम्बनजम्बाला१दुत्फाल२मनालम्बितविलम्बोऽललम्भत्।

ब्रह्मचर्यबलप्रदर्शनम्

अमृतसरसात् तरसाऽयमार्यगुरुर्गुरुदासपुरं, गुरुदासपुराच्च जलंधरं शास्त्रधुरंधरो ययौ। तत्र सर्दारविक्रमसिंहस्याश्रयं चाशिश्रियत्। नित्यं सत्योपदेशकथोपकथा अपथान्निर्वर्तिकाः प्रवर्तयामास। एकस्मिन्नहनि सर्दारमहाशयः समर्चितार्याचार्यवर्यपादचर्यो ब्रह्मचर्य-विषयिणीं चर्चामचर्चयत्। बहुविधानुयोगनियोगानन्तरं लब्धा-न्तरः स्वामिनं सविनयमन्वमुङ्क्त— भगवन्! बहुशोऽत्रभवान् ब्रह्मचर्यमहिमानं साभिमानं प्रतिपादयति। किंतु नेदानीं यावत् सोऽस्माकं रसनायनं रसायनमिव नयनायनमजनि। केवलं भवद्वच-नेनैव कथं निरत्ययं सम्प्रत्ययः स्यात्। तस्मादस्मिन् विषये निर्विषयं विश्वसनीयेन भवताशु समाश्वासनीया वयम् इति। तदा स्वामी प्रत्युवाच— दृश्यतां शास्त्रेषु बलवदाश्चर्यं ब्रह्मचर्यं वर्णितमाकर्ण-तमस्ति। तत्सर्वथा सर्वपथीनावितथकथावीथीमवगाहते। न तत्र मनागपि विमनायितव्यं भव्येन भवतेति।

तन्निशम्य रम्यं वचः सर्दारमहोदयः पुनरवोचत्—महाराज! तत्रभवान् भवानप्याजन्मब्रह्मचारी वर्तते। न भवति भवति तु तादृक् स्फीतं३ बलं प्रतीतम् इति। स्वामिना पुनः कदाचि-

---

१- पङ्कात्। २- कूर्दनम्। ततो निःसरणमित्यर्थः। ३- प्रवृद्धम्।

दीक्षणीयं भवेदित्येतावदभिधाय प्रकरणान्तरोपन्यासेनान्तरिता सा कथा। यदा सर्दारमहाशयः स्वामिना संगत्य नमस्कृत्य च प्रतिनिवर्तमानः स्वकीयाश्वशकटीमारुह्य विदिताकूतं सूतं वह्य[1]संचालनायादिदेश तदा संनह्यदपि[2] तद् यानं निरुद्धाभियानं नाग्रतः प्रासरत्। पृष्ठदेशे प्रतोदेन चोदिता दुरवगाहातिद्रुतधावनोत्साहा वाहा नियन्त्रा[3] नियन्त्रिता गन्त्रीं[4] वोढुमुद्वहयन्त्रणा गात्रेऽतिमात्रमताड्यन्त। गन्त्री तु प्रतिरुद्धयन्त्रा न पुरःसरणमामन्त्रयांचक्रे। सा तदवस्थैवावास्थित। मुहुर्मुहुः कशाभिघाताभिहतास्तूर्णंपूर्णगामिरया हयाः कृतनर्तनाभिनया इव प्रोन्नमितोदग्रपादाग्रव्यग्राः समग्रात्मबलोत्तोलनविकलाः सन्तः पदमेकमपि चलितुं न शेकुः। ततः किंवृत्तमिदं वृत्तमिति परिवृत्तमुखः सर्दारमहाशयो यदा पश्चादवलोकनं विधत्ते तदाश्वशकटी प्रकटीभूतप्रतिरोधा स्थितिबोधायालमभूत्। सर्दारमहोदयः पृष्ठतः कृतोदयं स्वामिमहोदयं प्रतिबद्धयानाभियानं ससंमानं यदालोचनगोचरीचकार तदा विस्मयस्तिमितविलोचनस्तस्थौ। तदवलोकनसमकालमेव यतिवरेण तच्छकटीचक्रं शक्रपराक्रमसमनिजकराक्रमविधृतं झटित्युत्सृष्टम्। सृष्टं च हृष्टेन कृष्टि[5]नोत्कृष्टमिदं मधुरवचनामृतवृष्टम्[6] ब्रह्मचर्यबलस्याविकलं प्रबलं च निदर्शनं दर्शनविषयीक्रियताम् इति। कृतविचारः सर्दारस्तु सादरं सचकितं च पुलकिततनुरतनुबलवलितविमलतरललितयतिवरतनुमवलोकयन् विपुलमतुलितं ब्रह्मचर्यबलं चाकलयन् निजनिलयं जगाम।

ईश्वरे वेदे च परां काष्ठां गता निष्ठा

तदनन्तरं यतिवरः पञ्चापप्रान्तीयेषु रावलपिण्डी–पोठोहार-जेहलम-गुजरानवाला-मुलतानप्रभृतिषु प्रायेण सर्वेष्वपि नगरेषु

१- वह्यं शकटम्। २- उद्यदपि। ३- सारथिना। ४- शकटीम्। ५- विदुषा। ६- वृष्टं वृष्टिः। भावे क्तः।

विहरन् विहितजनाकर्षणं मधुरामृतवर्षणं भाषणमकार्षीत्। अगणितपुराणभणितिनिपुणानां जनगणानां प्रोज्ज्वलं मायाजालं च न्यमीमिलत्। कतिपयेषु स्थलेषु स्खलितमतिभिः कृतदुरितार्जनैर्दुर्जनैर्विहितात्ममार्जनस्य सज्जनस्य तस्य यतिवरस्योपरि कष्टप्रदेष्टकापाषाणाद्यवर्षि। प्रकटविकटकटुचटुलकपटघटनाप्यघटि। परन्तु वीतरागः स्वामिमहाभागः सुम१समधुरैर्मधुरैः सरसैर्वचनैस्तत्सर्वमधरीकुर्वन् सर्वागस्त्यागाय यागादिसत्कार्यविभागान् निरागाः२ प्रचारयन् प्रयागादिषु समागात्।

उच्चादर्शो लब्धगुणप्रकर्षो महर्षिरयं स्वं पावनं जीवनं भुवने वैदिकार्यधर्मप्रचारायैव गमयांबभूव। आर्यधर्ममसौ पुरुषोत्तमः सर्वोत्तमं सर्वप्राचीनमनपाचीन३मविनश्वरेश्वदत्तमुदात्तमप्रमत्तगीतमविगीतं४ मेने। युक्तं चैतत्। आर्यधर्माद्भिन्ना अन्ये धर्मा मिथः संभिन्ना५ अपि तदपेक्षया न साधीयः सम्पन्नतां प्रतिपन्नाः। तेषां समयाचारविचारादर्शानां दृष्टेरतीव पश्चाद्भावित्वात्। आर्यधर्मे ह्युच्चप्रस्थानस्य ब्रह्मविज्ञानस्य निर्विकारस्यात्मविचारस्य च यादृगत्युत्तमं वर्णनमुपलभ्यते न तादृगन्यधर्मास्तन्मर्मेदानीं यावत् स्वप्नेपि द्रष्टुमशक्नुवन्। आत्मज्ञानमेवार्यधर्मस्य प्राधान्यमनन्यसामान्यं सूचयति। अत्रात्मतत्त्वमेव महत्वं लभते। आत्मज्ञानेनैवार्याणां प्रागुत्कर्षोऽभूत्। इदानीमपकर्षकालेऽप्यात्मज्ञानाश्रयणमेव निःश्रेणिः६ समुन्नतेः। भविष्यति भविष्यत्यप्यात्मज्ञानाश्रयेणैवैषामुत्तरोत्तरमुत्कर्षः। आर्याणां खलु निखिलात्मप्रतिपत्तिरेव पूर्वतोऽनुवृत्ता सम्पत्तिः। आत्मतत्त्वप्रतिपन्नाश्चैतद्देश-

---

१- सुमं कुसुमं तत्समा धूः कार्यनिर्वहणक्षमता येषां तादृशैः।
२- निष्पापः। आगोऽपराधः, पापं च। ३- अनपाचीनं शुद्धम् अविकृतम्।
४- अविगीतमनिन्द्यम्। ५- संभिन्ना मिश्राः। ६- सोपानम्।

प्रसूताः पूताः प्रतिभूतानुभूतात्मानः कृतात्मानो महात्मानः सकल-भुवनतलशिक्षकाः सम्पेदिरे। सम्पद्यन्ते सम्पत्स्यन्ते च चिराय। तस्यैतस्यात्मतत्त्वस्य मूलं चत्वारो वेदाः सन्ति। वेदादेवात्म-तत्त्वज्ञानमाविर्बभौ। तथा चाह मनुर्मुनिः — 'वेदाद्धर्मो हि निर्बभौ' इति।

अतो हेतोः श्रीमहर्षेर्वेदेष्वभूतपूर्वाऽतुला विपुला च स्फीता प्रीतिर्भक्तिरनुरक्तिश्चासीत्। स दृढं वेदानुगामी स्वामी बभूव। वेदं प्रत्यप्रत्ययं१ प्रकटयन्तमसौ निरत्यय२मत्यन्तायात्याक्षीत्। वेदं प्रतीता३ एव तत्प्रीताः सखायस्तत्सख्यं जानते स्म। प्रयुञ्जते स्म चैवं समञ्जसं वचः — भद्रास्य लक्ष्मीर्निहिताऽधिवागिति। आत्मज्ञानसहायं सखायं तमाम्नाय४मनाम्नाय५मनाम्नायं यस्तत्याज तस्यानिर्वेदस्यापि६ सतो निर्वेदस्य७ वाच्यपि भागोऽवाच्यो८ वाच्यो नास्तीत्याह स्म महर्षिः। वेदानुरोधादेवायं साधुकर्मा साधुर्मुम्बय्यामहमदाबादे च प्रार्थनासमाजवादिनामर्थित-कदर्थना९भाजनमजनि। पश्चाच्च विपश्चिदपश्चिम एष कलकत्ता-मधिवसतां सतां स्निग्धानां विदग्धानामपि वेदप्रतिरोधादेवाप्रीति-पात्रमप्यभूत्। महाधनं१० परहितसाधनं निष्कारणं परविपन्नि-वारणं परमार्थोपदेशश्चेति लक्ष्यमेव मुख्यं परिलक्ष्यमपरिचक्ष्यं११ च महर्षेः सिषाधयिषितमभवत्। आसीच्च तस्य परमात्मदेवे

१- अप्रत्ययं, अविश्वासम्। २- निर्बाधम्। ३- वेदं प्रति इताः गताः। अधीतवेदा इत्यर्थः। तत्प्रतीताः तद्विश्वस्ताः। ४- आम्नायो वेदः। ५- अनभ्यासमनभ्यासम्। आभीक्ष्ण्ये णमुल्। ६- निर्वेदो ग्लानिः तद्रहितस्यापि। ७- वेदरहितस्य। ८- अनिन्द्यः वाच्यः वक्तव्यः। ९- इच्छा-विरोधपात्रम्। १०- अत्युच्चम्। महामूल्यम्। ११- अपरिवर्जनीयम्। वर्जने ख्याञादेशप्रतिषेधः। १२- निश्वासेन सहितः।

परमो विश्वासः सनिश्वासः१।

स ह्यविनश्वरमीश्वरं जगतोऽसाधारणं कारणं मेने। तस्यैव विश्वेशस्य जगदीशस्य शान्तं शरणमन्विच्छन् बहुधा कृच्छ्रपतितोपि स नोद्विविजे। विपद्वज्राघाते दुर्गतेर२ जाते सत्यपि न मनाग् व्यमनायत। सकलसम्प्रदायानां विभिन्नमतान्तराणां गुरूणां प्रातिपथिकगुरूणां३ मठधारिणां वठराणां४ कठोरजठराणां व्यपगतभयः स तीव्रामतिरोचनां समालोचनामतनोत्। तं पीडयितुं निव्रीडैः कृतक्रीडैर्निचितनिविडनीडैर्मताभिमानिभिः समग्रैर्व्यग्रैः कृतमण्डलैरुदग्रा मण्डलाग्राः५ समग्राह्यिषत। सनिकारं६ बहुवारं च खलैरखिलैर्विकलैरविरलतरलगरलदानमप्यकारि। परन्त्वकुतोभयः स परमात्मनिष्ठः कृष्टिर्विकटाटवीष्वटन् पटुपाटूपटान्७ हठिनः शठान् कपटिनः पाटच्चरा८नुच्चाटयन् एकाकी विचचार। विरोधिजनसहस्रेप्यजस्रमेकल एवानाकुलः सन् भयवर्जं जगर्ज। अदसीयमिदं९बलं केवलं भुवनभावनपावनभगवद्विश्वासान्वायत्तमेवाश्वयीत्१०। भगवतीश्वरे इव वेदेपि स परिवृढो दृढं व्यश्वसीत्। यदा स विज्ञोऽज्ञासीद् यन्मेडमब्लेवस्टिकी११ वेदाङ्गोपाङ्गे सर्वज्ञे भगवति परे ब्रह्मण्यनास्थामाकलयति तदा झटित्येव थियासोफिकलाभिधायाः समितेः स्वं सम्बन्धं भङ्क्तुं सन्नद्धोऽभूत्। तत्र विषये पाश्चात्यानां स्वशिष्याणां प्रगाढप्रीतिमपि साबाधां मत्वा नाबाधात्। अनादृत्यामप्रतीत्यां१२ च तां प्रतीत्य सत्या-

---

१- निश्वासेन सहितः। २- व्यसने कष्टे वा। ३- प्रतिपथं यन्ति प्रातिपथिकाः ते च ते गुरवः, तेषाम्। ४- मूर्खाणाम्। ५- खड्गाः। ६- सतिरस्कारम्। ७ - हिंसकान्। ८- दस्यून्। ९- अमुष्येदमदसीयम्। तदीयमित्यर्थः। १०- ववृधे। ११- मेडम ब्लेवस्टिकी इति नामविशेषो वैदेशिक्याः स्त्रियाः। १२- अविश्वसनीयाम्।

सत्यविवेकविन्नित्यं सत्यं परं ब्रह्मादम्भनीत्याश्रयेण नात्यन्तमत्यजत्। वेदोदितमनुशासनमनन्या चेश्वरभक्तिरितीमे द्वे धर्मस्याङ्गे निःसङ्गस्य तस्य सर्वजनीने वस्त्रे इवास्त्रे आस्ताम्। समिद्धबुद्धिरसौ शुद्धान्तरात्मा प्रसिद्धोऽद्धा१सिद्धान्तसिद्धे वैदिकराद्धान्तविशेषे बद्धाञ्जलि श्रद्धाप्रतिबद्धान् कृताभिनिवेशान् समस्तान् जातिविशेषान् समीकर्तुं यथेष्टमाजीवनमचेष्टत। समाजस्य संशोधनं प्रतिबोधनं च विना कस्या अपि प्राच्याया रुच्याया अपि जातेर्विविच्य समुन्नयनं तत्सौभाग्यदर्शनयोग्यतालाभश्च नातीव सुगमं सुशकं वा कार्यमस्ति। महर्षिर्दयानन्दः स्वसमये सर्वातिशायी विषपायी समाजस्य सुधारकः परिष्कारकः साधीय उपकारकश्चावर्तत। यद्यपि तत्समकालभवा अन्येऽप्यनेके सज्जनाः समाजोद्धारपरायणाः समजनिषत तथापि स्वामिमहोदयस्तेषां समेषां मूर्धाभिषिक्तं पदमतिरिक्तमधिष्ठितश्चकाशे। अग्रेसरः केसरीव स समाजसंशोधनप्राग्रहरः सकलधर्ममूलमुत्खातशूलं वेदमेवानुकूलं दुकूलं मत्वा तत्परिदधत् सत्यमभिदधत् कुरीतीरुद्धरन् प्रासरत्। पुरातनानाचारान्, प्राचीनान् व्यवहारान्, अशेषान् प्रागितिहासावशेषान्, अतीताः स्मृतीः, वीतकालं धर्मकर्ममर्मजालं, प्राक्तनीमनन्यलभ्यां पुण्यार्यसभ्यतां तन्मानमहत्त्वं चेत्येतदखिलं गलितं स्खलितं मलिनितं च सदवलोक्यापि तत्संचिस्कीर्षया स नूतनया दिशा ललितं संकलितं संतुलितं च विधातुमाहितयत्नश्चिरत्नं तदत्यन्ताय त्याज्यं नामान्यत। आर्याणां पुराणीं कल्याणीं वाणीं सभ्यतामवहेलितां निमीलितां च विलोकयितुं नासौ क्षणमप्यक्षमत। स ह्येवममंस्त—यदार्याणामवाच्यामपि२ प्राच्यां सभ्यताममूमवाच्यमपि३ वाच्यमिदं४ वक्रं कालचक्रं चङ्क्रम्यमाणं चञ्चलताञ्चलं

१- अद्धा सत्यं, तात्त्विकं च। २- अनिन्द्याम्। ३- अवाग्भवमवाच्यम्। पाश्चात्यमित्यर्थः। ४- निन्द्यम्।

संचाल्य धूलिधूसरामूषरां सुषिरां१ च वितेने । तस्या आकृतिं प्रकृतिं च विकृतामतानीत् । परमेतेन किं नश्छिन्नम् । इदं हि प्रत्नं२ रत्नमस्मदीयमेवास्ति । चिन्तामणिरयं सकलकामदुघः । अयं नः पैतृको दायः । अस्यायेनैव३ कृताभ्युदयोऽस्मज्जनसमवायः । अस्माभिर्यंशोधनैर्विहितशोधनैरेतत् परिष्करणीयं निर्मलीकरणीयं च । सर्वथाविष्करणीयमिदं द्रव्यं भव्यैर्न तु वहिष्करणीयम् । इयमेवार्याणामकदर्यानिवार्यतया व्यवहार्या च सभ्यता संस्कृतिश्च पुरा सम्पन्नाप्येतर्हि गर्हितापदमापन्ना । प्राणैः परैरप्येतत्परित्राणं नः कर्तव्यकोटिमाटीकते इति ।

वरेल्यामुच्चाङ्गलराज्याधिकारिणां समक्षं सत्यपक्षरक्षणसमर्थने भीषणं गर्जनम्

संयुक्तप्रान्तान्तर्गत–मेरठ–वदायूँ–मुरादावादादिपत्तनेष्वविकत्थनः४ प्राप्तोदात्तकीर्तिरसंभ्रमं भ्रमन्नयं समुन्नयं नयन्नार्यनयं नानानार्यकृत्यविकर्तने निजवाक्कर्तरीं५ नर्तयन् विकर्तनप्रभः६ प्रभावशाली शालीनो लीनोऽनन्ते ब्रह्मणि स्थिरशर्मणि सत्यार्थसमर्थनाय समर्थं शास्त्रार्थं प्रवर्तयन् अभिनवप्रतिभाप्रतिभातसकलशास्त्रमर्मा शुभकर्मा द्विजन्मा सर्वहितैषी मनीषी यतीशो विलुलितचपल७-बहुलमतकेलिं वरेलीं समाययौ । तत्र निरुद्वेगं कृतसमागमो वेगमोद्याने श्रीलाललक्ष्मीनारायणस्य सप्रसादं प्रासादमध्युवास ।

१- सच्छिद्राम् । त्रुटितामित्यर्थः । २- पुराणम् । ३- आयेन, अयेन इति द्वेधा छेदः । आयः द्रव्यसमागमः । अयः सौभाग्योदयः । अयः शुभावहो विधिरिति कोशः । ४- स्वश्लाघारहितः । ५- वागेव कर्तरी 'कैंची' इति भाषा। ताम् । ६- विकर्तनः सूर्यः तत्तुल्यप्रभः । ७- व्याप्तचञ्चलनानामतान्तर-क्रीडाम् ।

अत्रस्तश्च तत्रस्थः कतिपयान्यहान्यघानि१ घ्नन्ति लसन्ति कियन्ति-चिद् अत्युच्चप्रभावोत्पादकानि मनःप्रसादकानि व्याख्यानान्य-कार्षीत्। सुचिरं रुचिराणि यानि कर्णगोचरीकर्तुमादरिणः पादरिणः प्रोच्चाङ्गलराज्याधिकारिणः कर्मचारिणश्च प्रत्यहमव्यवायं२ समवायन्। अनितरसाधारणद्युतिरितरैर्दुर्व्याख्यानावसरे निरस्तै-षणो धिषण३ इवास्तदूषणधिषणो मनीषिणामग्रणीर्यतिवरः पुराणकथोपकथा यथायथं समालोचयन्नुच्चैरूचे— पुराणभाणक-वाणीं प्रणयद्भिरेभिर्ग्रन्थग्रन्थिं प्रथयद्भिरधन्यैर्धन्यास्वपि कुन्त्यादि-कन्यासु जघन्याः कियन्तोऽमी हन्त स्वकपोलपालिकल्पिताः कलङ्का निःशङ्कमङ्किताः सन्ति। ताराकारास्वपि तारा-दामोदरीप्रभृतिषु सारासारविचारशून्यैरेभिः पण्डितंमन्यैरकथ्या४ मिथ्याध्यारोपाः साटोपमारोपिता इत्याश्चर्यम्। मधुरोपहासरसरसिकस्य वाग्गिमनः स्वामिनः प्रथिताख्यानं व्याख्यानं दीर्घदीर्घतरं सदपि समुचितं रुचितं चौच्यत। तत्रैतावदावेद्यं वेद्यं च तत्त्वमविद्यत येनानियन्त्रणं श्रोतृणां चेतो नाखिद्यत। प्रकाशं स्वामिसकाशमुपस्थितास्तदीयैः सोपहासैर्वाग्विलासैर्विकसिताः प्रह्लन्नाः५ सन्तो भल्लवन्तो मल्लामुल्ला-प्रभृतयोऽप्यक्षुल्ल६मुल्लासमासेदुः। तदानीं श्रवणासेचनायां७ रोचनायां पुराणानां समालोचनायामित्थं तथ्यमुत्थापयतस्तद्रहस्यं च रस्य८-मुद्घाटयतः स्ववाणीवीणाक्वणननैपुणीमुन्नाटयतो यतिवरस्य महर्षेः सहर्षवर्षं संनिकर्षेण भाषणमाकर्णयन्तः प्राप्तदयानन्दा९ इव प्रकट-

---

१- अघानि पापानि कष्टानि वा। २- व्यवधानरहितं निरन्तरमित्यर्थः। ३- धिषणो बृहस्पतिः। ४- अकथनीयाः। ५- प्रसन्नाः। ६- अक्षुद्रम्। महान्तमित्यर्थः। ६- कर्णतृप्तिकरायाम्। न जायते यत्र तृप्तिस्तदासेचनं विदुः। अत्यानन्दजननीमित्यर्थः। ८- रसनीयम्। ९- हर्षातिरेकाद् दयानन्दमेव प्राप्तं मन्यमाना इत्यर्थः।

स्फीतहृदयानन्दाः प्रफुल्लवदनाम्बुजाः प्रस्फुरद्भुजाः कृतमण्डला मण्डलाधीशा बृहन्मण्डलाधीशा राज्यपालाः करालास्तथा चान्ये योरोपीयाः स्वीयाः परकीयाश्च सज्जना जनान्तिक१मन्तिकमिता मिथो यथाकारं२ तथाकारं विकृतकारं सविशेषमहसिषुः। कियन्तंचित् कालमेवं पुराणगल्पानामनल्पं तल्पमधिशाय्य स्वामी धाय्या३मृच- मिवाघमुचमिमां वाचमजल्पीत्—एषा कद्वेशा दुरभिनिवेशाऽश्लीला तु पौराणिकी लीला। एतर्हि गर्हिता क्रीश्चीनापाचीना४ निखात- कीला लीलापि निरीक्ष्यतां समीक्ष्यतां च— एते किल खला अनिवार्याः कुमार्याः पुत्रमव्यवहार्यमनार्यत्वादुद्भावयन्ति। तदीयेन दोषेण च निर्दोषं सर्वज्ञमज्ञाः शुद्धस्वरूपमविनश्वरमीश्वरमपि दूषयन्ति। एतां विगीता५मतिदूरं नीतां क्रूरां घोरां क्रीडां कुर्वन्तोऽपि न व्रीडामनुभवन्ति। एतदाकर्ण्य वर्ण्यवेशस्य बृह- न्मण्डलाधीशस्य तिमिंगिल६गिलस्येवाङ्गलस्य वक्त्रमपरवक्त्रमिव७ विषमं प्रशमं जहत् कोपावेशविवशं वक्रमुग्रं चाजनि। स्वामी तु सत्यं ब्रुवंस्तदवस्थ एव स्वस्थोऽवास्थित। अमुष्य यीशुमतमाशु वशीकृत्य प्रवर्तमानं साभिमानं निर्दूषणं भाषणमवलम्बितविलम्बं ससंरम्भं जजृम्भे। अन्येद्युर्बृहन्मण्डलाधीशः श्रीलाललक्ष्मी- नारायणं स्वामिभक्तिपरायणं स्वयमाहूय प्रोवाच - भवता श्रीमान् पण्डितः स्वामी दयानन्दो महाशयो मदाशयमसंशयं सूचनीयः— यच्छास्त्रेषु पठितिना श्रीमता हठेनातिकठिनः पाखण्डखण्डनदण्डो न प्रयोक्तव्यः। वयं यीशुमतावलम्बिनस्तु समुज्जृम्भितसंरम्भाः८

१- रहसि। २- यथा तथा कृत्वा। यथातथयोरसूयाप्रतिवचने इति करोतेर्णमुल्। ३- अग्निसमिन्धनी ऋग्विशेषो धाय्या सामिधेनीति च। ४- अशुद्धा अपवित्रा। ५- निन्द्याम्। ६- मत्स्यविशेषस्येव, ७- छन्दो- विशेषः। विषमवृत्तमपरवक्त्रं भवति। ८- समुद्दीप्तकोपाः।

स्वदेशलभ्यसभ्यतया युक्तत्वात् सुशिक्षितत्वाच्च कृतावमर्शा[१]अप्यमर्षं मर्षिष्यामहे। न वयं वादविवादकृतदम्भ[२]विडम्बनैर्डिम्भा[३] इव विडम्ब्यामहे[४]। किंतु घूर्णितशोणितविन्दवो हिन्दवो दीर्घकोपाटोपानलज्वालोज्ज्वालोच्छलदुच्छूनोच्छ्वासपवना यवनाः समुत्तेजिताः समुद्वेजिताश्च सन्तोऽसन्तोषपराहता हताहता इव सरोषं दोषपोषमेव पुष्णन्तो भवद्व्याख्यानमेव निरुपाख्यानं कृत्वापध्वंसयिष्यन्ति व्यंसकाः[५] इति। श्रीलक्ष्मीनारायणस्तु वृहन्मण्डलाधीशप्रेषितं तं संदेशविशेषं स्वामिसदेशं प्रवेशयितुमाप्तनिदेशः समुपगतोपि भगवतो यतिवरस्य तेजोविशेषेण प्रतिरुद्धपौरुषः संत्रासमापन्नो विपन्नो न तत्र किंचिद् वक्तुं प्राभवत्। प्रौढोपि किंकर्तव्यविमूढो जातः। अन्ते प्रकटीभूतविकटकासश्वासः श्लथत्कण्ठोऽकुण्ठितोत्कण्ठोपि कथं कथमप्येवं वाचं मृदुपदामुपदां[६] विदधे— महाराज! यदि श्रीमान् मतिमान् वीतरागो महाभागो विभिन्नसंभिन्नमतान्तराणां खण्डनमण्डनमचण्डपदमण्डनं[७] सरलया कोमलया वाक्कलया कलयेत् तर्हि साधीयः सम्पद्येत। हृद्यमनवद्यं च भवद्यशः सपद्यविपद्यमानं सर्वैर्गद्यं स्यात्। तया विधया सम्यक्तया जनतापि साधु प्रभाविता भवेत्। जनतापि[८] वचः समश्चितमपि न्यञ्चं[९] मञ्चमञ्चतु[९]। सकलकलखलगलोल्लापविकलाः सकला आकुला अपि कृतमङ्गलाः कलाविदं भवन्तमुपसन्नाः प्रसन्नाः संमानयेयुरिति। एतन्निशम्य रम्यः सौम्यः स्वामी प्रस्मृतस्मयोपि[१०]

१- संजातधर्षणाः। २- छलानुकरणैः। ३- बालाः। ४- उपहस्यामहे। ५- धूर्ताः। ६- प्राभृतम् 'भेंट' इति भाषा। ७- अकठोरपदभूषितम्। ८- जनसंतापकृत्। ९- नीचैः स्थानं गच्छेत्। १०- विस्मृतगर्वोपि।

स्मयमान आह स्म— एतावत्येव वृत्ते वृत्ते प्रतिभावान् भवन् भवान् द्राक् प्रतिबद्धवाक् संवृत्तः। एतदर्थमेव व्यर्थं किमिति वाचोऽव्याहरणात् कालहरणं मे कृतम्। अवगतं मया भवद्-हृद्गतमभिधित्सितं मद्वितं वचः। ननु बृहन्मण्डलाधीशो मां प्रति सम्प्रतीदमेव तावन्मुक्तकण्ठोऽकुण्ठोत्कण्ठो वक्ति यद् भवत्पण्डितो दयानन्दः स्वामी कटुवचनरचनापटुरतिकर्कशैस्तर्कैस्तर्कयन्नर्थ-सतत्व१मनपेक्षितोदर्कोऽर्कवत्२ प्रतिभासमानोऽखण्डं प्रचण्डं खण्डनदण्डं पातयन्नस्तर्दं तर्दं३ नर्दं नर्दं मर्दयति। एवंविधौ निर्व्यवधौ४ सत्यघौघविध्वंसविधौ सत्कृतान्यसकृत् तत्कृतानि व्याकृतानि५ निराकृतानि सन्ति विविधौषधप्रतिबन्धैरन्तर्धौ निबध्य प्रति-रुद्धानि भविष्यन्तीति। दृश्यतां विमृश्यतां च भोः! नाहं कश्चिदाश्चर्यभूतोऽननुभूतो भीषणतमो भीषणतमोभूतं भूतमिव विलक्षणसंहननद्६स्त्रासजननः प्राणभृदस्मि। यतो भवान् मत्त इव मत्तो यतेरप्यतितमां भीतोऽभूत्। इष्टं निजाधीशसंदिष्ट-मिष्टेन स्पष्टेन च वचसा भवता शिष्टेन संनिकृष्टेन सता मां प्रति निर्देष्टव्यमासीत्। तत्रोपविष्टः शिष्ट एको विश्वस्तो जन आश्वस्तो भूत्वा प्रोवाच—कृताभ्युदयः स्वामिमहोदयस्तु वस्तुतः स्तुतिभाक् प्रसिद्धः स्वयंसिद्धः पुरुषोऽस्ति। एष समेषामप्यमीषां भावाना७-मन्तर्गतान् स्वगतानपि भावान् भूतभावनो वेद। अपरेद्युरात्म-स्वरूपमधिकृत्य कृत्यविदा वेदविदांवरेण महर्षिणा व्याचिख्या-सितमासीत्। यदा यतिवरो व्याख्यानभवनं प्रविवेश तदा तदा-

---

१- पदार्थयाथार्थ्यम्। अनपेक्षितोदर्कः अविभावितपरिणामः। २- अर्कवत् सूर्यवत्। ३- हिंसं हिंसम्। तृद्धातोर्हिंसानादरार्थकस्य णमुलि रूपम्। एवं नर्दं नर्दम्। ४- निरन्तराये। ५- व्याख्यानानि। कृधातोर्भावेक्तः। ६- विलक्षणशरीरः। ७- पदार्थानाम्।

गमनात्पूर्वमेवोपेत्य तत्रोपविष्टैः शिष्टैः श्रोतृजनैस्तत् समन्ततः परिपूर्त्त्या संमूर्छितमवर्तत। तस्मिन् दिवसे प्रशस्तललाटं स्काटं पादरिणं विहायान्ये सर्वेपि मान्याः पारिषद्या विद्यानिधेर्भगवतः स्वामिनो दयानन्दस्य सन्निधिमिव१ सन्निधिमाश्रयन्तः सन्तस्तदीयमानन्दामृतबिन्दुस्यन्दि वचनं श्रवणप्रवणाभ्यां श्रवणाभ्यां२ निपातुं परितो निपेतुः। सम्राडिव परिव्राड् यतिवरः प्राञ्जल३-मञ्जुलायां व्याख्यानवेलायामात्मस्वरूपानुगुणान् गुणानुपवर्णयन् सत्यविषयमुद्दिश्य विशिष्येत्थंभूतं भूतार्थं बभाषे। नित्यमसत्यरतानुपरतानिव४ मत्वा भयवर्जं तर्जं तर्जमूर्जितयशाः प्रकाशमेवमगर्जीत् – लोका भणन्ति सत्यार्थप्रकाशो न विधीयताम्। सत्यस्यार्थस्य प्रकाशेन मण्डलाध्यक्षः प्रत्यक्षं कोऽपि कोपिष्यति। कश्चित् परोक्षमीक्षितुमक्षमो न क्षमिष्यते। वृहन्मण्डलाधीशोऽप्रसन्नः सन्नासन्नमनासन्नं वा पन्नग५ इव विपन्नं विधास्यति। राज्यपालः कालकरालः क्षणे क्षणे कटु क्वणन्नानुकम्पां सम्पादयिष्यति। निर्व्रीडं६ कृतक्रीडः पीडयिष्यति चेति। हंहो! अनहंकारोऽहं हुंकारपूर्वकमनंहा७ वंहीयोंऽहःसंघातं८ संघातं संघातं९ सर्वसमक्षं सत्यपक्षरक्षणसक्षणः कृतलक्षणो विचक्षणः स्वच्छं यथेच्छं ब्रवीमि— कामं सकलभुवनतलवर्ती संवर्त१० इवापरिवर्ती विभ्राट् सम्राडपि विराट् स्वराड्भूतः प्रभूतं कुपितः क्षुभितो वा भवेद्, विषीदेदवसीदेद्वा विपश्चिदपश्चिमः कश्चिद्, वयं तु सर्वदा सर्वथा च सत्यमेव वक्ष्यामः। इदमहमनृतात् सत्य-

---

१- श्रेष्ठं निधिं कोशमिव। २- कर्णाभ्याम्। ३- रोचकसौन्दर्ययुक्तायाम्। ४- मृतानिव। ५- सर्प इव। ६- निर्लज्जम्। ७- निष्पापः। ८- अतिबहुलपापसमूहम्। ९- संहृत्य संहृत्य। सम्पूर्वाद् हन्तेर्णमुल्। १०- संवर्तः प्रलयः।

मुपैमीति वेदोदितमुदितं मुदिताः संसृतितरणसेतुं समुन्नतिहेतुं सत्यं केतुमेव समुदिता वक्ष्यामः१। तदनन्तरं महाराजो यतिवरः कानिचिदविगीतगीतोपनिषद्वाक्यान्युदाहरन् मनोहरां गिरमिमामुदगारीत्—

न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥

न जातु कामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः॥

अयं भावः— अयमात्मा न कदाचिज्जायते समुत्पद्यते, न च म्रियते मरणं प्राप्नोति। न चायमात्मा पूर्वं भूत्वा पश्चाद् भूयः पुनर्न भविता भविष्यति, अपि तु सर्वदैवायं सर्वथा जन्ममरणरहितः स्वस्थस्तिष्ठति। अजः अजन्मा, नित्यः शाश्वतः शश्वद्भवः, पुराणः पुरातनः सन् शरीरे हन्यमाने सत्यपि नायमात्मा हन्यते। एनमात्मानं शस्त्राणि न छिन्दन्ति छेत्तुमर्हन्ति। एनमात्मानं पावको वह्निर्न दहति दग्धुमर्हति। एनमात्मानं चापः जलं न क्लेदयन्ति, क्लिन्नमार्द्रं कर्तुं न प्रभवति। मारुतो वायुश्चैनमात्मानं न शोषयति शोषयितुमर्हति। कामाद् भयाद् लोभाद् जीवितस्य प्राणस्यापि वा हेतोः कारणाद् जातु कदाचिद्

१- वहतेर्लृटि रूपम्। धारयिष्यामः।

धर्मं न त्यजेत् । यतो हि धर्मः सत्यरूपो नित्योस्ति । सुखदुःखे त्वनित्ये स्तः । अयं जीवो जीवात्मा नित्योस्ति । अस्य जीवस्य हेतुः शरीरेन्द्रियसंघातरूपो भोगसाधनं त्वनित्य एवास्ति । इति ।

अथोद्दीप्तयोर्नयनयोरुभयोरभयं समन्ताद् दिगन्ते ज्योतिः–संचारं कुर्वन्नखर्वगर्वेणाह— असौ शूरवीरो धीरो गभीरः सरुषः परुषः पुरुषो मत्संनिकर्षमाकृष्यताम्, मम समीपमुपनीयतां, मदक्षिलक्षीकार्यतां यो ममान्तरात्मानं भेत्तुं छेत्तुं वाभिमन्येत वीरंमन्यो मन्युमान् । कः सावलेप१ एवं मिथ्याकथ्या२पथ्योपलेपेनात्मना निर्बर्हित३गर्हिताचारः समर्हति गर्हितुम् । यावदेवंभूतोऽद्भुतविभूति-संभूतो विधूतपाप्मा पुमान् मे न प्रतीतिपथमवतरति तावद् दयानन्दस्य सत्यविषये सन्देहदोलाधिरोहणं स्वप्नेऽप्यसंभाव्यमिति विभाव्यताम् ।

इत्थमुत्थितेन भगवतः सिंहनादेनेव वीरवादेन निखिलं तद्-भवनममन्दं दन्ध्वन्यमानमभूत् । सर्वतोऽध्वनि तद्ध्वनिरेव प्रति-ध्वनितोजनि । अस्तापरव्यापारा समस्तापि समिति४रमितेन तेन ध्वानेन विस्मृताध्वा स्तब्धेव मुग्धेव च संजाता । यतिवरेण सकलजनाकर्षणे मधुरामृतवर्षणे भाषणे समापितेऽपि सति तज्जन्यो नादो ध्वस्तविवादो लोकानां कृतालोकानां५ वाङ्मधुस्नपितानामिव श्रवोविवरे६ चिरकालं यावन्मञ्जु जुगुञ्ज ।

१- सगर्वः २- मिथ्याकथ्यस्य कथनीयस्य अपथ्यस्य अहितकरस्य वस्तुन उपलेपेन विलेपनेन । ३- ध्वंसितनिन्द्याचारः । ४- समितिः सभा । ५- कृतप्र(का)शानाम् । ६- कर्णकुहरे ।

पादरिस्काटमहोदयस्यानुरोधेन तदोययीशूपासनामन्दिरे गमनं, तत्र सत्यधर्मोपदेशश्च

कृतादरेण पादरिणा स्काटाभिधेन बुधेन समं स्वामिनः स्फीता प्रीतिरासीत्। स्काटमहोदयः प्रत्यहमत्यादराद् भगवतो व्याख्यानश्रवणाय सदसि कृतोदयोऽजायत। इदम्प्रथम१ एवासाववसरः प्रासरद् यस्मिन् निरन्तरमन्तरायरहितेऽन्तरमभूत्। व्याख्यानावसाने स्वामी स्वेच्छया पप्रच्छ–अद्य भक्तः स्काटमहोदयः सभायां न समायातुं प्राभवत्। किमित्यसावद्याविपद्यमानोऽप्यनवद्यं समाजं नाससभाजदिति२। केनाप्युत्तरं दत्तम्—रविवासरे तेषामुपासनामन्दिरं प्रवर्तते। तत्र चार्चनीययीशुभगवच्चर्चः प्रचर्च्यते। अतो हेतोरेवासावद्यागमने व्यपद्यत। ततः सभाभवनाद् बहिरेत्य यतिवरः प्रोक्तवान्— आगम्यतामद्य भक्तप्रवरस्य स्काटमहाशयस्यानावृतकपाटः प्रभूपासनामन्दिरवाटः३ संदृश्यताम्। प्रणतेन मनुष्याणां त्रिचतुरशतेन सह स्वामी तदुपासनामन्दिरमभ्यैत्। मुनिवरमायान्तं निभाल्य तत्तुल्यमवेकल्यमाकलयन् सदाशयो महाशयः समादरी पादरी स्काटः प्रणतललाटः क्षिप्रगतिपाटवं नाटयन् मन्दिरवेद्या अधस्तादवातरत्। भृशमनुनयपुरःसरं च यतीश्वरं वेदीमध्यमध्यास्य४ सदुपदेशदानायाभ्यर्थयामास। भक्तभक्त्याग्रहानुगृहीतः स्वामी तत्रैकां घटिकां यावद् वेदधर्ममुपदिशन् मनुष्याणामीश्वरत्वाभ्युप-

---

१- अयं प्रथमो यस्मिन् अवसरे स इदम्प्रथमः। यथा तत्पूर्वः। स पूर्वो यस्मिन् सः। तथा च प्रयोगः– सोढुं न तत्पूर्वमवर्णमीशे। अवर्णापवादः। २- अससभाजत् सममेलीत्। ३- वाटो मार्गः। ४- णिजन्तस्य रूपम्। उपवेश्येत्यर्थः।

गमे भूयसो दोषान् निदर्शयामास। उपस्थिता लोका मनःप्रहर्षणं तद्भाषणं दत्तचित्ताः सहर्षविशेषमश्रौषुः। बरेलीपुर एव मुनिवरेण सह स्काटमहोदयस्य स्फुटं द्व्यहं यावत् संवादोऽभूत्। संवादश्चैष बरेलीपुस्तकालयमध्ये श्रीलक्ष्मीनारायणस्य साभापत्ये सत्येवाध्यजायत। बुद्धिशुद्धयेऽनुबद्धः प्रसिद्धोऽयं शास्त्रार्थो मधुरमुदलसद् यत्रोत्तरं प्रत्युत्तरं च त्रिभिर्लेखकैः सक्रियैर्लेखबद्धमक्रियत।

श्रीनानकचन्दसूनोर्नवयूनो मुंशीरामस्य (भाविनः श्रीस्वामिश्रद्धानन्दस्य) अभिरामेण यतीश्वरेण सह संलापः

बरेलीपुर्यामार्यधर्मं प्रचारयत्येव यतीश्वरे श्रीमुंशीरामस्य पिता श्रीनानकचन्दाभिधेयस्तदानीं नगरकोटपालो विललास। मुंशीरामोपि स्वपित्रा सह तत्र संनिहित आस्त। असौ तेषु दिनेष्वदीनो राजकीयमहाविद्यालयाधीनोऽकालहीनमात्मनीन[१]मध्ययनं प्रकुर्वाणो नवयौवनं बिभ्राणो व्यराजत। जगदधीश्वरे भगवति परमेश्वरे कृतभ्रमोच्छेदे वेदे च तस्य विश्वासो नासीत्। धर्मकर्मण्यप्यनास्थित[२] एवासावास्थित। तज्जनको नानकचन्द्रस्तु प्राज्य[३]राज्यवृत्त्या लब्धसमज्यो[४]ऽमन्दमानन्दं विन्दन् पुराणधर्मेऽतिनिष्ठावान् प्रतिष्ठामापत्। प्रत्यहं घण्टात्रयं यावत् पूजापाठपरायणो नारायणमस्मार्षीत्। स खलु स्वामिनोऽस्खलितं ललितं प्रथमं व्याख्यानं सहर्षविशेषमश्रौषीत्। स्वनिकेतमुपेतश्च दत्तसंकेतः प्रेमपारवश्यात् पुलकितगात्रः स्वपुत्रं वश्यं मुंशीरामं

१- आत्मने हितम् आत्मनीनम्। २- आस्थारहितः ३- प्राज्यं प्रभूतम्। ४- प्राप्तशोभः। समज्या कीर्तिः शोभा च।

प्रत्यभिराममेवमब्रवीत्— प्रिय मुंशीराम ! अत्र पुर्यामेकः शास्त्र-धुर्यः साधुचर्यः पाखण्डभाण्डखण्डनताण्डवपण्डितीको दण्डी स्वामी समायातोस्ति । स महान् विद्वान् योगिराजश्च विराजते । तदीयोपदेशश्रवणेन त्वदीयाः सर्वेपि संशया असंशयमवश्यं विनाश-मेष्यन्तीति । मुंशीरामस्तु विनीतनीतिपूर्वकमगर्वः स्वपितरं मृदुतरं प्रत्यपादयत्— यद्येवं, तर्हि श्वोभूतेऽहमपि भवता सार्ध-मद्धाबुद्धिविवर्धनाय१ तत्रावश्यमत्रासं२ गमिष्यामीति । एवमभिदधतोपि तस्य मनस्येषैव धारणा दृढं बद्धमूलोदलासीद् यत् केवलं संस्कृतभाषामात्रं विद्वान् कर्कशतर्कवितर्कपात्रं छात्रं मां कथं बुद्धिसम्बन्धिनीं चर्चां प्रचर्च्य सन्तोषपोषं पोषयितुमलं भविष्यतीति । आगामिनि दिवसे सत्सङ्गप्रसङ्गात् तत्र समा-गतोऽसावनेनसो३ निगमपथानुगामिनः स्वामिनः शुभदर्शनादेव सातिशयं प्रभावितोऽभवत् । यदा तेन प्रीत्या समुद्घाटितहृत्क-पाटाः स्काटादयो योरोपीया महाभागाः स्वामिनं प्रति गाढबद्धानु-रागाः पुरोऽवस्थिताः कम्राः४ विनयावनम्राः सत्यधर्मोपदेशं सविशेषमाकर्णयन्तः समदृश्यन्त तदा तेन दृश्येन तस्यौत्सुक्यमति-तमां ववृधे । घटिकापर्यन्तमन्तःपूतस्य महर्षेरुपदेशविशेषमशेषं हर्षेण शृण्वतोऽमुष्यानार्यजुष्यायां दूष्यायां निजविचारपरम्परायां निरन्तरायं भूयः परिवर्तनं प्रावर्तत । असौ मतिमतो भगवतो यतिवरस्य युक्तियुक्ता वाचोयुक्तिप्रयुक्तीः स्वमुक्तिहेतुकाः सकौतुकं प्रत्यैत् । तदानीं दैवयोगात् सदुद्योगी योगी सदैव दैवतेश्वरभक्ति-परो यतीश्वरः परमात्मदेवस्योम्नामोद्दिश्य विशिष्योपदेशं दिदेश । अश्रुतपूर्वोऽयमुपदेशो मुंशीरामं बलवदाचकर्ष । स्वोपज्ञप्रज्ञा-प्रज्ञातसकलशास्त्रार्थस्य कृतार्थस्य विदितवेदितव्यस्याधिगतयाथा-

---

१- तात्त्विकज्ञानवृद्धये । २- त्रासरहितम् । ३- निष्पापस्य । ४- कमनीयाः ।

तथ्यस्य तथ्योपदेष्टुः कृष्टेर्यतिवरस्याद्भुतविभूतिमतः शुद्धमतेर-भिनवं सदुपदेशं शुश्रुवानयं परमं प्रसादप्रासादमासेदिवानाभात्। ततः प्रभृति शुभाकृतिः कृतिमानयं विनयी प्रणयिनः स्वामिनः सत्योप-देशानशेषान् संजनितप्रभावान् विशुद्धभावः शुश्राव। यतिवरदिन-चर्यां चाञ्चितां१ लोचनाञ्चलेनाचञ्चलेनोञ्छितुमवाञ्छीत्२। तत्र कृताभिनिवेशश्च प्रथमेऽह्नि यामिन्याः पश्चिमे यामेऽर्धतृतीयघण्टानादे सत्येव निजवह्यमारुह्य३ तदुद्यानिकटमाटीद् यत्र महाराजस्वा-मिनो निवास आस। ततः कौपीनमात्रधारी ब्रह्मचारी पथ्याशी तथ्यभाषी कृतात्मा महात्मा व्यायामी स्वामी महामुनिरुद्यान-द्वारादाराद् बहिर्भ्रमणार्थं गन्तुं प्रचक्रमे। इतो मुंशीरामो-ऽप्यविरामं भास्करमिव वासरः प्रसरन् मस्करिणं तमन्वसरत्। यतिवरगतिवेगो हीयान् महीयान् अतितीव्रतरसंवेगोऽभूद् येन मुंशीरामः कियताचित् कालेनैव प्रचलन्नुच्छूनश्वासप्रश्वासो भूत्वा श्रान्तो निजयानाधिरूढो गृहं प्रत्याडुढौके४। उत्तरेद्युरुत्तरोत्तरौ-त्सुक्यातिरेकाद् निशाया द्वादशघण्टानादे जाते सति शय्योत्थायं५ धावन् सद्य उद्यानसमीपमुपेयाय। तस्मिन्नह्नि सोऽतिदूरं शूरः स्वामिनमन्वधावत्। तं च किंचित्कालावधि निरुपधि भगवद्-ध्यानावस्थितमवालुलोकत्। निजतर्कशक्त्यवलिप्तोऽसौ स्वामिन-मीश्वरविषयान् सविशयान्६ प्रश्नानप्राक्षीत्। किंतु तदीयया-ऽप्रतिरोध्यया वाचा प्रतिबोध्यमानः साभिमानोपि स दशभिरेव कलाभिर्वादानुवादं प्रवर्तयन् प्रतिबद्धबुद्धिः स्वां वाचं विकलाम-चकलत्। अन्ते त्रिरिमानि ह्रसद्भांसि वचांस्युदाजहार-महाराज!

१- शोभनाम्। २- उञ्छितुं कणश आदातुम्। सर्वांशेन लोचन-विषयीकर्तुमित्यर्थः। ३- वह्यं शकटम्। ४- प्रतिनिववृते। ५- शय्यायां उत्थाय। णमुलन्तं रूपम् ६- संशयसहितान्।

श्रीमता मतिमता मदीयमास्यं तु स्वकीयदास्यं नयता सताद्धा१ प्रतिबद्धम् । किंतु नेदानीं यावन्मम भगवति परमेश्वरे विश्वासांकुरो विशदमुदपादीति । तद्वच आचम्य नम्यं रम्यः श्रुतपारदृश्वा महर्षिर्विश्वासविषये तमाश्वासयन् बभाषे— प्रियमहाशय ! भवत्प्रयुक्तयुक्तीनां मया स्ववाचोयुक्तिप्रयुक्तिभिर्युक्तियुक्तं समाधानविधानमकारि । प्रत्याख्यातं च भवदाख्यातं प्रख्यातं युक्तिजातम् । भगवति विश्वासस्तु तदनुकम्पासम्पादनादेव सम्पत्तुमर्हति । तत्र नाहं प्रभुर्भवामीति । एवं स्वामिना लब्धाशीराशिरेष एव मुंशीरामः प्राप्तवयाः पर्याप्तकामः२ स्वमपावनं जीवनभवनं भुवनोपवने हवनपवनैः पुनः पुनः पावयन् वहुविधाधिव्याधिविकलसकलमानवनिवहस्य भगवद्भक्तिसुलभैः समाधिभिः सुभगंभावुको भावुकं३ भावयन् आर्याचार्यविचार्यकार्याण्यनिवार्यतया व्यवहार्याणि विचार्य वितन्वन्नहार्यनिश्चयो निर्व्याजमार्यसमाजमाजा४वपराजितमुपाजेकृत्य५ सभाजयन्६ अनार्यसभाजयन् यतिवरसत्सङ्गप्रसङ्गान्निरस्तव्यासङ्गो वेदवेदाङ्गादिसर्वाङ्गपूर्णजाङ्गलजङ्गिडादि७मणिसंगतकांगड़ी—गुरुकुलालवाले८ बालपादपानां९ प्रवालान्१० निर्मलललितसुशीतललुलित११गंगाजलतरङ्गभङ्गासङ्गान् सुपुष्टानदुष्टान् विशिष्टानुशिष्टान् अमलकोमलांगा-

---

१- तत्त्वतः । २- पूर्णकामः । ३- कल्याणम् । ४- आजौ युद्धे । अनार्यैः सहेति शेषः । ५-बलप्रदानेन समर्थयित्वा । ६-सम्मिलन् । ७-जङ्गिडो मणिविशेषः रोगविनाशकः । ८- आलबालमावापः । ९- वाला एव पादपाः वृक्षाः । बालाश्च ते पादपाः तेषाम् १०- नवांकुरान् । ११- लुलितं परितः प्रवहत् । इदं गङ्गाजलविशेषणम् ।

नुदिङ्ङ्य१न्नलङ्घ्यरंहा:२ सम्यङ् निर्बाहितांहा३ सिंहसंहनन:४ श्रीमान् स्वामी श्रद्धानन्दनामा दीप्तधामा समुल्लसितसितयशोंशुभिः शुभैः सुभूषितश्चकाशे । एतेनैव महात्मना शुभानुभावेन स्वप्रभावाद् हरयाणाप्रान्ते ससंमानं प्रवर्तमानं धर्मक्षेत्रं कुरुक्षेत्रम्, स्वस्थावस्थमिन्द्रप्रस्थम्, आर्षविद्याक्षेत्रं सकूपनिर्झरमजर्जरं झज्जरम्, विशालं विद्यापीठं भैंसवालं च गुरुकुलं मूलाधारशिलान्यासेन संन्यासिना स्वनामधन्यं कृतम् । जलंधरे चार्यधुरंधरेण धन्यतमं कन्यागुरुकुलमपि सप्रतिष्ठं प्रतिष्ठापितम् । महर्षिदयानन्दनिर्दिष्टया विशिष्टयाभीष्टया दिशा च 'उपह्वरे गिरीणां संगमे च नदीनाम् । धिया विप्रो अजायत' (यजुः २६-१५) इति वेदप्रतिपाद्यगुरुकुलसम्प्रदायस्याद्योऽयं प्रवर्तकः पप्रथे । तामेव जगद्धितां पद्धतिमनुवृत्य प्रवृत्तान्यनेकानि गुरुकुलानि निराकुलानि सम्प्रति सम्प्रतिपन्नार्यमर्यमर्यादानुसारीणि हारीणि बृहन्ति जगन्ति पुनन्ति विभान्ति । स एष सर्वं एवाखर्वधियस्तस्य विशुद्धमतेर्यतेर्दयानन्दस्यैव विमलधाम्नो महिम्नो विशेषः शेषानशेषान्नः सन्तोषयति ।

विधाता छन्दः

यतीशो मण्डलाधीशानजैषीद् वाग्मितो५पायात्
कुरीतीरुद्धरन् प्रायः समस्ते नीवृति६ प्रायात्७ ।
अमायं८ सम्प्रदायानां प्रकाशं सम्परायेऽयं९
समायन्१० बह्वपायेपि११ प्रियं लेभे यशो गेयम् ॥

इति तृतीय उल्लासः ।

१-प्रेरयन् समुन्नयन् इति भावः । २- रंहो वेगः बलं वा । अलङ्घनीयबलवेगः । ३- अंहः पापं कष्टं च । विनष्टपापः । ४- शार्दूलसमशरीरः । ५- वाग्मिता प्रशस्तभाषिता । तस्या उपायात् । प्रशस्तवक्तृत्वकलासाधनेनेत्यर्थः । ६- देशे । नीवृज्जनपदो देशः । ७- गतवान् । ८- अकपटम् । ९- युद्धे । १०- समागतः सन् । ११- बहुविघ्नेपि ।

अथ चतुर्थ उल्लासः

शार्दूलविक्रीडितं वृत्तम्

कृत्वानार्यमतान्तरस्य दलनं वेदप्रचारैः शुभै-
रार्याणां च नृणां समाजनियमान् पुण्यान् प्रणीयोर्जितान्१ ।
नानावादिभिराद्दतां समजतां२ संत्याजयन् गर्हितां
राजस्थानमृषिर्ययौ तदवनीभृद्भावुकायास्थितः३ ॥

राजस्थानप्रान्ते गमनम्

मध्ये मध्ये मध्यप्रान्तीयष्वनेकेषु नगरेषु परिभ्रम्य रम्यवचाः प्राचां प्रवाचां४ वाचामाचार्यतायाः पदमनुभवन्नुदात्तकान्तिः प्राप्तशान्तिः श्रीमान् स्वामी दयानन्दो महाराजः क्षत्राधिष्ठानं राजस्थानमपीयाय । राजस्थाने स्थाने स्थाने स्थाने५ धर्ममुपदिशन् निर्विशङ्कः शङ्कासमाधिं विदधत् तत्रत्यानां राज्ञामाज्ञावशंवदानां विहितमहितादराणां नरवराणां हृदयेशयः सकुशेशय६ इव सलिलाशयो निर्मलाशयो बभौ । कतिपये क्षितिपतयः कृतमतयो यतयेऽस्मै स्वावासे निवासायामन्त्रणानि प्रेषयामासुः । शुद्धाभिप्रायोऽयं प्रायो राजस्थानमेव समुन्नेतुमनाः प्रमनास्तत्रैव स्थिरं चिरं निजावासमकल्पयत् सप्तत्रिंशदुत्तरैकोनविंशतिशततमे (१९३७) वैक्रमाब्दे फाल्गुनशुक्लदशम्यां रम्यां विभां बिभ्राणः क्षीणप्राणायाः

१- ऊर्जितान् उन्नतान् । २- पशुनाम् । समुदोरजःपशुषु (पा३-३-६९) इत्यनुशासनात् पशुसमूहः समजो भवति । मनुष्यसमूहस्तु समाजः । ३- तस्य राजस्थानस्य येऽवनीभृतः राजानस्तेषां भावुकाय कल्याणाय । ४- प्रवक्तॄणाम् । आर्याणामितिशेषः । ५- यथावत् । ६- कुशेशयं कमलम् ।

क्षत्रजातेस्त्राणं चिकीर्षुरार्यधर्ममुद्दिधीर्षुर्महर्षिः प्राग्भरतपुरमारत्। तत्र रेलयानस्थानसमीप एव प्रतिष्ठितस्य कस्यचित् पुरुषस्योद्यानमध्यमध्यवात्सीत्। सोत्साहं दशाहं यावल्लसदाख्यानं वेदव्याख्यानं चकार। चैत्रकृष्णपञ्चम्यां च ततः प्रस्थाय जयपुरमभिययौ। तत्राचरोलठक्कुराणामुपवनमाशिश्रियत्। यतिवरसत्सङ्गात् प्रसङ्गागतैर्जयपुरवासिभिर्भूयाँल्लाभोऽलभि। ततोऽपि प्रस्थितः सौम्यः स्वामी समुपगम्यमजमीढगढमढौकत। तत्र च श्रीश्रेष्ठिफतहमलस्याभिराममारामं निजशुभागमनादमनाक्२ संसृतप्रांशुयशोंशुभिरशोभयत्। विज्ञापनद्वारेण स्वभाग्यतः समागतमनपायं जनसमवायमिष्टं वेदधर्ममुपदेष्टुमारब्ध। निरत्ययं प्रत्यहं सायं सप्तमघण्टानादादारभ्य रात्रौ नवमघण्टानादं यावद् यतिवरस्य व्याख्यानान्यभूवन्। श्रोतारः सातिशयमुत्साहसम्पन्नाः सत्सङ्गसङ्गताः सन्तः कृतार्थमात्मानं मेनिरे। सर्वे समुपस्थिता जना नीरवा निस्तब्धा निर्निमेषाश्च भूत्वाऽभितः प्रलुभितैर्विलोचनैर्लोचनासेचनकं३ मङ्गलमयमनामयं मनोहरं यतिवरकलेवरं दर्शं दर्शमादर्शं हर्षप्रकर्षमन्वभूवन्। कर्णरसायनं मुनिवरवचनमनवरतं श्रवणाभ्यां शृण्वन्तोपि न तृप्तिं व्यावृण्वन्। इत्थमेव च चकितचेतसश्चुलुकितयतिवचसश्चकमिरे यद् यतीश्वरोऽयं वेदोपदेशमशेषं विशेषेण नः श्रावयेदेव न तु समापयेदिति। उपदेशावसाने समेऽप्यनवयवेन प्रभाविनं स्वामिनं प्रति श्रद्धाबद्धानुरागा महाभागाः परःशतान् परःसहस्रांश्चाजस्रं साधुवादान् प्रयच्छन्तो गृहमगच्छन्। स्वामिनः सदुपदेशेषु तादृगनिर्वचनीयः कश्चिद् विलक्षणः सुमधुररसोद्रेकः समुद्रिच्यते स्म यद्रसलुब्धा मुग्धा भ्रमरा इव

१- अजमीढम् अजमेर इति ख्यातम्। २- अनीषत्। भृशमित्यर्थः।
३- नेत्रातृप्तिकरम्। न जायते यत्र तृप्तिस्तदासेचनकं विदुः।

सृमरा१ नरवराः परित्यज्येतरत् कार्यंजातं जातास्वादा वादानुवादाय स्वामिसन्निधिमेव सन्निधिं२ मन्यमानास्ततो न न्यवर्तन्त। सर्वप्रथमं तत्रोपस्थानं चाहीन३मात्मनीनममन्यन्त४। नसीरावादवासी कश्चिद् हीरालालाभिधो बुधो यथाविधि श्रीस्वामिना तत्र पवित्रं चरित्रोन्नेतृ यज्ञोपवीतं ग्राहितः। बहुशः प्रतिपक्षिणामाक्षेपाश्च प्रतिक्षिप्ताः।

श्री पं० लेखरामस्य स्वामिना सह संलापः

तत्राजयमेरुपुर एव धर्मवीरः श्रीपण्डितलेखरामो महाशयः सदाशयं प्रकाशयन् अकुण्ठोत्कण्ठया स्पृष्टः स्पष्टं स्वामिनं द्रष्टुमिच्छुरच्छमतिर्विच्छिन्नकार्यान्तरत्वाल्लब्धान्तरः पञ्चनदात् प्रान्तादजयमेरुं५ प्रति प्रयान् अष्टात्रिंशदुत्तरैकोनविंशतिशततमे (१९३८) वैक्रमाब्दे ज्येष्ठकृष्णचतुर्थ्यामर्थी समर्थो विद्वान् श्रीस्वामिसेवायां सविनयमुपतस्थे। उपस्थाय च श्रद्धाभक्तिभावभरावनतः श्रीचरणयोः प्रणनाम। यतिवरस्य स्फीतप्रीतिरसाञ्चितं समञ्चितं६ विमलमचञ्चलं लोचनाञ्चलं, मधुरं मुखमण्डलम्, शोभाशालि विशालं भालम्, पतितपावनीं मनोभावनीमप्राकृतां७ चाकृतिमालोक८मालोकमालोक९माप्तो मुदालोक१०शब्दमुच्चैरुच्चारयामास। मोहियालवंशवीरो धीरो गम्भीरोऽसौ श्रीदर्शनादेव परमं प्रसादमासादयामास। अध्वयात्राजनितं श्रमं चाश्रमे तत्राश्रवः११ श्रवसा१२ तद्वचः श्रवात् तत्कालमुत्कालय१३न्नमन्दमानन्दमविन्दत।

१- सरणशीलाः। २- श्रेष्ठं निधिं कोशम्। ३- उत्कृष्टम्। कालहरणमकृत्वा च। ४- आत्मने हितम्। ५- अजमेर-संज्ञके पुरे। ६- शोभनीयम्। ७- असाधारणीम्। ८- दर्शं दर्शम्। णमुलन्तम्। ९- प्रकाशम्। १०- जयशब्दम्। आलोको जयशब्दः स्यात्। ११- वचने स्थितः विनीतः। १२- श्रोत्रेण। १३- उत्सारयन्।

धर्मवीरः स संयमिनः स्वामिनोऽभिरूपं स्वरूपं निरूपयन् स्तब्धो मुग्धोऽवास्थित । अनन्तरं बद्धाञ्जलिः सन्निद्धबुद्धिर्मञ्जुलमेवं पप्रच्छ– भगवन् ! आकाशं ब्रह्म चेत्युभावपि पदार्थौ व्यापकौ स्तः । द्वयोर्व्यापकयोः पदार्थयोर्युगपदेकत्रावस्थानं कथंकारं संभवतीति । यतिवरस्तु तत्प्रत्युत्तरं दित्सुः पार्श्वस्थमेकमाशु बृहत् पाषाणखण्डमुत्थाप्य पुरः प्रदर्शयन्नेवमन्वयुङ्क्त— उच्यतां भवताऽत्र पाषाणखण्डेऽग्निर्व्यापकोऽस्ति न वा ? धर्मवीरस्तु— आम् श्रीमन् ! अवश्यमेवात्राग्निर्व्याप्तोस्तीत्याह । स्वामी–अनलवज्जलानिलमृदाकाशपरमात्मनामप्यत्र पाषाणे व्याप्तिर्नियतास्ति वा नवा ? धर्मवीरः— सर्वेषामेवोक्तानां पदार्थानामत्र नियता व्याप्तिरस्ति । स्वामी— एतावता प्रतिबुद्धो भवानबुद्ध यद् विज्ञानबुद्धिसिद्धसिद्धान्तोऽयं सरलः प्रतीतिपथमवतरन् हृदयं तरली१कर्तुमलं, यः पदार्थो यस्मात् पदार्थात् सूक्ष्मतरो भवति स तस्मिन् नियतं व्याप्तिं गृह्णातीति । परमात्मदेवः परमसूक्ष्मतमः पदार्थः । अतोऽसौ सम्पूर्णतया समस्तवस्तुषु समवस्थितोऽस्तीति । अमृतवर्षणेनेव कृतहृदाकर्षणेनानेन संभाषणेन महर्षिः सूक्ष्मेक्षिकया निरीक्षमाणः पण्डितलेखरामस्य दिव्यसम्पत्सम्पन्नं मनः सुमनस्तमः सम्यक् पस्पर्श । स्पष्टं चेदमजानाद् यदिदमीया३ हृदयोर्वी४ चार्वी५ चोर्वरा च वर्वर्त्तीति । अस्यां धर्मकल्पतरोर्बीजावापः शक्यसंपादः । इत्याकलय्याखिलसंशयनिवारणाय निष्कारणः६ कृतसंप्रधारणो७ऽसाधारणः स्वामिमहाभागस्तं सानुरागं यथेष्टं प्रश्नान् प्रष्टुमादिष्टवान् । तदानीं पण्डितलेखरामो दश प्रश्नानप्राक्षीत् । येषु कतिपयेऽमी समुल्लसन्ति—

१- प्रकाशयितुम् । तरलो भासुरे हीरे चञ्चलेपि निगद्यते । २- विद्वत्तमः । ३- अस्येयम् इति इदमीया । इदम् शब्दस्य त्यदादित्वेन वृद्धत्वाद् वृद्धाच्छः शैषिकः ४- हृदयमेव उर्वी भूमिः । ५- चारुः, प्रशस्तेत्यर्थः । ६- निष्कामः । ७- कृतनिश्चयः ।

लेखरामः— भगवन् ! जीवब्रह्मणोर्भेदविषये किंचिद् वैदिकं प्रमाणमुपन्यस्यताम् ।

स्वामी— यजुर्वेदस्य समस्तो ध्वस्तसंशयश्चत्वारिंशोऽध्यायो जीवब्रह्मणोर्भेदमुपवर्णयति ।

लेखरामः— यवनयीशुप्रभृतिमतावलम्बिनां शुद्धिः कर्तव्या न वा ?

स्वामी— अवश्यं कर्तव्या । निजशुद्धिमपेक्षमाणास्तेऽवश्यमेव संशोध्याः ।

लेखरामः— अथ केयं विद्युन्नाम ? कथं चोत्पद्यते ।

स्वामी— विद्युत् सर्वत्र व्याप्तिमाप्तास्ति । सङ्घर्षाच्चेयमभिव्यज्यते ।

पर्जन्यजन्या विद्युदपि वायुमेघानां सङ्घर्षणादेवाभिव्यज्यमाना चकास्ति । ततो यतिवरोऽभिरामं लेखराममिदं वचः समुचितमुवाच— प्रिय ! यावद् भवान् पञ्चविंशतिसमीनो१ न भवेत् तावद् भवता दारपरिग्रहणं२ न कर्तव्यम् । धर्मवीरो लेखरामस्तदृषिवरवचनमवचनीयं३ मत्वा तथैवाङ्गीचकर ।

ततः प्रस्थास्यमानश्च गुरुवरं यतिवरमाख्यत्— अत्र भवता स्वीयं शुभाशीः संभिन्नं४ किंचित् स्मृतिचिह्नं प्रदीयताम् । स्वामी तु प्रहृष्टत्व५स्तमखिन्नमभिन्नहृदयं धन्यमनन्यसामान्यं निश्छलं वत्सलमनुरक्तं भक्तं धर्मवीरमार्यपथिकं पथि कम्पितधूर्तगणं नीतिचरणमनार्यभयङ्करमार्यप्रियंकरं प्रबलयवनवनदावानलं प्रलम्बभुजं नीरुजं गुणाभिरामं लेखरामं प्रति प्रतीत६मेकमष्टाध्यायीत्याख्यं

१- पञ्चविंशतिवर्षः । पञ्चविंशतिः समा वर्षाणि अधीष्टो भृतो भूतो भावी वा । समायाः खः इति प्राग्वतीयः खः प्रत्ययः । २- विवाहः । ३- अनिन्द्यम् ४- पवित्राशीर्वादसंयुक्तम् । ५- प्रसन्नः । ६- प्रसिद्धम् ।

मुख्यं व्याकरणपुस्तकं प्रीतिदायं कृत्वा तद्धस्ते समुपन्यस्तवान्। दक्षिणेन करेण गृहीत्वाऽदो दक्षिणां तत्क्षणं स्वामिनः प्रदक्षिणां विधाय दक्षिणोऽसौ विचक्षणोऽरुणावर्णं गुरुवरस्वामिचरणं प्रणम्य निर्भ्रान्तिस्वान्तः स्वप्रान्तं प्रत्यावर्तत।

उदयपुरे गमनं, तदधीशं प्रत्यार्यधर्मोपदेशश्च

अजमीढात् प्रस्थितोऽयं परिवृढो मसूदा-रायपुर-ब्यावर-वनेडा-चितौडगढ-मुम्बयी-खण्डवा-रतलामेन्दौर-जावरादिषु राजस्थानप्रदेशेषु परिव्रजन्, अजन्मनो ब्रह्मणः सदुपदेशं प्रकाशयन्, आजन्म-ब्रह्मचर्याचार्यश्चारुचर्यां प्रतिदिशं संदिशन्, आङ्गलसाम्राज्यधुर्यां विक्टोरियां नाम तादात्विकीं१ सात्त्विकीं सुबोधां भारतसम्राज्ञीं विज्ञो गोहत्यायाः प्रतिरोधं सानुरोधं प्रतिबोधयन्, तदभावे सोपपत्ति-विपत्तीश्चोपपादयन् संततं संततं२ समन्ततः संतमसं३-विध्वंसयन् एकोनचत्वारिंशदुत्तरैकोनविंशतिशततमे (१९३९) वैक्रमेऽब्दे श्रावण-वदिद्वादश्यां वश्येन्द्रियो हृष्यन् उदयपुरमाययौ। उदयपुरे कृतो-दयोऽयं महोदयस्तदीयाधीशेन महाराजश्रीसज्जनसिंहेन सङ्गतः प्रसङ्गतस्तदाख्यया ख्याते सज्जनावासे निवासमकरोत्।

अनवरतकृतसत्सङ्गसरिन्निमज्जनः प्रणमज्जनः४ सज्जनः सज्जनसिंहः शुभकामिनः स्वामिनः पवित्रचरित्रसंसर्गात् स्वर्गापवर्ग-मार्गसाधनभूतान् पूतानाचारविशेषान् आश्रयन्नाश्रयः श्रियां समस्ता-नशस्तान् दुर्विषयवासनापाशान् निरस्तावकाशान् विधाय शनैः शनैर्लब्धप्रकाशस्तानुपचितशुचिरुचिरमुचत्। नित्योद्योगिनो योगिनो महामतेर्यतेश्चरणकमलमूलमनुशीलयन् उन्मीलितप्रज्ञोऽसौ विशेषेण

१- तत्कालभवाम्। २- प्रसृतम्। ३- प्रबलमन्धकारम्।
४- प्रणमन्तो जना यस्य सः। ५- चतुरस्रं रोचकं शोभनं वा।

वैशेषिकं दर्शनं, प्राञ्जलं१ पातञ्जलं योगसूत्रं, समादृतार्यसंस्कृतिमुपस्कृतां२ मनुस्मृतिं चेत्येवंजातीयकान्यार्षपुस्तकान्यधीयानो योगाभ्यासं च वितन्वानोऽन्तेवसन्निव३ प्रसन्नवदनोऽवसन्नदुरेषणः४ प्रत्युत्पन्नधिषणः सुखमन्वास्त। गुरुवरस्वामिप्रणीताविगीताहश्चर्यानुसारं५ चाचारं चचार। उदयपुरमधिवसता सता मतिमता यतिवरेण समस्तसशस्त्रक्षत्रियराजपुत्राणां चरित्रपरित्राणायैकं राजस्थानीयं निर्मलमुज्ज्वलं गुरुकुलं संचालयितुं प्रभुसंमिता६ संमतिः स्वमनीषोन्मिषिता प्रकाशिता। तत्रत्यराजकीयकार्येष्वनार्यामवरजां७ परवत्तागरदां८ गर्दभहृन्नर्दामुर्दूमपसार्य तत्स्थाने प्राच्यार्याचार्यव्यवहार्या वरदा शारदेव१० शुभा विभाकरी देवनागरीलिपिरनवलिप्तेन सविचारं प्रचारं लम्भिता। आरब्य११शब्दानां प्रत्याख्यानमारभ्य संस्कृतशब्दाः प्रचुरं प्रचारिताः। इहैव कविताविलासेन कविराजश्यामलदासेन सह संलपन् निलिम्प१२कल्पोऽनल्पधीर्यतिवरो निजं निर्विकल्पं संकल्पं जजल्प– मम मृत्योरनन्तरं मदस्थीनि यत्र कुत्रापि मृत्क्षेत्रे प्रक्षेप्तव्यानि। न कदापि१३ वैयात्यान्मच्चैत्यं१४ दैत्यमिवानभ्यासमित्यं१५ निर्मातव्यमिति। कविराजस्तु मृतस्यापि स्वामिमहाराजस्यामृतां

१- चतुरस्रं रोचकं शोभनं वा। २- परिष्कृताम्। ३- छात्र इव। ४- अवसन्ना दुरेषणा दुष्टेच्छा यस्य सः। ५- अहश्चर्या दिनचर्या। अविगीता प्रशस्ता। ६- प्रभुतुल्या। ७- पश्चाद्भवाम्। ८- पारतन्त्र्यरूपविषप्रदाम्। ९- रासभनादतुल्याम्। उर्दूभाषाम्। तस्या लिपिरपि तादृगेव लक्ष्यते। १०- सरस्वतीव। ११- अरबदेशोद्भवा आरब्याः। १२- निलिम्पा देवविशेषाः तत्सदृशः। १३- धार्ष्ट्यात्। १४- मम मठः। मढ़ई इति भाषायाम्। १५- अन्तिकमनुपसृत्यः। इत्येऽनभ्याशस्येति मुमागमः।

मूर्तिं निर्मातुमैच्छत्। किंतु स्वामी इदमेव मूर्तिपूजामूलमस्मत्-सिद्धान्तप्रतिकूलं चेत्युदीर्य वीर्यवान् उच्चाभिप्रायस्तथाकर्तुं मादेशं न प्रायच्छत्।

उदयपुरमधिवसन्नेव सम्पन्नमनोरथः प्रतिपन्नपुरुषार्थः श्रीयतिवरः परोपकारिणीं नाम शुभां सभामप्यतिष्ठिपत्। अखिलामनाविलां१ निजसम्पत्तिं चोदात्तां तदन्वायत्तां चकार। तदानीं त्रयोविंशतिः सदस्या अस्याः सदसो भूष्याः सम्मुखेसुः। येषूदयपुराधीशः श्रीमान् प्रधानः सभापतिरासीत्। श्रीमूलराजः, साईंदासः, जयकृष्णदासः, श्यामजीकृष्णवर्मा, पण्ड्या मोहनलालो विष्णुलालः, शाहपुरधीशो नाहरसिंहः, रानाडेमहादेवगोविन्दः, पण्डितगोपालरावो हरिर्देशमुखः, पण्डितसुन्दरलालः एते मुख्याभिख्या विख्याताः प्रकटप्रभावा महानुभावास्तदार्यशोभां यशोभां२ बिभरांबभूवुः। प्रसिद्धिंगतायास्तस्याः शुभायाः सभायाः स्वीकृतिपत्रनियमानपि यमवान् महर्षिः सहर्षं सहैव प्राचीकशत्।

शाहपुरे गमनं, तदधीशं प्रत्यार्यधर्मोपदेशश्च

एकोनचत्वारिंशदुत्तरैकोनविंशतिशतमे (१९३९) विक्रमवत्सरे फाल्गुनमासस्यामावास्यायां प्रथिताभ्युदयोऽयमुदयपुरात् परिवृढश्चित्तौडगढं ढौकमानः३ शाहपुरमाविवेश। शाहपुराधीशः श्रीनाहरसिंहः स्वामिनः सद्गुणगौरवप्रभावाद् विशेषेण स्निग्धो मुग्धोऽनुरक्तो भक्तो बभूव। स्वामिसकाशमुपेयिवानसौ स्वहृदयेशयानशेषान् संशयान् प्रकाशयामास। तेषां साधु समाधानाच्चाधिं४ मानसमनीनशत्। महर्षेः सकाशादन्तःप्रकाशमासे-

---

१- निर्मलाम्। २- यशसा दीप्तिमतीम्। शोभाविशेषणम्।
३- गच्छन्। ४- कष्टम्। आधिर्मानसी व्यथा।

दुषा प्रसेदुषा तेन सतर्ष१ममुष्मादेव मनुस्मृत्यादिसद्ग्रन्थाना-मध्ययनमारेभे ।

शाहपुरे प्रतीष्टा२भीष्टसत्प्रतिष्ठः स्वामिमहाभागस्तु तत्रत्यनरेशं सविशेषं सदुपदेशं प्रदिश्य विशिष्य शिष्यं स्वविधेयं विनेयं विदधे। एकं ब्राह्मणयुवानं सम्यक् परीक्षितं संन्यास-दीक्षया दीक्षितं विधाय तमीश्वरानन्दनाम्ना चाभिधाय तस्मै पञ्चरूप्यकमात्रां छात्रवृत्तिं मासिकीं प्रकल्प्य विरक्तोऽप्यनुरक्त इव शक्तं तं भक्तं समधिकाध्ययनाय प्रयागे प्रैषयत्। शाहपुरमधि-वसन् यतीश्वरोऽयमीश्वरानुग्रहान्नियमेन विद्वन्मनःप्रकाश्यं वेदभाष्यं कारयामास। अवशिष्टे च दिष्टे३ दिष्ट्या४ दृष्टान् विशिष्टान् इष्टजनानभीष्टं वेदधर्ममकष्टमुपदिष्टवान् ।

जोधपुरं प्रति गमनं, तदधीशाय वेदधर्मोपदेशश्च

अत्रस्तस्यात्रस्थस्यैवास्य जोधपुराधीशमहाराजयशवन्तसिंह-प्रेषितमनिर्यन्त्रणं५ निमन्त्रणं तत्रागमनायापेदे। जोधपुरं गन्तु-मुद्यतं समुन्नतमनुद्धतं यतिवर्यमाचार्यमार्यः शाहपुराधीशस्तत्र गमनान्निवारयितुं सविनयमनुनयमतनोत्। अब्रवीच्चैवम्—भगवन् ! जोधपुरीया राजानः किंराजानः६ कुत्सित७भर्सितवर्जित-तर्जितविषमयविषयविषयरसास्वाददुर्ललिताः, ललिताकृतिलल-नोल्ललन८लम्पटाः, दुष्टभटा इव विकटाः, नटा इवोत्कटाः, शठा मठाधीशा रयीशाः, सदाचारविचारमरोचयमानाः, दुरभिमानाः, रण्डा–भण्ड–करण्ड–ताण्डव–पण्डिताः९

१- सतृष्णम् । २- प्रतीष्टा गृहीता अभीष्टा सत्प्रतिष्ठा येन सः । ३- समये । ४- भाग्येन । ५- निर्बाधम् । ६- कुत्सितभूपतयः । ७-कुत्सिता-दीनि विषयरसास्वादविशेषणानि । तत्र दुर्ललिताः अभ्यस्ताः । ८- उल्ल-लनं विलासः । ९- रण्डा भण्डा एव करण्डाः मञ्जूषाः तेषां ताण्डवे नृत्ये पण्डिताः ।

खण्डिताधरखण्डखण्डनमण्डिताः,१ दण्डितानेकचण्डनाः, बाधितसद्वृत्ताः प्रसाधितदुर्वृत्ताः, सामर्षाः, दुर्धर्षाः, दुर्मदाः, दुर्भगाः, दुरुच्छेदचेष्टिताः, वेष्टिताधमा धमाः२, पतापताः३ वदावदाः प्रकटकटुचाटुकपटोक्तिपटवो दूष्यवेश्यावश्या दृश्या न भवन्ति। सदुपदेशविशेषं प्रति येषां न्यक्काराकारा४ कारा५। ते दुराचाराः कथमिव तत्रभवतां भवतां यतीन्द्राणामजितेन्द्रिया रुचितमुचितमञ्चितमपि वचो रोचयिष्यन्ते इति नावकल्पये। न श्रद्धे। न मर्षयामि। तथापि तत्रगतेन भवताऽसंनिवेश्यानां६ वेश्यानां विशेषेण खण्डनं न कर्तव्यम् इति। स्वामी तु सप्रणयमुदीरयन्तं दुरन्तमुदन्तं७ विदन्तं तं बृहन्तं हितैषिणं मनीषिणं नरेशं हन्त कृताभिनिवेश८ एवं प्रत्यवादीत्— अहं हि गरीयसोऽतिमहीयसः सकण्टकान् कुरण्टकान्९ नखविकर्तनेन स्नीहिती१०स्नेहेन वा क्षुरप्रप्रहारेण११ वा नोच्छिनद्मि। तांस्तु मल्लान् स्नुहीदलफलेन१२ भल्लेनोल्लुनामि। अतिकठोरं कुठारं वा प्रहरन् उद्धरामीति। यादृश्यास्यतटी१३ तादृशी चपेटापेटीति भावः।

जोधपुरं प्रति प्रयाणकालेऽन्यैरपि धन्यैर्मान्यैरार्यपुरुषैरभ्यधायि— अयि मान्य स्वामिन्! तत्रत्या जना अतिदुर्जना अति-

---

१- खण्डिता नामेर्ष्याकषायिता नायिका तस्याः, अधरौष्ठखण्डखण्डनेन मण्डिताः। २- उत्तेजकशब्दापूरिताः। ३- पतिताः। चरिचलिपतिवदीत्यच् प्रत्ययो द्वित्वमाक् चाभ्यासस्य। एवं वदावदा वावदूका इत्यर्थः। ४- तिरस्काररूपा। ५- वन्दीगृहम्। ६- सहवासायोग्यानाम्। ७- वृत्तान्तम्। ८- कृताग्रहः। ९- वृक्षविशेषान्। १०- स्नीहिती 'नुहेरना' इति ख्यातं नापितशस्त्रम्। तत्कृतेन स्नेहेन छेदेन। ११- क्षुरप्रं शल्यम्। १२- स्नुही वृक्षविशेषः। १३- आस्यतटी मुखप्रदेशः।

कठोरा घोरा दुष्प्रकृतयोऽविवेकिनश्च सन्ति। भवतः सत्योपदेशाद् विवृद्धमात्सर्या नैष्ठुर्यान्न चेद् भवन्तं क्लिश्नीयुः। मा स्म कदाचित् तत्र भवतस्तत्कृतः क्लेशलेशोपि संश्लिष्यदिति। स्वामी प्रत्युवाच— यदि विशृङ्खलाः खला ममाङ्गुलीः कर्तं[१] कर्तं वर्तिका निर्माय निर्दयं दहेयुस्तथापि न मां काचिच्चिन्ता सन्तापयति। नाहं तादृशेनासद्दृशेन कर्मणा कामपि चिन्तां तन्तनीमि। अविप्लुतधैर्योऽहमननुप्लवोपि[२] निरुपप्लवं[३] सत्योपदेशप्लवं[४] विप्लावयितुम्[५] अबोधविक्लवो[६] न भवितुमर्हामि। इत्यभिधाय ततो दृढमजमीढमुपढौक्य त्रैलोक्यविजयी विनयी श्रीमान् दयानन्दः स्वाम्यविगीतकीर्तिर्दिव्यमूर्तिरलब्धबोधं जोधपुरं शोधयितुमुन्मनाश्चत्वारिंशदुत्तरैकोनविंशतिशततमे (१९४०) वैक्रमाब्दे तत्पुरं प्रति प्रतस्थे। जोधपुराधीशेन यतीशमानाययितुमेकः पद्मी[७], त्रयः क्रमेलकाः[८], त्रीणि स्यन्दनानि[९] एकं प्रवहणम्[१०], चत्वारोऽश्वारोहाः सैन्याश्च प्रैष्यन्त। द्विरात्रं प्रचलन्नचपलमतिरतुलितबलः प्रबलो यतिवरो महता स्वागतसमारोहेण जोधपुरं प्रविवेश। तत्र फैजुल्लाखानमहानुभावस्यारामे विरराम। षट् सैनिकाः, एको यामिको[११] जननियामको रक्षापुरुषश्च तत्परिरक्षणाय संन्यधीयन्त। रावो राजा तेजसिंहस्तत्परिचर्यामवेक्षितुं कृतक्षणः समनह्यत। जोधपुरागमनादपरस्मिन्नहनि महाराजो यशवन्तसिंह एकशतं रूप्यकान् पञ्च भद्राः स्वर्णमुद्राश्चोपदाः[१२] सप्रमद[१३]-

---

१- कृती छेदने इत्यस्य णमुलन्तस्य रूपम्। विकर्त्येत्यर्थः। २- असहायः। अनुप्लवः सहायस्तद्रहितः। ३- निरुपद्रवम्। ४- सत्योपदेशरूपं प्लवमुडुपम्। ५- निमज्जयितुम्। ६-अज्ञानोपहतः। ७-हस्ती। ८-उष्ट्राः। ९- रथाः। १०- यानम्। 'टमटम' इति भाषायाम्। ११- प्रहरी। १२- उपहारान्। १३- सहर्षम्।

मुपादाय श्रीस्वामिचरणसरोजसमीपमुपतस्थे। पादयोः प्रणम्य मणिकुट्टिमभुवमध्यास्त। तदानीमजस्रं तिस्रो घण्टा यावच्चतुरस्रं१ यतिवरो मनुस्मृत्यनुगुणां प्रगुणां२ राजधर्मशिक्षामुपादिक्षत्। भाविनो वेदव्याख्यानस्य धर्मोपदेशविशेषस्य च स्थानं निर्णिक्तं३ निर्णिनाय। निश्चिते व्याख्यानभवने सायं तुरीयघण्टाटङ्कारादारभ्य षष्ठघण्टाटङ्कारं यावत् समस्तो जोधपुरवास्तव्यो जनसमवायः स्तोतव्यस्य महर्षेः प्रस्तोतव्यं नव्यं भव्यमुपदेशामृतं निपातुं परितो निपपात।

अन्यतरेद्युर्जोधपुराधीशेन दर्शनाय यतिवरः सादरमामन्त्रितः सन्नासन्नं राजप्रासादमाससाद। वीतभयो महोदयोऽयं रम्यं हर्म्यं प्रविशन् धर्म्यं वचो विविश्वन्नाश्वत्४। दैववशात् तत्रोपेयुषी नन्हीनाम्नी निम्नधाम्नी५ प्रसिद्धा प्रतिबुद्धा६ मन्मथशराविद्धा७ सन्मनुष्याजुष्या८ दूष्या वेश्योपस्थितावास्थित। या खलु नरपतेरतितमां प्रियतमेव रतिदाप्यरतिदा१० ललितारोग्या११ऽयोग्यापि भोग्याभूत्। तदानीमाकस्मिकं स्वामिनः समागमनं सस्मयस्य१२ भूपतेर्विस्मयमुत्पादयामास। स चाशुतरं तरङ्गितहृदयः स्वामिसंनिधौ संजातभयस्तस्या निशान्तान्तःपुरेऽप्रवेश्याया अपि वेश्यायाः शिविकामवकामिव१३ बहिरुत्सारयितुं यत्नवान् बभूव। शीघ्रतावशादसौ तत्सम्बन्धादन्धंभावुकः स्वस्कन्धमपि शिविकाबन्धोत्तम्भने

१- रमणीयम्। क्रियाविशेषणम्। २- सरलाम्। ३- स्पष्टम्। ४- अगच्छत्। ५- निकृष्टस्थाना। ६- अप्रतिबुद्धापि श्लिष्यते। ७- कामबाणताडिता। ८- सज्जनासेविता। ९- रतिः कामसुखं तत्प्रदापि अरतिदेति विरोधः। अरतिर्दुःखासिका तत्प्रदात्वेन परिहारः। १०- ललितमारोग्यं शरीरस्वास्थ्यं यस्याः। ११- सगर्वस्य। १२- शैवालमिव। 'काई' इति भाषायाम्।

सम्बन्धयामास । सा तु वारवधूरवधूतमदा१ प्रमदा सत्यप्य-सती२ शिविकान्तर्निविष्टैवेष्टं भूपतिना सहालपन्ती तस्थौ । लोभनीयमप्यशोभनीयं दृश्यमिदं सातिशयपुण्ययशोराशेराशु महर्षेरक्षिगोचरतामयासीत् । लोचनैरविलोचनीयां शोचनीयां चेमां दुर्दशां स्वचक्षुषावेक्ष्य महर्षेर्मनो भृशं चुक्षुभे । अतो हेतोः श्वः करिष्यमाणे वेदोपदेशे महर्षिणा विशेषेण स्वदेशवासिनां विषय-विलासिनां दूषिताशनाशिनां३ शौर्यवीर्यनाशिनामधः पततां कुम-तीनां क्षितिपतीनामपवित्रदुश्चरित्राणामतिविचित्रं चित्रं चित्रितम् । सकष्टं स्पष्टं च निःशङ्कं निरटङ्कि—राजपुत्राः क्षत्रियाः सिंहाः सन्तोऽप्यद्यश्वः श्वान इव प्रतिभान्ति, इन्द्रियसंयमाभावात् । बलवान् सन्नपीन्द्रियग्रामो विषयसंग्रामे संयमनीयो न तूद्यमनीयः । उद्यमने हीतस्ततः पतनोत्पतनैरनर्थापातात् । अत एव मनुना मुनिनाप्यभाणीयं वाणी—

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ।। इति ।

इमाः प्रतिवेश्या४ वेश्याश्च स्वदेश्या अपि सारमेयसारेण५ मेयत्वात् सारमेय्यः प्रतिनिर्देश्याः । शौर्यशून्याः शुन्य इव जघन्याः प्रत्येतव्याः । शुनीभिः सह समागमः शुनामेव रुच्य उच्यते । न तु संचिताञ्चितरंहःसंघानां शौर्यशालिविशालजङ्घानां सिंहा-नाम् । सिंहास्तु सिंहीभिरेव संगताः सन्तः सुखं शेरत इति । समुल्लसत्सत्पथप्रदर्शकस्य चेतःप्रहर्षकस्याखण्डब्रह्मचर्यतेजःपुञ्जो-ज्ज्वालविशालभालस्य यतिमरालस्य६ निरालस्येनामुना सत्यधर्मो-

---

१ ध्वस्तहर्षा । २- कुलटा । ३- अभक्ष्यभोज्यभोजिनाम् । ४- प्रति-वेशे भवाः । ५-सारमेयसारः शुनो वीर्यम् । तेन मेयत्वात् उपमेयत्वादित्यर्थः । ६- मरालो हंसः ।

पदेशेन जोधपुराधीशोऽतिशयितः प्रभावितोऽभूत् । मन्ये मान्योऽसावन्तःसन्तमप्यसन्तं[१] स्वापं[२] मनस्तापं साटोपं कोपं च न वहिराविरभावयत् ।

(राज्ञां वेश्यादिविषयासक्तिप्रतिषेधाय यतिवरेण महाराजं श्रीप्रतापसिंहं प्रति लिखितं सदुपदेशात्मकं पत्रम्)

निजपापचिह्नानि निह्नुवाना नन्ही त्ववितथं तथ्यं प्रत्येति स्म यत् महात्मनः स्वामिनः सदुपदेशा वेश्याव्यसनाभ्यसननिरसने मोहनमन्त्रवत् प्रभावं जनयन्ति । तद्व्याख्यानश्रवणमात्रेणैव चिरन्तना महाव्यसनिनोपि निरशना[३] विवसनाश्च[४] सन्तः स्वकल्याणाय कल्पन्ते इति । सेदं सखेदमवेदीत्— महात्मनानेनानेनसा[५] ममौपम्यं पापधुनी[६] शुनीगम्यमवादीति । एतेन स्वार्थविघाताशङ्कापङ्कातङ्काद् अमुष्या दूष्याया हृन्मर्मण्यमन्दान्यन्तर्द्वन्द्वानि स्वच्छन्दं दन्दशूकाः[७] सरीसृपा[८] इव ससृपुः । सा खलु विकटवैरानलज्वालाजालावलीढा मूढा व्यूढप्रौढपापा संततं तन्तन्यमानसंतापा समवर्तत । अत्रान्तरे यतिवरेण महाराजं श्रीप्रतापसिंहं प्रतीदं पत्रमलेखि— अयि मान्याः शूरवीरधौरेयाः महाराजाः सानुरागाः श्रीप्रतापसिंहमहाभागाः ! सानन्दा भवन्तो भवन्तु । प्रवृत्त्यानयाऽहमतिमात्रं गात्रे शोकं वहामि यच्छ्रीमन्तो जोधपुराधीशा आलस्याम्बुनिधौ निमग्नाः सन्ति । भवन्तश्च प्रायेणास्वस्थकायाः सप्रत्यवाया[९]स्त्यक्तप्रवलबलोपचयोपायाः

१- दुष्टम् । २- सुखेन आप्यं सुलभमित्यर्थः ।

३- भोजनरहिताः । ४- वस्त्ररहिताः । ५- निष्पापेन । ६- धुनी नदी ।

७- दशनशीलाः । ८- सर्पवृश्चिकादयः । ९- प्रत्यवायैः विघ्नैः सहिताः ।

निःसहाया इव प्रतिभान्ति। अस्मिन् प्राज्ये राज्ये षोडशलक्षेभ्योऽधिका मनुष्याः प्रतिवसन्ति। तेषां रक्षणशिक्षणादेः सकलकल्याणनिर्माणस्य च गरीयांसं भारं साधिकारं भवन्त एवोद्वहन्ति। तथापि भवतां विविधामयभयग्रस्तत्वात् त्रस्तनिजशरीरपरिरक्षणाय साधीयः१ पुरुषायुषविवर्धनाय चाल्पीय एवावधानमक्षिलक्षीभवति। नाधिकमवदधतेऽत्रभवन्तः स्वदेहगेहोन्नयनाय। अतिशोचनीयमिदम्। महदिदमुपहासास्पदं विडम्बनम्२। अहं कामये श्रीमन्तः स्वकीयां दिनचर्यामार्यक्षत्रियनृपतिविचारानुसारं मया शोधयन्तु। येन न केवलं मरुभूमेरेव प्रत्युत सकलस्याप्यार्यावर्तदेशस्य विपुलमनाकुलं कल्याणं सम्पादयितुं सम्पत्तिमन्तः प्रतिबुद्धा भवन्तः प्रसिद्धा भवन्तु। भवादृशा योग्या भाग्यवन्तः पुरुषा अल्पीयांस एव जगति समुत्पद्यन्ते। समुत्पद्य च स्वल्पमायुरवाप्य सद्य एव विपद्यन्ते। चरित्रनिर्माणमन्तरेण निष्प्राणं मानवजीवनम्। एतस्माद्दते देशोन्नतिर्दुःशका भवितुम्। यावदधिकं भवन्तो जीवेयुस्तावत्यधिकैव देशधर्मोन्नतिर्भवितुं शक्नोति। अत्र विषये भवद्भिरवश्यमेवावधातव्यम्। परस्तात्तु निरस्तात्मसंमानानां मिथ्याभिमानानां भवतां यादृशीच्छा प्राच्छेंत्३ तथैवास्त्विवति।

चत्वारिंशदुत्तरैकोनविंशतिशततमे (१९४०) वैक्रमेऽब्दे आषाढवदितृतीयायां राठौरवंशहितकाम्यया रम्यं सहृदयहृदयगम्यं लिखितमिदमुद्दिष्टं विशिष्टं स्वहस्ताक्षराङ्कितं स्वामिनः संयमिनः पत्रं पवित्रं मित्त्रमिव चरित्रमुन्नयत् कियन्महत्त्वपूर्णमस्तीत्येतदस्यैकैकेन पदेनासंशयं प्रकाश्यते।

१- भृशम्। इति क्रियाविशेषणम्। २- कष्टम्। ३- समुन्मिषेत्।

दुरात्मभिर्महात्मने स्वामिने प्राणघातकविषदानम्, आर्यजनताक्षोभश्च

किंतु हन्त यद् वस्त्वेकस्मै कस्मैचिदमृतायते तदेवेतरस्मै विषीभवति। नन्हीगणिका ह्येनत् पत्त्रमेनोमर्षणमपि१ स्वचेतसोऽप्रहर्षणं कालकूटनिदर्शनं मेने। यतात्मनो महात्मनः स्वामिनः सदुपदेशविशेषैस्तस्या हृदये यद् गम्भीरमीर्ममजनि२ तत्रानेन पत्त्रेण लवणायितम्। शनैः शनैः स्वीकृतस्वाम्यादेशाद् मलीमसविषयविषसेवने त्यक्ताभिनिवेशादनीशाद् जोधपुराधीशादवहेलितां निमीलितामात्मानमसौ विभावयांबभूव। न सा पदवी दवीयसी यदा सा म्लानकुसुममालेव ग्लानाऽकालकवलिता ललिताकृतिरप्याकुलिता विह्वलिता स्खलिता त्यक्ता विरक्ता च सम्पत्स्यते इति चिन्ताचान्तस्वान्ता नितान्तमशान्ता तान्ता व्याकुला व्यालीवोत्कालितगरला३ तरला किंकर्तव्यविमूढाऽवतस्थे। अन्ततो निजस्वार्थविघातमूलं शूलमिव प्रतिकूलं स्वामिनमेव मन्वाना न्यायेनान्यायेन वा, नीत्यानीत्या वा, अर्थेनानर्थेन वा येन केनाप्युपायेन स्वामिनोऽनिष्टचेष्टनेऽनवयवेन४ बद्धपरिकरा बभूव। तया गणिकया सहागणिता अन्येप्यधन्या जघन्या भिन्नमतावलम्बिनो मनुजडिम्भविडम्बिनो मिथ्यादम्भिनो विरुद्धाः क्रुद्धाश्चक्राङ्कित५चक्राङ्कितकलङ्काः, लङ्काधिपतिकिंकरा इव भयङ्कराः, राहव इव विकटबाहवः प्रतिहतसंमुखाहवलाघवाः६, नक्रा इव वक्राः, शक्रोपमविक्रमस्य यतेर्नारायणैकशरणस्य प्राणापहरणपरायणाः समजनिषत। तत्रान्तरे

१- पापविनाशकम्। २- ईर्म व्रणः। ३- निष्कासितविषा। ४- कार्त्स्न्येन। ५- चक्राङ्कितानां वैष्णवानां चक्रेण अङ्कितः कलङ्को यैः। ६- प्रतिरुद्धसंमुखयुद्धकौशलाः।

लब्धान्तरो बलवद्भगवल्लीलयोदहारमल्लः१ कल्लूसंज्ञोऽज्ञोपि विज्ञजन-वञ्चनचुञ्चुश्चञ्चच्चञ्चलचेतश्चेलाञ्चलः खेलन्नात्मप्रलयजलकल्लोलैः शठः षट्सप्तशतरूप्यकतुल्यमूल्यां निभालयन् स्वामिनः प्रशस्तवस्तु-सम्पदं प्रतिपदमापदां पदमिवोपदां२ सपदि शनैरपहृत्य भृत्याधमः कापथं प्रतिपन्नः प्रच्छन्नः केनाप्यविदितवृत्तो दुर्वृत्तो निभृतं निलीय द्रागेवादुद्रुवत् ।

इतश्च गौडमिश्रापरपर्यायो भोजनपाचकः प्रथितगाथो जगन्नाथो नाम विहिताहितोन्माथं३ परमात्मसनाथं जननाथं भगवन्तं विलसन्तं सन्तं कृतात्मानं महात्मानं सानन्दं दयानन्दं प्रति मन्दो४ मन्दं मन्दं मतिमान्द्यं विन्दन् निन्दिताचारोऽजगर इव गरमुद्गरितुमारादारत्५ । अक्षुद्ररूप्यकमुद्रोन्निद्रप्रलोभनमुद्रितः क्षुद्रः सोपद्रवोऽसौ काद्रवेय६ इव निरुपद्रव मुनीश्वरं यतीश्वरं शुभाशिषं दुराशिषा७ दंष्टुं नष्टव्यमतिर्द्रुतं प्राद्रवत् ।

ब्रह्महत्या पातकपतितेन पतितपतितेन८ कथितेन तेन पातकिना घातकेन गोपयसि गोमयमिव सामयं विषमं विषमुल्वणं९ निर्घृणं संमिश्र्य प्राश्य१० च यतीशं नवविंश्यां सितम्बरमास तिथौ दिगम्बर-कल्पा११नल्पागमतल्पाधिशायिस्वामिप्राणेषु कृपणेन पणेन कृता

१- उदकं हरतीति उदहारः । मन्थौदनसक्तुबिन्दुवज्रे ति उदादेशः । 'कहार' इति भाषायाम् । स एव मल्लः । २- उपहारम् । ३- कृतप्रतिपक्षिविनाशम् ।

४- मूर्खः । ५- आगच्छत् । ६- सर्पः । ७- दुष्टया दंष्ट्रया । आशंसा दंष्ट्रयोराशीः । ८- सकष्टं पतितेन । आबाधे चेति द्वित्वम् । ९- कुटिजम् । १०- भोजयित्वा । ११- दिगम्बरकल्पः निर्लेपः अनल्पागमतल्पाधिशायी नानाविधवेदादिशास्त्ररूपशय्याधिशायी यः स्वामी तस्य प्राणेषु ।

पणाया१। उदासितं सदाशितं२ यतीश्वरं प्राशितमात्रमेव तत् तरलं गरलमुदरशूलोन्मीलनेन वमनातिसारा३तिसारापसारेण च समूलमुन्मूलयितुमारेभे। शरीरकरीरं सनीरमप्यनीरं४ भवदतिदुर्बलतामाचकलत्। अलीमर्दानखाननामा यवनः कश्चिद्भिषक्पाशो५ भृशं परुषौषधपाशैस्तदपपाशत्। तत्प्रयुक्तेनागदेन गदोऽसावक्षय्यो भवन् अत्याहितताम् ऐयः६। क्षते क्षारमिवासह्यं तदीयमौषधं स्वामिशरीरमत्यर्थमक्लिश्नात्।

या व्यधीयत रुजस्तु चिकित्सा।
प्रावृधत् तदनुगा विचिकित्सा॥

इति न्यायेनालीमर्दानखानभेषजं विभीषाजनकत्वात् प्रतीपफलमेवाफलत्। यतीश्वरस्याक्षेमंकरभयङ्करविषमरोगग्रस्ततायाः समाचारः साधुसमाचारेणाजयमेर्वार्यसदस्येनैकेन राजपुतानागजटनाम्नि वृत्तपत्रे निपठ्य शाठ्यरहितेभ्यो निकटवर्त्तिसकलार्यपुरुषेभ्यो निवेदितः। अधिगतामयावि७ स्वामिवृत्तान्ताः संभ्रान्ताः समेऽप्यार्यपुरुषा मुषिता इव सरोषाः सन्तः परुषं दैवमुपालभ्य सुतमामक्षुभ्यन्। श्रेष्ठी ज्येष्ठमलोऽनतिवेलमजयमेरोर्जोधपुरमागत्य भीषणरुग्णस्वामिवृत्तं चाधिगत्य पुनरजयमेरुं प्रति निवृत्तः। समुत्सारितसुषमामतिविषमां दशां निशाम्य शाम्यद्विलासाः प्रतिरुद्धहासाः सर्वेऽपि स्वामिवार्तयार्ता भूयो निर्वेदमायन्। अतिदुरन्तोऽयमुदन्तः समन्ताद् दिगन्तान् व्याप्नुवन् समस्तेऽपि भारते देशे सविस्तरं वितस्तरे।

१- क्रयविक्रयव्यवहारः। २- नित्यतृप्तम्। ३- अतिसारो व्याधिविशेषः। वमनातिसाराभ्यां यः अत्यन्तं सारस्य बलस्य अपसारः तेन। ४- सनीरं जलसहितमपि अनीरं जलरहितमिति विरोधः। ईरणमीरः प्रगमनं तद्रहितमिति परिहारः। ५- दुर्वैद्यः। याप्ये पाशप् प्रत्ययः। ६- अगमत्। ऋधातोर्जौहोत्यादिकाल्लङ्। ७- आमयावी रोगी।

परितः शोकावेदकानि मित्राणीव तारकपत्राणि समाययुः। सद्वृत्तस्य यतेर्दुष्प्रवृत्त्यानया नयानयज्ञा विज्ञाः सकला अपि विकलाः सन्तो व्यामुग्धा दग्धा इव दुर्विदग्धेनाकारणदारुणेन दैवेन जग्धा इव च हतमतयश्च्युतगतयः समवतस्थिरे।

महर्षेर्दयानन्दस्याद्भुता क्षमा दया च

दयानन्दस्तु महर्षिरादर्श१ इव निर्मलादर्शो मधुराकर्षो यतिरासीत्। हृदये विहितोदयया दयया स्वच्छन्देनामन्देनानन्देन च संवलितत्वाद् दयानन्द इत्यन्वर्थं नाम विभ्रद्वकासामास। कलितललितचित्तवृत्ति-र्निर्मलहृदयः सदयः सोऽनारतं परमात्मप्रकाशेन प्रकाशितश्चकाशे। विषमविषानलज्वालाजालज्वलितोऽप्यसौ स्वानिष्टकारिणो वैरिणो निकृत्यस्य२ भृत्यस्याप्यनिष्टदर्शनं न कामयामास। अपकारिष्वप्युपकारिणो महतीमनुकम्पां सम्पादयतस्तस्य महापुरुषस्यैतदनभिमत-मभूत्। वस्तुतो भूतभावनाश्चित्तपावनाः सकलजनमनःसंतापहराः श्रेयस्कराः स्वयं क्लेशसहाः परसुखावहाः स्वार्थविरहास्तादृशाः सूक्ष्मदृशोऽसाधारणा विपन्निवारणा निष्कारणा३ यतात्मानो महात्मानः स्वदेशारण्याङ्गधरण्यामवतरन्तः कदाचिदेव दृश्या भवन्ति। भूयः कृतोपचारोपि सापचारो४ व्याधिरयं न कुतश्चनापि शमनमेष्यतीति यदा यतिवर्यो निश्चिकाय तदासौ निजभोज्यपाचकं क्षमायाचकं जगन्नाथमनाथमपि दुर्मतिसनाथं प्राणघातकं पातक५-मिवाधःपातकं विदन्नेव स्वसमीपमाकारयत्। तदीयं दुष्कृत्यं चाविष्कृत्य तत्संमुखीन एव निर्बाधं तदपराधं स्वीकारयामास। अभिदधे चैवम्— प्रिय जगन्नाथ! मद्देहविनाशान्निराशा भूदार्य-भाषा। अलब्धावकाशा च सा कुतः स्यात् सत्प्रकाशा। मम सकलं

१- दर्पण इव। २- निकर्तनार्हस्य। वध्यस्येत्यर्थः। ३- निःस्वार्थाः।
४- सदोषः। ५- पापम्।

मनीषितं चिकीर्षितं च विकलं जातम् । उत्तरोत्तरमुत्तितारयिषितः प्राचीनार्याचार्यप्रचारितो वेदधर्मोऽनुत्तरो६ लोकोत्तरोपि सम्प्रत्यधरीभूतत्वान्निरुत्तरो७ऽभूत् । तत्राधरोत्तरं८ मा प्रावृतदित्येषासीन् मे मनीषा । मयार्यसमाजव्याजेनाजा९वनार्यकदर्यमर्याञ्जिगीषवो युवानः साधु सिषाधयिषिता अभूवन् किं तु न तत्तथा भावीति मन्ये । विधेर्विलसितस्यान्यथा कर्तुमशक्यत्वात् । त्वं जानास्येव मम मृत्युनामुना महतो महितस्य लोकहितस्य कियती महती हानिः समजनि । विधेर्विधाने खल्वेतदेव विधानं संनिहितं भवेत् । नास्त्यत्र तव ध्रुवं कश्चिद् दोषः । अस्तु । गृह्यन्तामिमे प्रत्यक्षं निरूप्या रूप्यकाः । एतानहं तुभ्यं स्वेच्छया प्रयच्छामि । एभिस्ते प्रयोजनं सेत्स्यति । नामी स्वामिप्रदत्तास्त्वत्कार्यस्य बाधकाः प्रत्युत साधका एव स्युः । यावच्छक्यमिदानीं राठौरराज्यसीमातः परतरं द्रुततरं गम्यताम् । साक्षान्नयपालराज्यमेवाश्रीयताम् । तत्रैव ते प्राणत्राणं शक्यसम्पादम् । अधुना विलम्बावलम्बो नोपलम्भ्यः१० । निभृतं पलायनीयम् । मत्तस्त्वयाऽप्रमत्तेन वीतचिन्तेन च सदा भाव्यम् इति ।

दृश्यतामार्याः ! कीदृश्युदारकीर्तेः सन्मूर्तेः पवित्राशयस्य प्रत्यस्तसंशयस्य महर्षेः परिनिष्ठां गता दयोदया दयालोरमला चित्तवृत्तिप्रवृत्तिः । क्षमावतः क्षमा च क्षमायाम११नितरलक्षणान् विचक्षणान् प्रत्याचक्षाणा प्रतिक्षणं क्षतरक्षणक्षमा प्रत्यक्षमीक्ष्यते । सत्यमेव क्षमावृत्तेरियं पराकाष्ठा । अन्तिमा भूमिः । पर्यन्तः साधुतायाः ।

६- न विद्यते उत्तरः उत्कृष्टो यस्मात् । ७- उत्तररहितः । उत्कर्षरहितश्च । ८- औत्तराधर्यम् । ९- आजौ युद्धे । संसारसमरे इत्यर्थः । १०- न प्रशस्यः । ११- भूमौ ।

बलवदस्वस्थशरीरस्य भगवतो यतेः सम्यगुपचारार्थं जोधपुराद् अजयमेरुपुरे नयनं, भक्तप्रवर-श्रीलक्ष्मणदासकृता चिकित्सा च

इत्थमधःपातिनो ब्रह्मघातिनः प्राणत्राणं सम्यङ् निर्णाय निर्णायो भगवान् दयानन्दो ब्रह्मणो मायां सर्वत्रानपायां विसृमराममरां च निध्याय निःसीमक्लेशक्वथितशरीरोऽपि गभीरो धीरः पथ्यं सेवमानोऽव्यथ्यस्तत्रत्यान् सकलार्यजनानाहूतवान्। स्वदेहावस्थां च सन्देहावस्थितां विज्ञाय विचारितवान्। परस्परविमर्शानन्तरं तदानीं सर्वैरप्यजयमेरुनगरमेव गन्तुं नियतमैकमत्येन संमतिः प्रदत्ता। तदनुसृत्य भृत्यैरिव सत्कृत्यैर्बहुधोपकृत्यैरादृत्यैः सर्वैः समन्तात् समुपेत्यानुपचरितचरितः[१] सुपथगामी[२] स्वामी भव्येऽजयमेरुनगरे नीत्वा निष्प्रत्यूहपरिचर्यार्थमेकस्मिन् सुपरिष्कृते हर्म्यप्रकोष्ठे श्रेष्ठे प्रतिष्ठापितः। तत्र श्रीचरणानामेको निष्ठावान् प्रतिष्ठावांश्च सेवको भिषग्वरः पश्चापप्रान्ताभिजनः सज्जनः श्रीलक्ष्मणदासोऽप्युदासो विद्यमान आसीत्। स भगवति स्वामिनि नितान्तं श्राद्धो न कदाप्यपराद्धोऽभूत्। परमश्रद्धालुना च तेन स्वामी चिकित्सितुमारेभे। यथासमयम[३]व्यवायमौषधपरिवर्तनं विदधतो भक्तिवशात् तत्र स्वयमप्यधिवसतः स्वामिनिकटमटतस्तस्य भक्तप्रवरस्य चिरतनाः प्रयत्नाः कियन्तंचित् कालं तु साफल्यमिताः प्रत्यैयन्त परन्तु महाव्याधेरतिभीषणत्वात् प्रतिकूलविवर्ज्यापरभिषजां व्यतिषज्य भैषज्याद्यान्तरान्तरा

१- यथार्थचारित्रः। २- वाटः पथश्च माथश्चेति कोशात् पथिपर्यायः पथशब्दोपि स्वतन्त्रोस्ति। पथिन् शब्दस्य तु समासे न पूजनादिति समासान्तनिषेधेन सुपथिगामीति भवति। ३- निरन्तरम्।

महर्षेः संलापे समुल्लासेन स्वास्थ्ये कश्चिल्लाभः प्रतीतिपथमवतरन्नप्युल्लाघता१मुल्लङ्घयन्नेवोल्ललास ।

योगिनो यतिवरस्य भविष्यद्वाणी

एकदात्यन्तकष्टापन्नोपि सम्प्रतिपन्नधैर्यः स्वामी स्वशरीरदशावलोकनेन साश्रुनयनान् शुश्रूषुजनान् मसूदां प्रति गन्तुमचूचुदत् । किंतु दीनातिदीनहीनातिहीनदेहावस्थावेक्षणेन दूनातिदूनाः२ क्षीणातिक्षीणा ह्रीणाः३ शुश्रूषवः परिचारकास्तथा कर्तुमनलंकर्मीणाः४ समवर्तिषत ।

तदानीं पूर्णो योगी५ न भोगी न रोगीन्द्रियजयी यतिवरः श्लिष्टैः पदैरक्लिष्टमिदमवोचत्— द्व्यहेनाहं पूर्णः६ स्वस्थो भविष्यामीति ।

१- उल्लाघो निर्गतो गदात् । तस्य भावस्तत्ता । स्वस्थतामित्यर्थः । २- नितान्तं सन्तप्ताः । ३- लज्जामनुभवन्तः । ४- अशक्ताः । ५- योगिनामिनाः प्रभवः योगीनाः योगीन्द्रा इत्यर्थः । तेषां भोगाय हितो योगीनभोगीनः योगीशसेवक इति यावत् । तादृशश्च रोगीन्द्रियजयी चेति कर्मधारयः । रोगीणि इन्द्रियाणि जयति, रोगिणां वेन्द्रियाणि जयतीत्यर्थो बोध्यः । अर्थान्तरे तु नभोगी नरोगी । इन्द्रियजयी च । नभोगी नरोगी इत्यत्र न-शब्देन सुप्सुपेति समासः । न तु नञ्तत्पुरुषः । नसंहतास्तस्य नभिन्न वृत्तयः इतिवत् । नैकशब्दः सुप्सुपेति समासादिति काव्यालंकारसूत्रमत्र प्रमाणम् । ६- अस्यायं ध्वन्यमानो भावः- सर्वं वै पूर्णं स्वाहेति मन्त्रप्रतिपादितया दिशा सर्व एव पूर्णो भवति न त्वसर्वः । अहं तु सर्वत्वात् सर्वत्रात्मदर्शित्वात् पूर्णः सम्पूर्णतया कृतकृत्यः सन् स्वस्थः स्वर्गस्थो मोक्षस्थित इति यावत् तथा भविष्यामि ।

विषमविषाक्ततनोरतनुदाहज्वरक्वथितस्य स्फुटितस्फुटिका-स्फोटस्य यतिवरस्याप्रतिम धैर्यम्

बलवीर्यजुषि यतिवरवपुषि परं कार्श्यमुपेयुषि समन्तात् स्फुटिता विस्फुटिकापरम्परा ददृशिरे। चत्वारिंशदुत्तरैकोनविंशति-शततमे वैक्रमाब्दे कार्तिककृष्णामावास्यायां दीपावलीवासरे समधिकशरीरदौर्बल्यान्नैर्मल्याच्चान्तःकरणस्य परब्रह्मशरणस्य बहिरप्रकटितविषमप्रोज्ज्वलत्कष्टानलस्य स्वप्नेऽप्यस्खलितब्रह्मचर्य-बलस्य हिमाचलस्येवाचलस्योषसि प्रदीपार्चिरिवासन्ननिर्वाणः श्लथत्प्राणः स्थूलो भौतिको देहो निर्विष्टस्नेहो१ दशान्तरमुपेयि-वाननुरक्तानां भक्तानामत्यन्तमुद्वेगं जनयामास। अत्याहितं च सूचयामास। न्यूटनाभिधानः कश्चिदाङ्गलेयो डाक्टरः पीराभि-धेन बुधेन वैद्यान्तरेण सहितस्तदवस्थं स्वामिनं द्रष्टुमेयाय। उभा-वपि तं धैर्यधनं महाधनं३ बहुदीर्घविषमतममहाव्याधिनिपीडित-मपीडितम्४ कृतशार्दूलविक्रीडितम्, दृढं परिवृढमप्रकटितशोकम्, कृतालोकम्, अविमुक्ताक्रन्दम्, विलोकितभक्तवृन्दम्, प्रसन्नवदनम्, प्रीतिसदनम्, विपन्नमपि सम्पन्नम्, योगिनमपि वियोगिनम्, आप्तसुरतमप्यनाप्त५सुरतं, सकलभुवनतलाश्चर्यभूतमद्भुतविभूति-संभूतमाचारपूतमाचार्यं यतिवरमादर्शमिव दर्शं दर्शं सहर्षं कुतु-काम्बुनिधौ ममज्जतुः। रोमणि रोमणि मणिवदुज्ज्वला गरलज्वालाः समुज्ज्वलन्ति। मन्ये ब्रह्मचर्यमणिरेव प्रतिलोम-मनुलोमं गतो जाज्वल्यते। तथापि भीषणरुग्णः स्वामिमहा-

---

१- स्नेहो रसः तैलं च। २- दशा अवस्था वर्तिश्च। ३- अमूल्यम्। बहुमूल्यमित्यर्थः। ४- ईडितं स्तुत्यम्। ५- सुरस्य भावः सुरता। प्राप्तदेवत्वम् इत्यर्थः। पक्षे सुरतं विषयभोगः।

भागो वीतरागः शान्तस्तपस्वी यशस्वी गभीरो धीरो वीरो भूत्वा विशेषमप्यशेषं तद् हृन्मर्मच्छिद् द्वन्द्वं१ सहमानः सहमान२ आस्ते। बह्वपाये काये ह्याकण्ठमकुण्ठितः कफोपचयः श्वासप्रश्वासान् प्रतिरुन्धन्नतितमामपीपिडत्।

कतिपयेऽप्युपचारा वैद्यवरैः सविचारमचारिषत हन्त सर्वेऽपि ते निष्फलतामगमन्। दिवैकादशे घण्टानिनादे सति श्वासप्रश्वासौ भृशमशोशूयत३। यतिवरः पुरीषमुत्स्रष्टुमियेष। आवश्यकं तन्निर्वर्त्य शौचमकरोत्। इतरसाहाय्यानपेक्षं स्वयं जलमुपाददे। हस्तौ प्रक्षाल्य दन्तधावनमतनुत। कियन्तं चित्कालमासांचक्रे। ततः स्वयं शय्यायां न्यपद्यत। पार्श्वोपस्थितैरनेकैर्भक्तजनैः स्वास्थ्यं पृष्टः सन्नाचष्ट— अस्त्यद्य प्रसन्नं मनः। अनाकुलं च वपुः। आलोकतिमिरयोः सद्भाव आविरस्ति। एकस्य मासस्य पश्चादद्यतनो दिवसः सुखकरः प्रतिभाति। परतरमाजिज्ञपत्— सर्वाणि द्वाराणि समुद्घाट्यन्ताम् इति। आज्ञानुवर्तिभिः पुरोवर्तिभिस्तदानीमेव निरुद्धप्रसाराणि द्वाराणि कृतवातरक्षा गवाक्षाश्च समुदघाट्यन्त। तस्मिन्नेवाह्नि सायंवेलायां परमेश्वरलीलायां विचरन् यतीश्वरः सर्वानार्यजनानाजुहाव। तांश्च निजपृष्ठतःकृत्य कृत्यवित्तम इत्यपृच्छन्— अद्य कः पक्षः? का तिथिः? कश्च वारः? श्री पण्ड्या मोहनलालः शिरोऽवनमय्य न्यवेदयत्— प्रभो! अद्य कार्तिकमासस्य कृष्णः पक्षः। अमावास्या तिथिः। मङ्गलश्च वारो वरिवर्ति। तदाकर्ण्य गुण्यः श्रुतिपारदृश्वा यतीश्वरः स्वीयां दिव्यामिष्टैकनिष्ठां दृष्टिं तत्प्रकोष्ठकान्तःप्रविष्टां समन्तान्निचिक्षेप।

१- कष्टम्। २- मानेन सहितः। वोपसर्जनस्येति सादेशविकल्पः।
३- पौनःपुन्येन वृद्धिं गतः। टुओश्वि गतिवृद्ध्योरित्यस्माद् यङन्ताल्लङ्।

ततश्च कृतप्रसादेन हृतावसादेन१ गम्भीरनिनादेन वेदमन्त्राणां पाठं कर्तुमारभत । तदानीं तदीयेऽकुण्ठे कण्ठे, विकस्वरे स्वरे, उच्चनीचाक्षरोच्चारणे, ध्वस्तमाध्वीकाध्वनि ध्वनौ, सुधासवर्णेषु वर्णेषु मात्रयापि काचिद् दुर्बलता प्रतिफलिता२ न ददृशे ।

नास्तिकशिरोमणितार्किकश्रीपं० गुरुदत्तेन स्वामिनोऽन्त्य-देहदशाया अवलोकनम्, देहातिरिक्तात्मतत्त्वप्रतिपत्तिश्च

यतिवर्याचार्यस्य प्रियंभावुको३ भावुको भक्तः श्रीगुरुदत्तः पण्डितो विद्यार्थ्युपपदः कृतपद४स्तद्भवनस्यैकस्मिन् कोणे भित्त्या संलग्नो विचारमग्नो यतीशभौतिकदेहदशान्तमवलोकयन्नासांचक्रे । अनिवृत्तचक्षुर्वृत्तिप्रवृत्तिरप्रमत्तोऽसौ दत्तावधानस्तमेवेक्षामास । पण्डितमहोदयोऽयं वैदिकधर्मप्रचाराय लब्धजन्मनो महामहिम्नो महर्षेरवेक्षणाय प्रथममेव समाजगाम । इतः पूर्वं परमात्मनिराकरणाय विहिताधिकरणे५ नास्तिक्याधिकरणे तदन्तःकरणे पूर्णतयात्मतत्त्वप्रतिपत्त्यङ्कुरो नोत्पन्नोऽभूत् । परन्तु भगवद्भक्तविरक्तविविक्तमहर्षेर्देहदशामन्त्यां विरमन्तीं वीक्ष्य सोऽगाधाश्चर्याम्भोधौ निममज्ज । सविमर्शं सतर्षं च सोऽदर्शद् यन्मरणासन्नविपन्नमहर्षिवपुषि बहुशोऽगणिता व्रणिता रचितनिचितधात्वङ्ग६त्रोटा विस्फोटाः कृतास्फोटाः७ प्रस्फुरन्तीति ।

१- ध्वस्तविषादेन । २- प्रतिबिम्बिता । ३- अप्रियः प्रियो भवतीति प्रियंभावुकः । ४- विहितागमनः । ५- विहितः अधिको रणः येन सः । तस्मिन् अन्तःकरणे । ६- कृतसञ्चितरसासृगादिसप्तधात्ववयवच्छेदाः । ७- कृतप्रहाराः ।

विषमा विषमयी वेदना तमतितमां क्वथितं मथितं व्यथितं तन्तनोति। दावानलसदृशी दाहज्वालामाला च तद्देहं दग्धं जग्धं दन्धमीति१। प्रतिपदं तदभिमुखावस्थिता देहविहारिणी प्राणान्तकारिणी पीडापि सक्रीडा न व्रीडामावहति। किंतु महात्मा तु जितात्मा शान्तस्वान्तोऽवतिष्ठते। क्लेशलेशमपि नाश्लेषयति। दुःखसख्यमपि न ख्यापयति। प्रत्युत गम्भीरगर्जनया विवर्जिताधिः श्रुतिमन्त्रान् सजोषमुद्घोषयति। निरपायमुद्गायति। अमुष्य हि विशिष्य प्रसादसदनं वदनम्। कमलविमले विकसिते लोचने। अद्भुताभाविभासितं विमलं भालं चन्द्रवच्चमत्करोति। मन्ये व्याधिः सोपाधिः२ सन् त्रैलोक्यालोक्येऽस्मिन् न्यायविदि व्याप्तिं न गृह्णाति। एतादृशी सहनशीलता न सर्वथा शरीरस्यैव शक्नोति भवितुम्। अवश्यमेवात्रान्तर्हितेन महितेनात्मबलेन भाव्यम्। प्राथमकल्पिकोऽयमवसरः सहृदयहृदयाह्लादहेतुरभूद् यत्र महर्षेर्मृत्योः प्रागवस्थां प्रत्यक्षमक्षिलक्षीकृत्य श्रीपण्डितगुरुदत्तसदृशस्याप्रतिमवैदुष्यस्य कर्कशतार्किकधुरन्धरस्य शोभितवसुन्धरस्य नूतनविज्ञानोद्यानविहारविकसितमतेरविदितात्मगतेर्नास्तिकशिरोमणेरकुटिलहृत्पटलरूपायामभिरूपायामुर्वरायां भूमौ सार्वभौमं सरलमात्मजीवनप्रतिपत्तेर्मूलमनुकूलं संलग्नम्। विद्युदुद्द्योतप्रायैरुद्भूतैरेभिः सद्भावैः सहसा स विदिद्युते। स एवमुदैक्षत यदेकतः परमं धाम लब्धुमदब्धः३ परमहंसः स्वामिकुलावतंसः सरस्वतीस्वरूपोऽनुरूपो भूप इव दीप्तरूपः श्रीमान् मतिमान् महान् दयानन्दः प्रभुं प्रार्थयमान आस्ते

१- पुनः पुनः धमति सन्तापयति। २- कासश्वासादिविशेषणसहितः। पक्षे उपाधिसहितः। न्यायशास्त्रे ह्युपाधिरहितः सम्बन्धो व्याप्तिरुच्यते न तूपाधिसहितः। साधनाव्यापकत्वे सति साध्यसमव्याप्तिरित्युपाधिलक्षणम्।
३- दम्भरहितः।

परतश्च स एव वैदिकं धर्ममुपदेष्टुमुपदेशकवेशावेशभूषितः परिष्कृत-तद्भवनपटलेन संनिकृष्टः समुपविष्टस्तिष्ठतीति। आत्मयोगस्येदं प्रत्यक्षं प्रमाणमुपलभ्य श्रीपण्डितगुरुदत्तस्य चित्तस्फटिकं झटित्या-स्तिकभावप्रभाभिराबभासे। मन्ये महर्षेरन्तर्भूतं ज्योतिर्बहिराविर्भूय गुरुदत्तदेहदीपं प्राविक्षत्। गुरुदत्तस्तु गुरुरेनं१ देयादिति व्युत्पत्त्या यथार्थं नाम दधानो गुप्तरीत्यात्मप्रतिपत्तिकरं भास्करमिव महस्करं यशस्करं श्रेयस्करं मस्करिणं महर्षिं सहर्षं श्रद्धापुलकाञ्चित-तनुरतिमात्रं प्रमुदितगात्रो भूयोभूयो ददर्श।

परमधामगमनम्

यतीश्वरोपि वेदगानानन्तरं परमप्रीत्या हृष्यदङ्गः समुल्लसद्-भक्तितरङ्गः स्फुटं दैव्या वाचा परमात्मदेवं प्रार्तथत२। तदनन्तरं लौकिक्यार्यभाषया लब्धावकाशया जगदीश्वरगुणानवगणो३ गायन् गायत्रीच्छन्दसं सावित्रीमृचमजपीत्। चिरं तस्याः पुण्यं पाठं वितन्वन् मौनमवालम्वत। सुवर्णवर्णाभरणा मूर्तिरिव च समाधिमाधाय निश्चलोऽवतस्थे। तस्मिन् क्षणे द्युतिमतो भगवतो यतीश्वरस्य मुखमण्डलमभितः प्रसादप्रासादसुषमा शुशुभे। प्रभाते प्रभातप्रभाकर-प्रभातोऽप्यधिका वदनद्युतिरद्युतत्। समाधेरुच्चतमाया भूमेरवतीर्य विकीर्य च समन्ताद् विकसन्नेत्रद्वयज्योतिर्ज्योतिष्कृत् सूर्य इवोद्-गूर्येण४ वचसास्यमापूर्य पर्यवसाने पौर्वापर्यविपर्ययं भगवदिच्छा-न्वायत्तमेव पर्यवेक्षमाणः स्वामी क्षमास्थित५ एवेमां मधुरां गिरमुदगारीत्– हे दयामय हे सर्वशक्तिमन्नीश्वर! ईदृश्येव तवेच्छा।

१- गुरुः स्वामी दयानन्दः एनं गुरुदत्तं देयाद् आत्मज्ञानसम्पन्नं कुर्यादिति व्युत्पत्त्या मन्ये गुरुदत्तो व्युत्पन्नोऽभूत्। २- प्रार्थयामास। प्रार्थयतेर्लुङ्। ३- अवगणः एकाकी। ४- उन्नतेन। ५- क्षमायां तितिक्षायां भूमौ च स्थितः।

सत्यं जाने, तवैवेयमिच्छा । सा च बलीयसी । भगवन् ! मघवन् ! पूर्येत तवेच्छा । अहह ! मम प्रियतम परमेश्वर ! त्वया साधीयसीयं लीलालीलीति१ । दुःखात्यन्तनिवारणाय कृतोक्तवर्णोच्चारण एवोच्चविमर्शो ब्रह्मर्षिरात्मीयान् प्राणान् ब्रह्मरन्ध्रचक्रेण स्वर्गसोपानमारोप्य निरूप्यात्मसारूप्यो मोक्षाख्यं परमं चरमं धाम जगाम ।।

भुजङ्गप्रयातं वृत्तम्

जगच्चक्रमेतद् भुजङ्गप्रयातं२
परित्यज्य चक्रे दिवो यः प्रयातम्३ ।
नभोगी४ नरोगी स योगी महात्मा
दयानन्दनामा विभायाद् यतात्मा ।।१।।
यदीया शुभा कीर्तिराकीर्ति सर्वैः
प्रियैरास्तिकैर्नास्तिकैश्चाप्यगर्वैः ।
अपायात्५ स पायात् समुद्दीप्तधामा
महर्षिः सहर्षो दयानन्दनामा ।।२।।
कपूयं६ निरासं७ निरासं निकृष्टः
श्रयेत् सन्निधिं८ साधु यत्संनिकृष्टः९ ।

१- अलीलि व्यरचि । लीलयतेः कर्मणि लुङ् । २- सर्पवत् कुटिलगति । ३- प्रयातं प्रयाणम् । भावे क्तः । दिवः द्योलोकस्य प्रयाणं चक्रे इत्यर्थः । ४- नशब्देन समासः स च सुप्सुपेति । न तु नञ्तत्पुरुषः, तत्र नलोपप्रसङ्गात् । भोगरोगरहित इत्यर्थः । सन्ति च नशब्देनापि समासं प्राप्ताः शब्दाः । तद्यथा— नातियत्नतः । नैकविद्यम् इत्यादि । ५- विघ्नात् कष्टात् पापादिति तात्पर्यम् । ६- कुत्सितं कर्म, दुराचारमित्यर्थः । ७- निरस्य निरस्य । णमुलन्तम् । ८- श्रेष्ठं निधिमात्मस्वरूपप्रतिपत्तिम् इति भावः । ९- येन महात्मना दयानन्देन संनिकृष्टः । यत्संनिकर्षमाप्त इत्यर्थः ।

सदा तच्चरित्रं पवित्रं विचित्रं
मुदा ध्येयमध्येयमेनोलवित्रम्१ ॥३॥

इतो द्यामितो२ऽद्यापि यः पूजनीयः
स्मृतोऽलब्ध मह्यां महीयां३ महीयः४।

तदर्थं समर्था सुराणां पुराणी
प्रसिद्धा विशुद्धा मयाऽभाणि वाणी ॥४॥

इति चतुर्थ उल्लासः।

समाप्तोऽयं लघुग्रन्थः।

——:०:——

१- पापविनाशकम्। एनः पापम्। तस्य लवित्रम्। २- इतः गतः। ३- पूजाम्। महीङ् पूजायाम्। कण्ड्वादियगन्तादकारः प्रत्ययः। ततः स्त्रियां टाप्। ४- सातिशयम्।

आर्यसमाज के नियम

—:०:—

१—सब सत्यविद्या और जो पदार्थ विद्या से जाने जाते हैं उन सब का आदिमूल परमेश्वर है।

२—ईश्वर सच्चिदानन्द स्वरूप, निराकार, सर्वशक्तिमान्, न्यायकारी, दयालु, अजन्मा, अनन्त, निर्विकार, अनादि, अनुपम, सर्वाधार, सर्वेश्वर, सर्वव्यापक, सर्वान्तर्यामी, अजर, अमर, अभय, नित्य, पवित्र और सृष्टिकर्ता है। उसी की उपासना करनी योग्य है।

३—वेद सब सत्य विद्याओं का पुस्तक है। वेद का पढ़ना पढ़ाना और सुनना सुनाना सब आर्यों का परम धर्म है।

४—सत्य के ग्रहण करने और असत्य के छोड़ने में सर्वदा उद्यत रहना चाहिए।

५—सब काम धर्मानुसार अर्थात् सत्य और असत्य को विचार करके करने चाहियें।

६—संसार का उपकार करना इस समाज का मुख्य उद्देश्य है अर्थात् शारीरिक, आत्मिक और सामाजिक उन्नति करना।

७—सब से प्रीतिपूर्वक धर्मानुसार, यथायोग्य वर्त्तना चाहिए।

८—अविद्या का नाश और विद्या की वृद्धि करनी चाहिए।

९—प्रत्येक को अपनी ही उन्नति में सन्तुष्ट न रहना चाहिए किन्तु सब की उन्नति में अपनी उन्नति समझनी चाहिए।

१०—सब मनुष्यों को सामाजिक सर्वहितकारी नियम पालने में परतन्त्र रहना चाहिए और प्रत्येक हितकारी नियम में सब स्वतन्त्र रहें।

मुद्रक—वेदव्रत शास्त्री, आचार्य प्रिंटिंग प्रेस, रोहतक। फोन ५७४